# MudgalapurAna Khanda 1 Vakratundacharitam

# મુદ્ગલપુરાણં ખણ્ડઃ ૧ વક્રતુણ્ડચરિતમ્

## Document Information

Text title : Mudgala Purana Khanda 1 Vakratundacharitam

File name : mudgalapurANam1.itx

Category : purana, ganesha

Location : doc_purana

Proofread by : Yash Khasbage

Latest update : September 18-19, 2023 Ganeshachaturthi

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 18, 2023

*sanskritdocuments.org*

MudgalapurAna Khanda 1 Vakratundacharitam

# મુદ્ગલપુરાણં ખણ્ડઃ ૧ વક્રતુણ્ડચરિતમ્

॥ મુદ્ગલપુરાણં ખણ્ડઃ ૧ ॥

॥ અથ શ્રીમુદ્ગલપુરાણે પ્રથમઃ ખણ્ડઃ પ્રારભ્યતે ॥

(Page ખં. ૧ અ. ૧ પાન ૧)
॥ ૐ નમઃ શ્રીસ્વાનન્દેશગણેશાય પૂર્ણયોગાત્મને ॥

## ૧.૧ શૌનકસૂતસંવાદો નામ પ્રથમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

અથ શ્રીમન્મૌદ્ગલપુરાણપ્રારમ્ભઃ ।
ધ્યાયે સ્થિરેણ ચિત્તેન ગણેશં સર્વસિદ્ધિદમ્ ।
બુદ્ધિપ્રકાશકં પૂર્ણં યોગિનાં હૃદિ સંસ્થિતમ્ ॥ ૧॥

જિતં તેનાખિલં નાનાબ્રહ્મવર્ણનવર્ણિતમ્ ।
નાનાજગત્સમૂહં વૈ ગણેશેનોભયં કૃતમ્ ॥ ૨॥

ભક્તસંરક્ષણાર્થાય નિર્ગુણઃ સગુણસ્તુ યઃ ।
નાનાવતારવાન્સોઽપિ નાનાભેદધરો બભૌ ॥ ૩॥

તસ્મૈ નમો ગણેશાય નરકુઞ્જરરૂપિણે ।
સગુણો નરરૂપો યો નિર્ગુણો ગજવક્ત્રકઃ ॥ ૪॥

નમઃ શિવાય શાન્તાય વિષ્ણવે પ્રભવિષ્ણવે ।
સૂર્યાય શક્તયે ચૈવ ચતુર્ધા તે વિભાગિને ॥ ૫॥

બ્રહ્માણં શેષનાગં ચ નરં નારાયણં સદા ।
નમામિ ભાવયુક્તોઽહં પુરાણપુરુષં પરમ્ ॥ ૬॥

દેવાનાં યોગિનાં ચૈવ મહર્ષીણાં મહાત્મનામ્ ।
વ્રજામિ શરણં નિત્યં પુરાણજ્ઞાનસિદ્ધયે ॥ ૭॥

પુરાકલ્પેઽભવન્વિપ્રાઃ શૌનકાદ્યાઃ સુસાધનાઃ ।
કલિદોષભયાત્સર્વે નૈમિષારણ્યમાશ્રિતાઃ ॥ ૮॥

તસ્મિન્કલિયુગાવાસં જ્ઞાત્વાદૌ બ્રહ્મણો મુખાત્ ।
મુનિધર્મપ્રસિદ્ધ્યર્થં કર્મજ્ઞાન પ્રસિદ્ધયે ॥ ૯॥

અન્યચ્ચ બ્રહ્મણા પ્રોક્તં પુરાણશ્રવણં સદા ।
કલિદોષહરં પુણ્યં તદર્થમભવન્યતાઃ ॥ ૧૦॥

કસ્મિંશ્ચિત્સમયે સૂતો લોમહર્ષણ આયયૌ ।
મુનીનાં દર્શનાર્થાય પુરાણજ્ઞો વિચક્ષણઃ ॥ ૧૧॥

નૈમિષારણ્યશોભાં ચ પશ્યંસ્તત્ર સુવિસ્મિતઃ ।
અહો ધન્યં મહારણ્યં કલિદોષવિવર્જિતમ્ ॥ ૧૨॥

દૃષ્ટા વૈ મુનયસ્તેન સુપ્રસન્નાનનામ્બુજાઃ ।
નિત્યનૈમિત્તિકકરાઃ સ્વધર્માચરણપ્રિયાઃ ॥ ૧૩॥

પઞ્ચયજ્ઞરતાસ્તત્ર વેદાધ્યયનકારિણઃ ।
બ્રહ્મતેજઃસમાયુક્તા જ્વલન્તઃ પાવકા ઇવ ॥ ૧૪॥

વિનાઽસ્તેન યથા સૂર્યો યોગિનો વેદવેદિનઃ ।
તારકાઃ સર્વજન્તૂનાં શૌનકાદ્યા મહર્ષયઃ ॥ ૧૫॥

તત્રાગત્ય મહાભાગઃ સ સૂતો રોમહર્ષણઃ ।
સાષ્ટાઙ્ગં પ્રણતઃ પૂર્વં પરમાહ્લાદસંયુતઃ ॥ ૧૬॥

અભિવાદ્ય મુનીન્સર્વાન્ભક્ત્યા નમ્રાત્મકન્ધરઃ ।
પ્રાઞ્જલિઃ પ્રયતો ભૂત્વા પ્રોવાચ મધુરં વચઃ ॥ ૧૭॥

સૂત ઉવાચ ।
વંશો ધન્યો મદીયોઽદ્ય પિતરૌ ચ કુલં વયઃ ।
વિદ્યા વ્રતં તપો જ્ઞાનં ધન્યં સર્વં મુનીશ્વરાઃ ॥ ૧૮॥

ભવતાં પાદપદ્મં ચ સર્વાશુભવિનાશનમ્ ।
કાઙ્ક્ષિતં યત્સદા દેવૈર્મયા દૃષ્ટં સુપુણ્યતઃ ॥ ૧૯॥

સાક્ષાદ્ બ્રહ્મસ્વરૂપા વૈ બ્રાહ્મણા બ્રહ્મવિત્તમાઃ ।
યેષાં દર્શનમાત્રેણ કૃતકૃત્યાશ્ચ જન્તવઃ ॥ ૨૦॥

કૃતાર્થોઽહં કૃતાર્થોઽહં કૃતાર્થોઽહં ન સંશયઃ ।
(Page  ખં. ૧ અ. ૧ પાન ૨)
ભવતાં દર્શનેનૈવ મુક્તોઽહં ભવસાગરાત્ ॥ ૨૧॥

ઇતિ બ્રુવાણં સાધું તં સૂતં વૈ રોમહર્ષણમ્ ।
પ્રત્યૂચુર્બ્રાહ્મણાઃ સર્વે ભક્તિયુક્તં તપોધનાઃ ॥ ૨૨॥

બ્રાહ્મણા ઊચુઃ ।
સૂત સૂત મહાભાગ સ્થીયતાં પુણ્યવર્ધન ।
તવ દર્શનમાત્રેણ સન્તુષ્ટાઃ સ્મો વયં ખલુ ॥ ૨૩॥

ઇત્યુક્તસ્તત્ર સૂતસ્તુ મુનિદત્તે શુભાસને ।
સમાસીનો મહાબુદ્ધિઃ સાઞ્જલિઃ સન્પ્રતાપવાન્ ॥ ૨૪॥

સુખાસીનં ચ સૂતં તં દૃષ્ટ્વા તત્ર મહામુનિઃ ।
ભૃગુપ્રેષ્ઠશ્ચ મુખ્યોઽસૌ મુનીનાં પ્રત્યુવાચ હ ॥ ૨૫॥

શૌનક ઉવાચ ।
સૂત સૂત મહાભાગ સર્વજ્ઞ સુખદાયક ।
આરાધિતસ્ત્વયા પ્રાજ્ઞઃ કૃષ્ણદ્વૈપાયનો મહાન્ ॥ ૨૬॥

નારાયણાવતારો યઃ સાક્ષાન્નારાયણઃ સ્વયમ્ ।
વેદસ્ય ભાગકારી સ પુરાણાનાં વિભાગકૃત્ ॥ ૨૭॥

ત્વં વૈ તસ્માત્પુરાણાનિ સેતિહાસાનિ વેત્સિ ચ ।
તેન સર્વજ્ઞતા જાતા તવેયં પુણ્યવર્ધન ॥ ૨૮॥

વયં ભીતાશ્ચ કાલેન કલિકલ્મષરૂપિણા ।
નૈમિષારણ્યમાસ્થાય સ્થિતાશ્રમાઃ સ્વયમ્ભુવા ॥ ૨૯॥

તત્ર વિશ્રાન્તિદાતા વૈ ત્વં પ્રાપ્તોઽસિ મહાદ્યુતિઃ ।
પુરાણાનાં પ્રવક્તા ચ પુણ્યવાન્પુણ્યવર્ધનઃ ॥ ૩૦॥

યત્ર પૌરાણિકી ગાથા કલિસ્તત્ર ન તિષ્ઠતિ ।
તસ્માત્કારુણ્યભાવેન પુરાણં બ્રૂહિ નઃ પ્રભો ॥ ૩૧॥

તવ યદ્દર્શનં જાતં મહાપુણ્યેન સત્તમ ।
ધન્યં ધન્યં મહાભાગ સાક્ષાત્સંશયછિત્સ્વયમ્ ॥ ૩૨॥

છેદેન સંશયાનાં વૈ સતાં ત્વં રોમહર્ષણમ્ ।

કરોષિ તેન તે નામ રોમહર્ષણ ઇત્યહો ॥ ૩૩॥

ઇતિ પૃષ્ટો મહાત્મા સ શૌનકેન મહર્ષિણા ।
સંહૃષ્ટઃ સન્નુવાચેદં વચનં ધર્મસંસ્કૃતમ્ ॥ ૩૪॥

સૂત ઉવાચ ।
અદ્યાઽહં કૃતકૃત્યો વૈ કૃતોઽનુગ્રહકારિણા ।
સકલં કથયિષ્યામિ વ્યાસેન કથિતં ચ યત્ ॥ ૩૫॥

ઇત્યુક્ત્વા કથયામાસ પુરાણાનિ સ કૃત્સ્નશઃ ।
નાનાખ્યાનવિભક્તાનિ નાનાધર્મયુતાનિ ચ ॥ ૩૬॥

સર્વાર્થસાધનાન્યેવ દુઃખનાશકરાણિ ચ ।
બ્રહ્મભૂતપ્રદાન્યેવ નાનામતયુતાનિ ચ ॥ ૩૭॥

પુરાણોપપુરાણાનિ સેતિહાસાનિ ભાગશઃ ।
ધર્માર્થકામમોક્ષાણાં દાતૃત્વાત્પુણ્યદાનિ ચ ॥ ૩૮॥

શ્રુત્વા શ્રુત્વા મુનીન્દ્રાસ્તે હર્ષયુક્તા બભૂવિરે ।
નિત્યં પ્રમુદિતાસ્તેન પ્રીતાઃ સમ્પૂર્ણભાવતઃ ॥ ૩૯॥

યુગસ્યોત્ક્રમણં તસ્ય ચક્રુસ્તે મુનયોઽખિલાઃ ॥ ૪૦॥

પુરાણેષુ ચ સર્વેષુ સેતિહાસેષુ સર્વતઃ ।
નાનાભેદમતાદીનિ શ્રુત્વા ભ્રાન્તા મુનીશ્વરાઃ ॥ ૪૧॥

નિશ્ચયં નાધિગચ્છન્તિ પરં કિં સર્વસમ્મતમ્ ।
તદર્થં મુનિવર્યસ્તં પર્યપૃચ્છત્સ શૌનકઃ ॥ ૪૨॥

શૌનક ઉવાચ ।
ભો ભો સૂત મહાભાગ શૃણુ મે વચનં લઘુ ।
પુરાણાનિ ચ સંશ્રુત્ય ભ્રાન્તાઃ સ્મો વૈ મહાદ્યુતે ॥ ૪૩॥

ઇદં પરમિદં નેતિ ત્વયા સર્વત્ર વર્ણિતમ્ ।
ભિન્નં ભિન્નં મહાબુદ્ધે તેન નો નિશ્ચયઃ કથમ્ ॥ ૪૪॥

કુત્રાપિ શઙ્કરઃ શ્રેષ્ઠઃ કુત્ર વિષ્ણુસ્તથા રવિઃ ।
શક્તિશ્ચૈવ ગણેશશ્ચ વિરાજઃ કુત્ર રૂપકમ્ ॥ ૪૫॥

કુત્ર બ્રહ્મ ચ યોગશ્ચ જ્ઞાનં કર્મ ચ કુત્ર વૈ ।
આત્મા પ્રાણોઽન્નમિત્યુક્તં મનો વૈ પરતઃ પરમ્ ॥ ૪૬॥

કુત્ર બુદ્ધિર્મહાભાગ સાઙ્ખ્યં સ્વાનન્દ એવ ચ ।
(Page  ખં. ૧ અ. ૨ પાન ૩)
ઇત્યાદિમતભેદેન નિશ્ચયો નૈવ જાયતે ॥ ૪૭॥

અતસ્ત્વં કૃપયા બ્રૂહિ વેદશાસ્ત્રાર્થ સમ્મતમ્ ।
સર્વેષાં માન્યમેકં ચ સર્વસંશયનાશનમ્ ॥ ૪૮॥

ઇતિ પૃષ્ટો મહાતેજાઃ શિષ્યો વ્યાસસ્ય સત્તમઃ ।
એકં શ્રુતિસ્મૃતીનાં યત્ સારં કથિતુમારભત્ ॥ ૪૯॥

સૂત ઉવાચ ।
શૃણુધ્વં મુનયઃ સર્વે સારં મુદ્ગલભાષિતમ્ ।
સર્વશ્રુતિસ્મૃતીનાં ચ સર્વમાન્યં વિશેષતઃ ॥ ૫૦॥

પુરા દક્ષાધ્વરે જાતં યજ્ઞવિધ્વંસનં મહત્ ।
રુદ્રેણાગત્ય સહસા કૃતો વિઘ્નો મહત્તરઃ ॥ ૫૧॥

દેવાઃ પરાજિતાઃ સર્વે રુદ્રૈઃ પરમદારુણૈઃ ।
દક્ષમસ્તકસચ્છેદો વીરભદ્રેણ વૈ કૃતઃ ॥ ૫૨॥

બ્રહ્મણાગત્ય તત્રાસૌ સાન્ત્વિતો બહુલોક્તિભિઃ ।
શઙ્કરો જીવયામાસ દક્ષં યોગેન તત્ત્વતઃ ॥ ૫૩॥

યજ્ઞવિધ્વંસશોકાર્તો દક્ષઃ શાપેન મોહિતઃ ।
અજ્ઞાનાવરણેનાપિ ન કિઞ્ચિન્નિશ્ચયં યયૌ ॥ ૫૪॥

તત્રાજગામ ભગવાન્ સાક્ષાત્સૂર્ય ઇવોદિતઃ ।
વેદશાસ્ત્રાર્થતત્ત્વજ્ઞો યોગીન્દ્રો મુદ્ગલો મુનિઃ ॥ ૫૫॥

ગણેશભક્તપ્રવરઃ સર્વવન્દ્યો મહાયશાઃ ।
તપસાં કર્મણાં સાક્ષાન્નિધિરેષ સનાતનઃ ॥ ૫૬॥

તં દૃષ્ટ્વોત્થાય દક્ષોઽસૌ પ્રણનામ મહામુનિમ્ ।
આસનાદ્યૈઃ સુસમ્પૂજ્ય વક્તું સમુપચક્રમે ॥ ૫૭॥

દક્ષ ઉવાચ ।
ભો ભો મુનીન્દ્ર વન્દ્યસ્ત્વમાઙ્ગિરસ મહાદ્યુતે ।
યજ્ઞવિધ્વંસશોકાર્તં માં પાલય જડીકૃતમ્ ॥ ૫૮॥

મુદ્ગલ ઉવાચ ।
મા ચિન્તાં કુરુ ભો દક્ષ પ્રજાપાલેન્દ્રસત્તમ ।
વિઘ્નરાજં સ્મર ત્વં વૈ તેન સર્વં ન દુર્લભમ્ ॥ ૫૯॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે શૌનકસૂતસંવાદો નામ પ્રથમોઽધ્યાયઃ ॥ ૧.૧

## ૧.૨ દક્ષનન્દિવિવાદો નામ દ્વિતીયોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
દક્ષેણ મુનિશાર્દૂલાઃ શ્રુતં મુદ્ગલભાષિતમ્ ।
પ્રણિપત્ય પુનઃ સોઽપિ પપ્રચ્છ હિતકારકમ્ ॥ ૧॥

શૌનક ઉવાચ ।
દક્ષમુદ્ગલસંવાદં શ્રોતુમિચ્છામહે વયમ્ ।
વિસ્તરેણ સમાચક્ષ્વ સૂત સન્તોષકારક ॥ ૨॥

સૂત ઉવાચ ।
શ‍ૃણુધ્વં મુનયઃ સર્વે કથાં લોકૈકપાવનીમ્ ।
યાં શ્રુત્વા પુરુષસ્યેહ નાન્યત્કૃત્યં પ્રવિદ્યતે ॥ ૩॥

દક્ષમુદ્ગલસંવાદં સમાસેન વિવર્ણયે ।
સારં સર્વત્ર સમ્પૂર્ણં ભવરોગવિમોચનમ્ ॥ ૪॥

મુદ્ગલોક્તં વચઃ શ્રુત્વા દક્ષઃ પ્રોવાચ ધર્મવિત્ ।
પ્રાઞ્જલિઃ પ્રયતો ભૂત્વા હૃષ્ટરોમા મહાયશાઃ ॥ ૫॥

દક્ષ ઉવાચ ।
પુણ્યં મહન્મેઽસ્તિ પુરાતનં યત્તેનૈવ જાતં તવ દર્શનં ભોઃ ।
મોક્ષપ્રદં તત્પરલોકદં ચ ભોગપ્રદં ધર્મ્યમનન્તપુણ્યમ્ ॥ ૬॥

શાપેન નષ્ટો મમ સર્વબોધઃ પ્રજાપતિત્વં પ્રગતં મદીયમ્ ।
યજ્ઞસ્ય ભઙ્ગો વિવિધં હિ કષ્ટં તત્રૈવ તે દર્શનમત્ર ચિત્રમ્ ॥ ૭॥

(Page ખં. ૧ અ. ૨ પાન ૪)
તવ દર્શનમાત્રેણ કિઞ્ચિત્ સ્ફૂર્તિઃ સમાગતા ।

ધન્યોऽસિ યોગિનાં મધ્યે પૂતત્વં ત્વીદૃશં ત્વયિ ॥ ૮॥

કોऽસૌ વિઘ્નપતિઃ પૂર્ણઃ કીદૃશઃ કિંસ્વભાવવાન્ ।
કતિ તસ્યાવતારાશ્ચ કસ્યાંશો વાऽપિ કિંસ્તવઃ ॥ ૯॥

પૂજિતો વિધિવત્તૈશ્ચ કિં ફલં દત્તવાન્ પરમ્ ।
કિંવિહારશ્ચ કસ્મિન્વૈ લોકે વસતિ સ પ્રભુઃ ॥ ૧૦॥

એતત્સર્વં સુવિસ્તાર્ય પૃચ્છતે બ્રૂહિ સાદરમ્ ।
જ્ઞાત્વા તં દેવદેવેશં ભવિષ્યામિ હિતાવહમ્ ॥ ૧૧॥

ઇત્યેવં કથયન્તં તં મુનયો વિસ્મયાન્વિતાઃ ।
પપ્રચ્છુઃ સકલં તદ્વૈ દક્ષચેષ્ટિતમાદરાત્ ॥ ૧૨॥

શૌનકાદ્યા ઊચુઃ ।
દક્ષઃ પ્રજાપતિઃ સાક્ષાત્કથં મૂઢત્વમાગતઃ ।
પ્રજાપતિત્વં તસ્યાપિ કથં નષ્ટં મહાત્મનઃ ॥ ૧૩॥

યજ્ઞધ્વંસઃ કથં પ્રાપ્તઃ શમ્ભુઃ પ્રકુપિતઃ કથમ્ ।
એતત્સર્વં સુવિસ્તાર્ય બ્રૂહિ સૂત મહામતે ॥ ૧૪॥

શ્રુત્વા મુનિવચો રમ્યં કૃષ્ણદ્વૈપાયનસ્ય ચ ।
શિષ્યઃ પ્રોવાચ મધુરં વચનં સમ્પ્રહર્ષયન્ ॥ ૧૫॥

સૂત ઉવાચ ।
શ઼ૃણુ શૌનક યત્નેન કથાં ભુવનપાવનીમ્ ।
કથયામિ યથાતથ્યં શ્રુતાં વ્યાસમુખેન યામ્ ॥ ૧૬॥

બ્રહ્મણો દશ પુત્રા યે તત્ર દક્ષો મહાન્પ્રભુઃ ।
અતઃ પ્રજાપતિસ્ત્રાતા કૃતસ્તેન સ વેધસા ॥ ૧૭॥

સ રાજ્યં પ્રાપ્ય મત્તોऽભૂદ્ ગર્વેણૈવ પરિપ્લુતઃ ।
અહં પ્રજાપતીનાં ચ શ્રેષ્ઠો રાજા ન મત્સમઃ ॥ ૧૮॥

એકદા ગિરિવર્યે તુ કૈલાસે શઙ્કરસ્ય ચ ।
દર્શનાર્થં ગતા દેવા મુનયઃ સિદ્ધકિન્નરાઃ ॥ ૧૯॥

ગન્ધર્વા નાગમુખ્યાશ્ચ વિદ્યાધર્યપ્સરોગણાઃ ।
બ્રહ્મા વિષ્ણુર્મહેન્દ્રશ્ચ સર્વે તેન સુસત્કૃતાઃ ॥ ૨૦॥

સભામધ્યે સમાસીનાઃ શઙ્કરેણ ચ પૂજિતાઃ ।

વામભાગે સ્થિતો વિષ્ણુદક્ષિણાઙ્ગે પિતામહઃ ॥ ૨૧॥

ક્રમેણ સર્વે દેવાશ્ચ યથાયોગ્યં સ્થિતા મુને ।
ગણા નન્દિમુખાસ્તત્ર સમીપે સંસ્થિતા બભુઃ ॥ ૨૨॥

તત્ર તે મુનયો હૃષ્ટા વસિષ્ઠાદ્યાઃ પ્રતુષ્ટુવુઃ ।
નારદપ્રમુખાઃ સર્વે ગન્ધર્વા લલિતં જગુઃ ॥ ૨૩॥

નૃત્યમપ્સરસશ્ચક્રુરેવં સર્વે પુપૂજિરે ।
શઙ્કરં પરિવારાઢ્યમાનન્દન સમન્વિતમ્ ॥ ૨૪॥

કથા નાનાવિધાસ્તત્ર તેઽકુર્વન્ ભાવપૂર્વકમ્ ।
તત્રાજગામ દક્ષઃ સ પ્રજાપતિપતિઃ સ્વયમ્ ॥ ૨૫॥

શિવેન માનિતસ્તત્ર વચસા ચૈવ સત્કૃતઃ ।
નમનં ન કૃતં તસ્મા ઈશ્વરેણ પ્રભાવતઃ ॥ ૨૬॥

તેન સઙ્કુપિતોઽત્યન્તમૃચિવાન્ ગર્વમોહિતઃ ।
શ‍ૃણુધ્વં યે સભાશ્રેષ્ઠા યાથાતથ્યાનુવર્તિનઃ ॥ ૨૭॥

રુદ્રસ્ય શ્વશુરોઽહં વૈ પુત્રતુલ્યો મમાપ્યયમ્ ।
નમનં ન કૃતં કસ્માત્ તસ્માત્ત્યાજ્યો મહેશ્વરઃ ॥ ૨૮॥

ઐશ્વર્યગર્વયુક્તોઽયં સ્વધર્મન્ચૂનતાં ગતઃ ।
દેવપઙ્ક્તૌ કથં યોગ્યઃ પિશાચાનામધીશ્વરઃ ॥ ૨૯॥

વર્ણાશ્રમવિહીનોઽયં નગ્નો ભિક્ષાશને રતઃ ।
સર્પભૂષણસક્તશ્ચ ચિતાભસ્માઙ્ગલેપનઃ ॥ ૩૦॥

વ્યાઘ્રાજિનપરીતશ્ચ મુણ્ડમાલાધરઃ સદા ।
ઇત્યાદિદોષયુક્તત્વાન્ન સ્પૃશ્યોઽયં મહાત્મભિઃ ॥ ૩૧॥

અશિવઃ શિવનામા વૈ વૃથેશિત્વાભિમાનવાન્ ।
અતો ન ભાષણીયોઽયં દોષકારી પિશાચરાટ્ ॥ ૩૨॥

ઇતિ બ્રુવન્તમત્યન્તં સ્વયમ્ભૂસ્તં નિરાકરોત્ ।
(Page ખં. ૧ અ. ૩ પાન ૫)
ન ગૃહીતં પિતુર્વાક્યં ક્રોધાવેશેન તેન તત્ ॥ ૩૩॥

નાનાનિન્દાયુતં વીક્ષ્ય ભગવાન્નન્દિકેશ્વરઃ ।
ઉવાચ સર્વસાન્નિધ્યે ક્રોધેનારક્તલોચનઃ ॥ ૩૪॥

નન્દિકેશ્વર ઉવાચ ।
ધિક્ત્વાં વ્યર્થં પ્રજાપાલ શિવનિન્દાપરાયણ ।
શિવતત્ત્વં ન જાનાસિ મદેનાસિક્ત દુર્મતે ॥ ૩૫॥

માયાખેલનવાનેષ તથા તદ્દોષવર્જિતઃ ।
તેનાયં શિવતાં પ્રાપ્તઃ કથં નિન્દા કરોષિ રે ॥ ૩૬॥

શિવનિન્દાકરાઃ શાસ્ત્રે નારકા જ્ઞાનવર્જિતાઃ ।
અતસ્ત્વં જ્ઞાનહીનસ્તુ ભવિતાસ્યપવાક્યતઃ ॥ ૩૭॥

નિન્દા યેનૈવ વક્ત્રેણ કૃતા શમ્ભોર્મહાત્મનઃ ।
અજાસ્યો ભવિતાસિ ત્વં ભ્રષ્ટરાજ્યો ભવિષ્યસિ ॥ ૩૮॥

ઇતિ શ્રુત્વા વચઃ સોઽપિ તં પુનઃ પ્રત્યુવાચ હ ।
ન ત્વં જાનાસિ દુર્બુદ્ધે શઙ્કરં કર્મદૂષિતમ્ ॥ ૩૯॥

વર્ણાશ્રમવિહીનશ્ચ યસ્તિષ્ઠેત્પુરુષઃ કદા ।
પદે પદે મહાપાપો નારકી મરણે ભવેત્ ॥ ૪૦॥

તસ્માદ્યૂયં મહાપાપાઃ શૈવાઃ સ્પૃશ્યા ન કુત્રચિત્ ।
ભુવિ યે શાઙ્કરા નિત્યં જ્ઞાનહીના ભવન્તુ તે ॥ ૪૧॥

કલૌ પ્રાપ્તે ચ પાખણ્ડા ભવિષ્યન્તિ જટાધરાઃ ।
શૂદ્રા નેદં પઠિષ્યન્તિ નગ્ના ભસ્માઙ્ગલેપનાઃ ॥ ૪૨॥

સ્ત્રીમાંસમદિરાસક્તા નાનાભોગકરાસ્તથા ।
નરકે વૈ પતિષ્યન્તિ શમ્ભુમાર્ગપરાયણાઃ ॥ ૪૩॥

પ્રજાપતિં પ્રભુઃ સાક્ષાદ્ બ્રહ્મા તં નિરભત્સર્યત્ ।
તતો જગામ સ્વગૃહં દક્ષઃ ક્રોધપરિપ્લુતઃ ॥ ૪૪॥

સર્વે તે સ્વસ્થલં જગ્મુદુઃખિતાસ્તેન વૈ કૃતાઃ ।
શિવોઽપિ દુઃખસંયુક્તો મ્લાનતાં પરમાં ગતઃ ॥ ૪૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે દક્ષનન્દિવિવાદો નામ દ્વિતીયોઽધ્યાયઃ ॥ ૧.૨

# ૧.૩ પાર્વતીદેહત્યાગો નામ તૃતીયોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
શ ृણુધ્વં મુનયઃ સર્વે સ્થિરીકૃત્ય મનશ્ચલમ્ ।
વિઘ્નેશભક્તિહીના યે વિઘ્નાક્રાન્તા ભવન્તિ તે ॥ ૧॥

દક્ષોઽભૂત્ સ્વગૃહં ગત્વા ક્રોધામર્ષસમન્વિતઃ ।
ન કિઞ્ચિત્ સુખવાન્ વિપ્રાઃ શૂલયુક્તો યથા નરઃ ॥ ૨॥

શિક્ષાં શિવસ્ય કર્તું સ હૃદિ વ્યવસિતોઽભવત્ ।
ન કિઞ્ચિત્પ્રાપ્તવાંસ્તત્ર વિચારં ભૃશદુઃખિતઃ ॥ ૩॥

એતસ્મિન્નન્તરે તત્ર નારદો દિવ્યદર્શનઃ ।
આજગામ મહાતેજા દક્ષેણૈવ સુસત્કૃતઃ ॥ ૪॥

આસનં પાદ્યમર્ઘ્યં ચ દત્વા સમ્યક્ પ્રપૂજિતઃ ।
પૃષ્ટઃ સ કુશલં પ્રશ્નૈઃપ્રસન્નો નારદોઽબ્રવીત્ ॥ ૫॥

નારદ ઉવાચ ।
દક્ષ કિં દુઃખિતસ્ત્વં તે મુખં મ્લાનતયા યુતમ્ ।
કથયસ્વ મહાતેજાઃ પ્રજાપતિપતિર્ભવાન્ ॥ ૬॥

દક્ષ ઉવાચ ।
શ ृણુ નારદ યેનાહં દુઃખિતો મ્લાનતાં ગતઃ ।
(Page ખં. ૧ અ. ૩ પાન ૬)
શિવેનાસત્કૃતસ્તત્ર સભાયાં સર્વસન્નિધૌ ॥ ૭॥

દર્પેણૈવાવૃતઃ શમ્ભુસ્તસ્ય દર્પહૃતિઃ કથમ્ ।
તાદૃશં બ્રૂહિ મે શીઘ્રં સર્વાર્થજ્ઞ વિચક્ષણ ॥ ૮॥

નારદ ઉવાચ ।
બૃહસ્પતિસવં દક્ષ કુરુ ત્વં સર્વભાવનઃ ।
યજ્ઞભાગવિહીનં તં તત્ર શમ્ભું કુરુષ્વ ભોઃ ॥ ૯॥

યજ્ઞભાગેન હીનોઽયં દેવપઙ્ક્તિબહિષ્કૃતઃ ।
પિશાચેશો ભવેચ્છમ્ભુર્દેવત્વં તત્ર સંહૃતમ્ ॥ ૧૦॥

પ્રજાપતિપતિઃ સાક્ષાદ્ભવાન્સર્વત્ર સમ્મતઃ ।

કરિષ્યસિ યથા પૂર્વં પશ્ચાદ્વૈ તાદૃશં ભવેત્ ॥ ૧૧॥

એવં પરમ્પરાપ્રાપ્તં તસ્યૈશ્વર્યં પ્રકાશિતમ્ ।
ઇતિ મે મનસિ પ્રાપ્તં યથેચ્છસિ તથા કુરુ ॥ ૧૨॥

ઇત્યુક્ત્વા નારદસ્તસ્માદ્ ગતો બ્રહ્માણ્ડમણ્ડલે ।
વીણાગાનરતો ભૂત્વા યોગી બ્રહ્મણિ તત્પરઃ ॥ ૧૩॥

દક્ષોઽપિ હર્ષિતો જાતઃ સત્યં માનિતવાનભૂત્ ।
બૃહસ્પતિસવં કર્તું સમારેભે સ તત્ક્ષણાત્ ॥ ૧૪॥

તત્રાજગામ ભગવાન્ વિષ્ણુર્દેવવરઃ પ્રભુઃ ।
આજગ્મુર્દેવગન્ધર્વા નાનાવાહનશોભિતાઃ ॥ ૧૫॥

તત્રાજગ્મુર્દ્વિજાઃ સર્વે નાનાતત્ત્વાર્થકોવિદાઃ ।
જામાતરઃ સપત્નીકાઃ કશ્યપપ્રમુખાસ્તથા ॥ ૧૬॥

યથોદ્દિષ્ટં ચકારાસૌ દક્ષઃ પરમહર્ષિતઃ ।
ગણનાથવિહીનં તં યજ્ઞં શઙ્કરવર્જિતમ્ ॥ ૧૭॥

ગણેશસ્યાસ્મૃતિર્જાતા સર્વેષાં ભાવિગૌરવાત્ ।
દધીચિપ્રમુખાસ્તત્ર શૈવાઃ ક્રોધેન પૂરિતાઃ ॥ ૧૮॥

દધીચિસ્તત્ર તૂવાચ ક્રોધાવેશસમન્વિતઃ ।
શૃણુ દક્ષ મહાપ્રાજ્ઞ હિતં વચનમુત્તમમ્ ॥ ૧૯॥

શઙ્કરેણ વિહીનોઽયં યજ્ઞો નૈવ પ્રશોભતે ।
પ્રાણહીનો યથા દેહસ્તથૈવાસૌ ન રાજતે ॥ ૨૦॥

ઇતિ શ્રુત્વા વચસ્તસ્ય દક્ષો રોષસમન્વિતઃ ।
ઉવાચ ગર્વમોહેન શાપેનૈવ વિમોહિતઃ ॥ ૨૧॥

શિવોઽશિવરૂપશ્ચ પિશાચાનામધીશ્વરઃ ।
વર્ણાશ્રમવિહીનત્વાન્ન યોગ્યો યજ્ઞ કર્મણિ ॥ ૨૨॥

યત્ર લક્ષ્મીપતિઃ સાક્ષાદ્ ભગવાન્મઙ્ગલાલયઃ ।
તત્ર કિં ન્યૂનતાં યાતિ મિથ્યાવાચં તુ મા વદ ॥ ૨૩॥

શ્રુત્વા તસ્ય વચઃ ક્રૂરં દધીચિઃ પુનરબ્રવીત્ ।
શિવનિન્દાં કરોષિ ત્વમજ્ઞાનેન વિમોહિતઃ ॥ ૨૪॥

યજ્ઞનાશો ભવેદ્ દક્ષ શઙ્કરદ્વેષતસ્તવ ।
ન સિદ્ધિં લભસે ત્વં તુ નષ્ટભાગ્યો ન સંશયઃ ॥ ૨૫॥

અત્ર યે બ્રાહ્મણાદ્યા વૈ વર્ણા નાના સમાગતાઃ ।
સર્વે કલિયુગે પાપાઃ પાખણ્ડાશ્ચ ભવન્તુ તે ॥ ૨૬॥

સ્વધર્મહીનતાં પ્રાપ્ય નરકેઽન્તે પચન્તુ વૈ ।
વિષ્ણુઃ પ્રમોદયુક્તોઽત્ર સ વૈ પાખણ્ડ કારકઃ ॥ ૨૭॥

કલૌ દેવો ભવેન્નિત્યં પાખણ્ડાનાં સહાયવાન્ ।
પાખણ્ડપ્રિયવજ્જન્તુઃ કલૌ મલકરઃ સદા ॥ ૨૮॥

શિવહીને તથા યજ્ઞે મુખ્યો જાતો હિ કેશવઃ ।
વેદબાહ્યં સ્વયં કર્મ કુરુતે તેન શાપિતઃ ॥ ૨૯॥

સર્વે દેવાશ્ચ શીઘ્રં હિ ભવિતારઃ પરાજિતાઃ ।
મુનયો દુઃખસંયુક્તા એવં શપ્ત્વા ગતો મુનિઃ ॥ ૩૦॥

તમનુપ્રયયુઃ સર્વે શૈવાઃ પરમધાર્મિકાઃ ।
ગૌતમો ગાલવશ્ચૈવ વામદેવો દ્વિતસ્ત્રિતઃ ॥ ૩૧॥

માર્કણ્ડેયો હ્યગસ્ત્યાદ્યાઃ ક્રોધયુક્તા મહર્ષયઃ ।
યજ્ઞોઽયં નાવલોક્યો વૈ વેદબાહ્યક્રિયાત્મકઃ ॥ ૩૨॥

(Page ખં. ૧ અ. ૩ પાન ૭)
વિષ્ણુનાન્યે તતઃ સર્વે સાન્ત્વિતાઃ સંસ્થિતાઃ પદે ।
દેવતા મુનયો વર્ણા દ્રષ્ટું યજ્ઞં પ્રહર્ષિતાઃ ॥ ૩૩॥

ભૃગ્વાદિમુનિભિસ્તત્ર યજ્ઞારમ્ભઃ કૃતોઽભવત્ ।
યથાવિધિ યથાભાગં દેવાસ્તત્રાશ્રિતા મખે ॥ ૩૪॥

દક્ષો હૃષ્ટોઽભવત્ તત્ર યજમાનઃ સુમન્દધીઃ ।
વેદકલ્પાનુસારેણ મુનયસ્તન્વિરે મખમ્ ॥ ૩૫॥

એતસ્મિન્નન્તરે તત્ર કૈલાસે નારદો ગતઃ ।
શિવયા સહ શમ્ભું ચ પ્રણતોઽભૂત્સ ભાવિકઃ ॥ ૩૬॥

સતીં પ્રતિ પ્રહસ્યાહ નારદઃ કલહપ્રિયઃ ।
દેવિ દક્ષાધ્વરે કસ્માદ્ ગમનં ન કૃતં ત્વયા ॥ ૩૭॥

હૃષ્ટપુષ્ટજનાઃ સર્વે મહોત્સવસુમોદિતાઃ ।

ભગિન્યસ્તત્ર તે રેજુઃ પતિભિઃ સહ મોદિતાઃ ॥ ૩૮॥

પિતૃભર્તૃગૃહે સ્ત્રીણાં માનામાનં ન વિદ્યતે ।
ઇત્યુક્ત્વા નારદસ્તસ્માત્પ્રયયૌ કૌતુકી મુનિઃ ॥ ૩૯॥

ગતે મુનૌ સતી તત્ર માનસે દુઃખિતા ભૃશમ્ ।
શઙ્કરં પ્રણિપત્યાહ હૃદયેન વિદૂયતા ॥ ૪૦॥

નીલકણ્ઠ નમસ્તુભ્યં શઙ્કરાય શિવાય ચ ।
સગુણાય મૃડાયૈવ નિર્ગુણાય નમો નમઃ ॥ ૪૧॥

ગન્તુમિચ્છા ત્વયા સાર્ધમસ્તિ મે દક્ષમન્દિરે ।
તત્ર યજ્ઞોત્સવો નાથ પ્રસીદ પ્રાર્થયે વિભો ॥ ૪૨॥

એવં શ્રુત્વા ભારતીં તાં સતી શમ્ભુઃ સુબોધયન્ ।
સ્મયમાનશ્ચ તામૂચે કિમિદં ભાષસે પ્રિયે ॥ ૪૩॥

મદ્દ્વેષી જનકો દક્ષસ્તવ તેન નિમન્ત્રિતઃ ।
નાહં તસ્માન્ન ગન્તવ્યં વિપરીતં ભવિષ્યતિ ॥ ૪૪॥

ભવતી ચ મહામાયા માયિકોઽહં ન સંશયઃ ।
સૃજ ત્વં મુનિદેવાદીનત્ર યજ્ઞં કરોમ્યહમ્ ॥ ૪૫॥

શ્રુત્વા શમ્ભુવચો રમ્યં હૃદયેન વિદૂયતા ।
ઉવાચ દુઃખિતા દેવી મમાજ્ઞાં દેહિ શઙ્કર ॥ ૪૬॥

ન કિઞ્ચિદુક્તવાન્ શમ્ભુસ્તદા દેવી પિતુર્ગૃહે ।
ન પ્રયોજનમાજ્ઞાયા વિચાર્યૈવં જગામ ચ ॥ ૪૭॥

એતજ્જ્ઞાત્વા મહાઽઽશ્ચર્યં વિસ્મિતેન શિવેન ચ ।
ભાવિ યદ્ભવિતા તદ્વૈ વિમાનં પ્રેષિતં વરમ્ ॥ ૪૮॥

વિમાનમાસ્થાય શક્તિરાજગામ વિહાયસા ।
પિતુર્ગૃહં મહાભાગા માનિતા સર્વબન્ધુભિઃ ॥ ૪૯॥

માત્રા પિત્રા સ્વસૃભિસ્તુ સત્કૃતા હર્ષિતાત્મભિઃ ।
દક્ષસ્તત્ર પ્રમોદેન જગાદ તનયાં પ્રતિ ॥ ૫૦॥

આગતા ત્વં મહાભાગે યજ્ઞોઽયં શોભિતસ્ત્વયા ।
શ્રુત્વા પિતૃવચો રમ્યં તં સા પ્રોવાચ દુઃખિતા ॥ ૫૧॥

સત્યુવાચ ।
શોભયામિ કથં યજ્ઞં નાહૂતા ભવતાત્ર ભોઃ ।
અનાહૂતાઽગતા ચાહં ત્વદીયે યજનાલયે ॥ ૫૨॥

તતઃ સ કુપિતો દક્ષ ઉવાચ શ‍ૃણુ પુત્રિકે ।
મદીયો બહુલો દોષસ્તેન ત્વાં દત્તવાન્ભ્રમાત્ ॥ ૫૩॥

પિશાચભૂતરાજાય પિત્રા મે કથિતં કૃતમ્ ।
વર્ણાશ્રમવિહીનાય વૃથેશ્વરપદાય ચ ॥ ૫૪॥

તસ્ય દોષેણ દેવિ ત્વં નાહૂતા યજ્ઞકર્મણિ ।
સ્વાગતં તે તથાપ્યદ્ય તિષ્ઠ ત્વં મત્સમીપગા ॥ ૫૫॥

સૂત ઉવાચ ।
પિતુર્વચનમાકર્ણ્ય શિવનિન્દાયુતં મહત્ ।
ક્રોધસન્તપ્તગાત્રા સા પશ્યન્તી યજ્ઞમન્દિરમ્ ॥ ૫૬॥

અરુદ્રભાગસંયુક્તં યજ્ઞં દૃષ્ટ્વા ચુકોપ હ ।
ઉવાચ કિં કૃતં તાત વેદબાહ્યક્રિયાત્મકઃ ॥ ૫૭॥

રુદ્રભાગવિહીનોઽયં યજ્ઞો નૈવ ફલપ્રદઃ ।
શિવનિન્દાં કરોષિ ત્વં હ્યશિવોઽસિ ન સંશયઃ ॥ ૫૮॥

(Page ખં. ૧ અ. ૪ પાન ૮)
શિવેતિ દ્વ્યક્ષરં બ્રહ્મ નિર્ગુણં ગુણધારણમ્ ।
ન જાનાસિ યતસ્ત્વં ભોસ્તેનાહં દુઃખિતા ભૃશમ્ ॥ ૫૯॥

તવ દેહાત સમુદ્ભૂતો મમ દેહસ્ત્વયં પિતઃ ।
ન યોગ્યઃ શિવનિન્દાયાઃ કારણાત્ તં ત્યજામ્યહમ્ ॥ ૬૦॥

ઇત્યુક્ત્વા સા હૃદિ ધ્યાને નીત્વા તં શઙ્કરં પ્રભુમ્ ।
યોગાગ્નિના સમુજ્જ્વાલ્ય દેહં ધામ્નિ ગતાઽભવત્ ॥ ૬૧॥

પુનઃ સ્વમાયયા દેવી હિમાચલસુતાઽભવત્ ।
શિવધ્યાનપરા સાક્ષાત્તં લેભે સા પુનઃ પતિમ્ ॥ ૬૨॥

તપસ્તપ્ત્વા સુતીવ્રં યત્તેન ચાત્મવશેન સા ।
લેભે મુદં શિવેનાપિ પાર્વતી પ્રેમવિહ્વલા ॥ ૬૩॥

॥ ॐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે

પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે પાર્વતીદેહત્યાગો નામ તૃતીયોઽધ્યાયઃ ॥ ૧.૩

## ૧.૪ દક્ષચરિતં નામ ચતુર્થોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
કૈલાસશિખરે રમ્યે શિવશ્ચિન્તાપરોઽભવત્ ।
અનાહૂતા ગતા દેવી દ્વિટ્ગૃહે કિં ભવિષ્યતિ ॥ ૧॥

વટમૂલે સમાસીનો નન્દિકેશાદિભિર્વૃતઃ ।
યોગિભિઃ સેવિતસ્તત્ર કથા નાના પ્રવર્તયન્ ॥ ૨॥

નાનાઽપશકુનં તત્ર બભૂવાતિભયાનકમ્ ।
સ્તુતિભિસ્તેન સર્વે તે ઉત્પાતાશઙ્કયા ભૃશમ્ ॥ ૩॥

એતસ્મિન્નતરે તત્ર નારદો મુનિરાયયૌ ।
તં પ્રણમ્ય સ્થિતો યોગી શિવં કલ્યાણદં પરમ્ ॥ ૪॥

કથાવસરમાસાદ્ય પ્રોવાચ કઠિનં વચઃ ।
ધન્યા સતી ત્રિભુવને ન સમા કામિની તયા ॥ ૫॥

સતીત્યેવ ચ યન્નામ કૃતં તત્સાર્થકં પરમ્ ।
શિવનિન્દાં સમાકર્ણ્ય તૃણવજ્જ્વલિતં વપુઃ ॥ ૬॥

નારદસ્ય વચઃ શ્રુત્વા વજ્રસારમયોપમમ્ ।
ઉવાચ તમૃષિં શમ્ભુઃ કિં નુ દેવી મૃતા મુને ॥ ૭॥

ન કિઞ્ચિદુક્તવાંસ્તત્ર શમ્ભુક્રોધભયાકુલઃ ।
શોકાગ્નિર્માં દહેત્કિં વા તતો દેવોઽન્વબુધ્યત ॥ ૮॥

શોકસાગરમગ્નોઽભૂત્કિં માં ત્યક્ત્વા ગતા શિવા ।
શક્તિહીનઃ કૃતોઽહં વૈ હ્યશક્ત સર્વકર્મણિ ॥ ૯॥

નિઃશ્વાસપરમોપ્યાસીદર્ધમઙ્ગં ગતં ત્વિતિ ।
જીવિતેન ચ કિં કાર્યં દેહત્યાગં કરોમ્યહમ્ ॥ ૧૦॥

યોગિભિ સાન્ત્વિતો દેવો ન કિઞ્ચિત્સુખવાનભૂત્ ।
શિવશ્ચિન્તાપરો ભૂત્વા વિચારં કૃતવાન્ હૃદિ ॥ ૧૧॥

અહો વિઘ્નાકુલોઽહં વૈ કૃતો વિઘ્નકરેણ ચ ।

ગર્વિતઃ પરમૈશ્વર્યાત્કૃતં ગર્વસ્ય ખણ્ડનમ્ ॥ ૧૨॥

અતુલા શક્તિરર્ધાઙ્ગે જગન્માતાઽસ્તિ મે સદા ।
અર્ધનારીશ્વરોઽહં ચ ન વિયોગો મમ ક્વચિત્ ॥ ૧૩॥

શક્તિયુક્તતયા નિત્યં શક્તોઽહં પ્રભુરીશ્વરઃ ।
અખણ્ડૈશ્વર્યમોહેન વિઘ્નરાજં ચ નામસ્મરમ્ ॥ ૧૪॥

(Page ખં. ૧ અ. ૪ પાન ૯)
ઇતિ ગત્વા સ્વયં શમ્ભુર્મનસા ગણપં ભજન્ ।
ભક્ત્યૈકચેતસા ચૈવ ધ્યાત્વા રૂપમનુત્તમમ્ ॥ ૧૫॥

ચતુર્ભુજં મહાકાયં ગજવક્ત્રં મહોદરમ્ ।
મુકુટેન વિરાજન્તં કર્ણકુણ્ડલધારિણમ્ ॥ ૧૬॥

રત્નમાલાધરં પૂર્ણં નાભિશેષવિભૂષિતમ્ ।
કિઙ્કિણીકાયુક્તપાદં ક્વણચ્ચરણનૂપુરમ્ ॥ ૧૭॥

સિદ્ધિબુદ્ધિયુતં ચિન્તામણિભૂષિતવક્ષસમ્ ।
એકચિત્તેન ચ ધ્યાત્વાઽસાધયત્તં સમાધિના ॥ ૧૮॥

તુષ્ટાવ વિવિધૈર્વાક્યૈર્ગણેશં બ્રહ્મરૂપિણમ્ ।
નિરાકારં ચ સાકારં વિઘ્નરાજં હૃદિ સ્થિતમ્ ॥ ૧૯॥

શિવ ઉવાચ ।
નમસ્તે વિઘ્નરાજાય નમસ્તે વિઘ્નહારિણે ।
વિઘ્નકર્ત્રે ગણેશાય વિઘ્નાનાં પતયે નમઃ ॥ ૨૦॥

લમ્બોદરાય સર્વાય વક્રતુણ્ડસ્વરૂપિણે ।
ત્રૈગુણ્યેન જગદ્રૂપનાનાભેદપ્રધારિણે ॥ ૨૧॥

નૈર્ગુણ્યેન ચ વૈ સાક્ષાદ્ બ્રહ્મરૂપધરાય ચ ।
નમો નમો બન્ધહન્ત્રે ભક્તાનાં પાલકાય તે ॥ ૨૨॥

અભક્તેભ્યસ્તમોદાય નાનાભયકરાય ચ ।
હેરમ્બાય નમસ્તુભ્યં વેદવેદ્યાય શાશ્વતે ॥ ૨૩॥

અનન્તાનનરૂપાયાનન્તબાહ્વઙ્ઘ્રિકાય તે ।
અનન્તકરકર્ણાયાનન્તોદરધરાય તે ॥ ૨૪॥

નમો નમસ્તે ગણનાયકાય તે અનાદિપૂજ્યાય ચ સર્વરૂપિણે ।

અખણ્ડલીલાકરપૂર્ણમૂર્તયે મહોત્કટાયાસ્તુ નમો મહાત્મને ॥ ૨૫॥

આદૌ ચ નિર્માય વિધિં રજોમયં તેનૈવ સૃષ્ટિં વિદધાસિ દેવ ।
સત્ત્વાત્મકં વિષ્ણુમથો હિ મધ્યે નિર્માય પાસિ ત્વમખણ્ડવિક્રમ ॥ ૨૬॥

અન્તે તમોરૂપિણમેવ સૃષ્ટ્વા શમ્ભુ સ્વશક્ત્યા હરસિ ત્વમાદ્ય ।
એવંવિધં ત્વાં પ્રવદન્તિ વેદાઃ તં વૈ ગણેશં શરણં પ્રપદ્યે ॥ ૨૭॥

માયામયં વૈ ગુણપં તુ સૃષ્ટ્વા તસ્માત્પુરસ્ત્વં ગણરાજ ચાદૌ ।
સ્વાનન્દસંજ્ઞે નગરે વિભાસિ સિદ્ધ્યા ચ બુદ્ધ્યા સહિતઃ પરેશ ॥ ૨૮॥

તં ત્વાં ગણેશં શરણં પ્રપદ્યે સ્થિતં સદા હૃત્સુ ચ યોગિનાં વૈ ।
વેદૈર્ન વેદ્યં મનસા ન લભ્યં તં વક્રતુણ્ડં હૃદિ ચિન્તયામિ ॥ ૨૯॥

અર્ધનારીશ્વરત્વં યત્તદ્ગતં મેઽધુના પ્રભો ।
શક્તિહીનત્વમાપન્નો નષ્ટવત્કર્મણા કૃતઃ ॥ ૩૦॥

નાનૈશ્વર્યયુતા દેવી સા ગતા ગણપ પ્રભો ।
અનીશ્વરપદં પ્રાપ્તં મમ વૈ દેવદેવ ભોઃ ॥ ૩૧॥

નિર્ગુણોઽહં સદા શમ્ભુઃ સગુણઃ સર્વભાવવિત્ ।
શક્ત્યા યુક્તો યદા સ્વામિન્નધુના કિં કરોમ્યહમ્ ॥ ૩૨॥

શક્તિહીનઃ પદા ગન્તું ન શક્નોમિ ગણેશ્વર ।
અતસ્ત્વં કૃપયા દેવ શક્તં માં કુરુ કર્મણિ ॥ ૩૩॥

તતઃ પ્રાદુરભૂત્તસ્ય પુરતઃ સ ગણાધિપઃ ।
ઉવાચ શઙ્કરં તત્ર હર્ષયન્ શ્લક્ષ્ણયા ગિરા ॥ ૩૪॥

અહો પશ્ય ચ માં શમ્ભો કિં શોચસિ મહેશ્વર ।
ભવિતાસિ સશક્તિસ્ત્વં મદ્વાક્યાન્નાત્ર સંશયઃ ॥ ૩૫॥

અહમેવેશ્વરો દેવો હ્યેકો બ્રહ્માણ્ડમણ્ડલે ।
તેન ગર્વેણ યુક્તસ્ત્વં સ વિઘ્નઃ સહસા કૃતઃ ॥ ૩૬॥

અધુના તે ગતો મોહો મદીયા સ્મૃતિરાગતા ।
ધ્યાતસ્તુતશ્ચ તેનાઽહં પ્રસન્નોઽસ્મિ ન સંશયઃ ॥ ૩૭॥

હિમાચલસુતા દેવી ભવિષ્યતિ ન સંશયઃ ।
વૃણોષિ ત્વં સતીં તાં વૈ પાર્વતીં ચ પુનઃ શિવ ॥ ૩૮॥

(Page  ખં. ૧ અ. ૪ પાન ૧૦)
રમસે ચ તયા સાર્ધં મદ્ભક્ત્યા ભાવિતો દૃઢમ્ ।
ઈશ્વરઃ સહશક્તિસ્ત્વં મત્પ્રસાદાત્સદા ભવ ॥ ૩૯॥

સ્મૃતમાત્રસ્તવાગ્રેઽહં પ્રત્યક્ષઃ સ્યાં સદાશિવ ।
ઇતિ દત્ત્વા વરં દેવસ્તત્રૈવાન્તરધીયત ॥ ૪૦॥

તતશ્ચ શઙ્કરઃ ક્ષુબ્ધઃ શક્તો જાતઃ સ્વકર્મણિ ।
જટામાસ્ફાલયામાસ ગણેશં મનસા સ્મરન્ ॥ ૪૧॥

તસ્માજ્જાતો મહાબાહુર્વીરભદ્રસ્ત્રિમસ્તકઃ ।
ત્રિપદઃ શૂલવાન્ સાક્ષાન્મૃત્યુરૂપો મહાદ્યુતિઃ ॥ ૪૨॥

શઙ્કર પ્રણનામાથ પ્રાઞ્જલિઃ સન્પુરઃ સ્થિતઃ ।
આજ્ઞાં કુરુ મહાદેવ દાસોઽહં તે વશે સ્થિતઃ ॥ ૪૩॥

વચનં તસ્ય સંશ્રુત્ય પ્રહૃષ્ટઃ શઙ્કરોઽબ્રવીત્ ।
સયજ્ઞસ્ય ચ દક્ષસ્ય હરણં કુરુ સામ્પ્રતમ્ ॥ ૪૪॥

તદાજ્ઞાં શિરસા ધૃત્વા અટ્ટહાસમથાકરોત્ ।
તેન ત્રિભુવનં સર્વં કમ્પિતં ભયવિહ્વલમ્ ॥ ૪૫॥

તતો નિર્ગમ્ય વેગેન શરીરાન્નિર્મમે મહાન્ ।
નાનારુદ્રાનપારાંશ્ચ તૈર્વૃતઃ સ ગતો મખમ્ ॥ ૪૬॥

તમન્વયુર્ગણાઃ શમ્ભોર્નન્દિકેશાદયોઽપરે ।
ક્ષુભિતાઃ ક્રોધસંયુક્તા બ્રહ્માણ્ડાશનસન્નિભાઃ ॥ ૪૭॥

દુર્નિમિત્તાનિ સર્વાણિ દક્ષગેહેઽભવંસ્તદા ।
શઙ્કિતા મુનયો દેવાઃ કિં ભવેદિતિ વિહ્વલાઃ ॥ ૪૮॥

એતસ્મિન્નન્તરે તત્ર દક્ષયજ્ઞે મહાબલઃ ।
આજગામાવૃતો રુદ્રૈર્વીરભદ્રો ભયાનકઃ ॥ ૪૯॥

નન્દી ભૃઙ્ગરિટિર્ભૃઙ્ગી પુષ્પદન્તમુખાસ્તથા ।
આગતાઃ ક્રોધદીપ્તાસ્યા ભક્ષયન્તો યથાન્તકાઃ ॥ ૫૦॥

સહસા વેગતઃ સર્વે મારયન્ત ઇતસ્તતઃ ।
પલાયન્ત ચ દિક્પ્રાન્તે દક્ષસ્યાનુચરાસ્તદા ॥ ૫૧॥

યજ્ઞમણ્ડપમાસાદ્ય બભઞ્જુસ્તત્ક્ષણેન ચ ।

દેવાન્ સર્વાન્ મુનીંશ્ચૈવ પીડયન્તઃ સુદારુણાઃ ॥ ૫૨॥

ઋષિપત્નીર્દધુસ્તત્ર દેવપત્નીઃ સહસ્રશઃ ।
અતાડયન્મહાવીર્યા હાહાકારાઃ પ્રવર્તિતાઃ ॥ ૫૩॥

કથં ત્વસાધુપતયો ભવતીભિર્વૃતાઃ ખલુ ।
શિવદ્વેષકરા દુષ્ટાસ્તસ્ય પ્રાપ્તં મહત્ફલમ્ ॥ ૫૪॥

એવમૂચુર્હવિદ્રવ્યં બભક્ષુસ્તે પ્રહર્ષિતાઃ ।
વેદિકાયાં પ્રચક્રુસ્તે વિટ્સર્ગં મૂત્રણં તથા ॥ ૫૫॥

જગામ ભગવાંસ્તત્ર શઙ્કરઃ ક્રોધસંયુતઃ ।
ધનુર્બાણધરઃ સાક્ષાત્પ્રલયાગ્નિરિવોત્થિતઃ ॥ ૫૬॥

તત્ર યુદ્ધમભૂદ્ ઘોરં દેવાનાં રુદ્રચારિણામ્ ।
સ્વયં ચ યુયુધે શમ્ભુઃ શસ્ત્રાસ્ત્રૈર્મર્મભેદિભિઃ ॥ ૫૭॥

પૂષ્ણો દન્તાંશ્ચ નારાચૈર્ભેદયામાસ શઙ્કરઃ ।
ભગસ્ય નેત્રમુન્મૂલ્ય પાટયામાસ સંયુગે ॥ ૫૮॥

ધર્મં ધૃત્વા મહાવીરો નન્દિકેશોઽબ્રવીત્તદા ।
કો ધર્મો વદ રે દુષ્ટ શિવહીને મખે ખલ ॥ ૫૯॥

કશ્યપં ધૃતવાંસ્તત્ર ભૃઙ્ગી તેજસ્વિનાં વરઃ ।
વરુણં તાડયામાસ પુષ્પદન્તશ્ચ વીર્યવાન્ ॥ ૬૦॥

ભૈરવેણ ધૃતસ્તત્ર દેવેન્દ્રો મૂર્છિતઃ કૃતઃ ।
વીરભદ્રો બલાદ્દક્ષં પાતયામાસ ભૂતલે ॥ ૬૧॥

એવં પ્રમથિતે યજ્ઞે શઙ્ખચક્રગદાધરઃ ।
યુયુધે વિષ્ણુરવ્યગ્રો મહાબલસમન્વિતઃ ॥ ૬૨॥

શસ્ત્રાસ્ત્રૈર્બહુભિસ્તેન મર્દિતા બલવત્તરાઃ ।
રુદ્રા ભૂતપિશાચાદ્યા હાહાકારં પ્રચક્રિરે ॥ ૬૩॥

તં દૃષ્ટ્વા સહસા શમ્ભુર્હૃદિ ધ્યાત્વા ગણાધિપમ્ ।
બાણૈસ્તં હૃદિ સંવિધ્ય પાતયામાસ ભૂતલે ॥ ૬૪॥

પુનઃ સંજ્ઞાં સમાસાદ્ય સ્વાસ્ત્રં નારાયણાત્મકમ્ ।
(Page ખં. ૧ અ. ૪ પાન ૧૧)
મોચયામાસ ગોવિન્દો જગત્સંહારકારકમ્ ॥ ૬૫॥

તતઃ શમ્ભુર્મુમોચાપિ સ્વાસ્ત્રં પાશુપતં મહત્ ।
તે ઉભે વ્યોમ્નિ ચાત્યન્તં યુયુધાતે પરસ્પરમ્ ॥ ૬૬॥

તસ્માજ્જાતો મહાનગ્નિર્દદાહ પૃથિવીમિમામ્ ।
ભયક્રાન્તં ત્રિભુવનં જાતં તત્ર મૃતોપમમ્ ॥ ૬૭॥

એતસ્મિન્સમયે તત્ર વીરભદ્રેણ કલ્પિતમ્ ।
પશુરૂપં શિરશ્છિત્વા દક્ષસ્યાગ્નૌ હુતં તતઃ ॥ ૬૮॥

રુદ્રૈર્નાનાવિધૈઃ કોલાહલસ્તત્ર પ્રવર્તિતઃ ।
છિન્નભિન્નાઃ સુરા જાતાસ્ત્રાતારં લેભિરે ન તે ॥ ૬૯॥

મુનયોઽપિભયોદ્વિગ્ના વ્યદ્રવંસ્તુ દિશો દશ ।
પિશાચાદિભિરાકૃષ્ટાશ્ચક્રુશુશ્ચાતિદારુણમ્ ॥ ૭૦॥

વિષ્ણુના તત્ર ચક્રં વૈ ભ્રામિતં ક્રોધધારિણા ।
કૃતાન્તસદૃશં મુક્તં શમ્ભોઃ સન્નિધિમાગતમ્ ॥ ૭૧॥

ચક્રં તચ્છઙ્કરં દૃષ્ટ્વા તં નત્વા તત્ર સંસ્થિતમ્ ।
તેન ક્રોધપરીતાઙ્ગઃ શિવઃ શૂલં સમાદદે ॥ ૭૨॥

શૂલમુદ્યમ્ય તં વિષ્ણું હન્તું યાવત્પ્રવર્તતે ।
તત્રાકાશોદ્ભવા વાણી વારયામાસ શઙ્કરમ્ ॥ ૭૩॥

ન હન્તવ્યો હરિઃ શમ્ભો ત્વયા પાલ્યોઽયમચ્યુત ।
જહિ કોપં મહાદેવ શિવાય સતતં નમઃ ॥ ૭૪॥

તત્રાજગામ સહસા સ્વયમ્ભૂસ્તં ન્યષેધયત્ ।
મા કુરુષ્વ વધં શમ્ભો વિષ્ણોઃ સંહારકારક ॥ ૭૫॥

નમઃ શિવાય શાન્તાય શૂલિને શમ્ભવે નમઃ ।
મહાદેવાય રુદ્રાય પશૂનાં પતયે નમઃ ॥ ૭૬॥

સંહારરૂપી ત્વં સાક્ષાદકાલે કિં પ્રવર્તસે ।
જહિ કોપં મહાબાહો નમસ્તે પરમેશ્વર ॥ ૭૭॥

બ્રહ્મણા સંસ્તુતો દેવઃ પ્રશાન્તોઽભૂન્મહામુને ।
તસ્મિન્કાલે સ્વયં વિષ્ણુર્બ્રહ્મણા જ્ઞાપિતઃ પ્રભુઃ ॥ ૭૮॥

શિવાય નમનં કૃત્વા સ્થિતઃ સંલજ્જિતો ભૃશમ્ ।

પ્રોવાચ મધુરં બ્રહ્મા શઙ્કરં વૃષભધ્વજમ્ ॥ ૭૯॥

શાન્ત ઉર્વરિતં યજ્ઞે હવિર્દ્રવ્યં ચ યત્પ્રભો ।
રુદ્રભાગઃ સ વિજ્ઞેયો ગૃહાણ ત્વં સદાશિવ ॥ ૮૦॥

વિઘ્નેશમાયયા ભ્રાન્તા દક્ષાદ્યાઃ સતતં શિવ ।
મોહિતાનાં વિશેષેણ દ્રષ્ટવ્યં ન પ્રચેષ્ટિતમ્ ॥ ૮૧॥

અતસ્ત્વં કૃપયા દેવ પ્રસન્નો ભવ શઙ્કર ।
સર્વેભ્યઃ સુખદાતા વૈ યજ્ઞં તં પુનરારભ ॥ ૮૨॥

દેવાનાં ચ મુનીનાં ચ સ્ત્રીણાં દાસાદિજીવિનામ્ ।
યથાપૂર્વં સ્થિતં રૂપં તાદૃશં કુરુ શઙ્કર ॥ ૮૩॥

ભગઃ સ નેત્રસંયુક્તઃ પૂષા વૈ પિષ્ટભુક્ કૃતઃ ।
દેવાશ્ચ મુનયઃ સર્વે સ્ત્રિયો દાસાદયસ્તથા ॥ ૮૪॥

યથાપૂર્વં કૃતાસ્તેન યુક્તા રૂપેણ તેજસા ।
ગતદુઃખાશ્ચ સર્વે તે વવન્દુઃ શઙ્કરં પુનઃ ॥ ૮૫॥

દક્ષસ્ય મસ્તકં તત્ર દગ્ધં વૈ જાતવેદસિ ।
તજ્જ્ઞાત્વા શઙ્કરો દેવો ભૃઙ્ગિણં પ્રત્યુવાચ હ ॥ ૮૬॥

ગચ્છ ચાનય તં હત્વા ય આદૌ દૃશ્યતે ત્વયા ।
તસ્ય મસ્તકમેતત્તુ ભવેદ્ દક્ષસ્ય મસ્તકમ્ ॥ ૮૭॥

તદા તેન પુરો દૃષ્ટો હ્યજઃ પરમશોભિતઃ ।
તં હત્વા તચ્છિરસ્તત્ર સમાનીતં ચ ભૃઙ્ગિણા ॥ ૮૮॥

તદેવ યોજયિત્વા તમજીવયત શઙ્કરઃ ।
સ સદ્ય ઉત્થિતસ્તત્ર દક્ષોઽજમુખતાં ગતઃ ॥ ૮૯॥

બ્રહ્મણા પ્રેરિતો દક્ષઃ પુનસ્તુષ્ટાવ શઙ્કરમ્ ।
ગતમાનો મહાબાહુઃ ભક્ત્યા સર્વેશ્વરં તતઃ ॥ ૯૦॥

(Page ખં. ૧ અ. ૪ પાન ૧૨)

દક્ષ ઉવાચ ।
નમામિ શઙ્કર સાક્ષાદ્યદાધારમિદં જગત્ ।
કાલરૂપં યથાકાલં બોધયામાસ તં શિવમ્ ॥ ૯૧॥

કાલેન ફલમૂલાનિ જાયન્તેઽન્નાદિકાનિ ચ ।

શીતોષ્ણસમભાવશ્ચ સદા કાલેન જાયતે ॥ ૯૨॥

સૂર્યસ્તપતિ કાલેન જ્યોતિષાં ગણ એવ ચ ।
કાલેન જાયતે વૃષ્ટિરનાવૃષ્ટિસ્તથા વિભો ॥ ૯૩॥

કાલેન સૃજ્યતે સૃષ્ટિર્બ્રહ્મણા વૈ પુનઃ પુનઃ ।
કાલેન પાલનં તત્ર કુરુતે વિષ્ણુરવ્યયઃ ॥ ૯૪॥

કાલેન સ્વેચ્છયા શમ્ભુઃ સંહારં પ્રકરોતિ ચ ।
યત્કિઞ્ચિદિહ તત્સર્વં કાલાધીનં ન સંશયઃ ॥ ૯૫॥

સ એવ કાલો ભગવાનીશ્વરો બ્રહ્મસંજ્ઞિતઃ ।
શિવઃ સાક્ષાચ્ચ વેદેષુ કથ્યતે વેદવાદિભિઃ ॥ ૯૬॥

ક્ષમસ્વ મેઽપરાધં ત્વં ત્વન્માયાગર્વિતસ્ય ચ ।
યત્કૃતં તદ્દયાસિન્ધો નમસ્તે પરમેશ્વર ॥ ૯૭॥

સગુણાય નમસ્તુભ્યં નિર્ગુણાય નમો નમઃ ।
સૃષ્ટિકર્ત્રે ચ સંહર્ત્રે પાત્રે નાનાસ્વરૂપિણે ॥ ૯૮॥

અનન્તગુણરાશિસ્ત્વં વર્ણનીયં કિમપ્યહો ।
નાન્તં બ્રહ્માદયો જગ્મુર્માદૃશાનાં ચ કા કથા ॥ ૯૯॥

નમો નમો બ્રહ્મમયાય દેવાદયે શિવાયાથ ચ પૂર્ણમૂર્તે ।
અનાદિમધ્યાન્તવિહીન ભૂમ્ને નમો નમો ભક્તભયાપહન્ત્રે ॥ ૧૦૦॥

ઇત્યેવં સ્તુવતસ્તત્ર પ્રેમગદ્ગદયા ગિરા ।
અજવત્તસ્ય સઞ્જાતં ભાષણં લલલલ્લલમ્ ॥ ૧૦૧॥

તેન હૃષ્ટો મહાદેવસ્તં પુનર્નરમસ્તકમ્ ।
ભગવાન્ કારયામાસ યથાપૂર્વં મુનીશ્વરાઃ ॥ ૧૦૨॥

પ્રોવાચ મધુરં વાક્યં શિવસ્તં સર્વસન્નિધૌ ।
પ્રજાપતિપતિર્દક્ષ સર્વમાન્યો ભવિષ્યસિ ॥ ૧૦૩॥

ત્વયા યદ્રચિતં સ્તોત્રં મદીયં મત્પ્રિયં ભવેત્ ।
યસ્તોષ્યતિ પ્રદાસ્યામિ તસ્મૈ કામમનેન મામ્ ॥ ૧૦૪॥

ઇહ ભુક્ત્વાઽખિલાન્ભોગાનન્તે મલ્લોકમાપ્નુયાત્ ।
મમ પ્રીતિકરશ્ચાસૌ ભવિષ્યતિ ન સંશયઃ ॥ ૧૦૫॥

ત્વયા યદજવદ્વાક્યં કૃતં મે ખલુ સન્નિધૌ ।
તદ્વધો મત્સમીપે વૈ કરિષ્યતિ નરઃ સકૃત્ ॥ ૧૦૬॥

તેન હૃષ્ટો ભવિષ્યામિ વાઞ્છિતં પૂરયામિ ચ ।
એવં દત્ત્વા વરં શમ્ભુસ્તત્રૈવાન્તરધીયત ॥ ૧૦૭॥

સર્વે સ્વસ્વસ્થલં જગ્મુર્હર્ષિતા ધર્ષિતાસ્તથા ।
દક્ષશ્ચ સ્વગૃહે વિપ્રા દુઃખિતઃ સ્થિતવાન્ સ્વયમ્ ॥ ૧૦૮॥

તદાદિ શિવભક્તા યે તે કુર્વન્તિ શિવાલયે ।
અજવન્નિનદં તેન હૃષ્ટો ભવતિ શઙ્કરઃ ॥ ૧૦૯॥

ઇતિ સર્વં સમાખ્યાતં દક્ષશાપાદિકં ચ યત્ ।
યજ્ઞભઙ્ગસ્ય હેતું ચ પુનઃ કિં શ્રોતુમિચ્છથ ॥ ૧૧૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે દક્ષચરિતં નામ ચતુર્થોઽધ્યાયઃ ॥ ૧.૪
(Page  ખં. ૧ અ. ૫ પાન ૧૩)

## ૧.૫ પાર્વતીપ્રશ્નવિચારો નામ પઞ્ચમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ।
શૌનક ઉવાચ ।
શ્રુતં દક્ષસ્ય ચરિતં યજ્ઞધ્વંસાદિકં મહત્ ।
મુદ્ગલસ્ય ચ દક્ષસ્ય સંવાદં કથયસ્વ ભોઃ ॥ ૧॥

સૂત ઉવાચ ।
શ઼ૃણુ શૌનક સંવાદં દક્ષમુદ્ગલસમ્ભવમ્ ।
બ્રહ્મભૂયકરં પૂર્ણં ભાવેન ચ શ્રુતં હૃદિ ॥ ૨॥

દક્ષપ્રશ્નં પરં ધૃત્વા મુદ્ગલો ગણપપ્રિયઃ ।
તં પ્રત્યુવાચ ભાવેન મહર્ષિર્યોગિનાં વરઃ ॥ ૩॥

મુદ્ગલ ઉવાચ ।
સર્વેષાં ગણપો માતા પિતા ચૈવ ન સંશયઃ ।
તેન સર્વાદિપૂજ્યોઽયં સર્વપૂજ્યઃ સ દેવરાટ્ ॥ ૪॥

જ્યેષ્ઠરાજેતિ યદ્વાક્યં વેદેન પ્રતિપાદિતમ્ ।

જ્યેષ્ઠં ભાવાચ્ચ તસ્યાપિ જ્ઞાતવ્યં સર્વસમ્મતમ્ ॥ ૫॥

તસ્ય સર્વે કલાંશા વૈ કલાંશાંશાશ્ચ કેચન ।
ન કલા તસ્ય સમ્પૂર્ણા જગત્યાં કુત્ર દૃશ્યતે ॥ ૬॥

વિનાયકો નામ તેન જાતોઽસૌ ભગવાન્ ખલુ ।
વિશેષેણ ચ સર્વેષાં નાયકોઽયં ગણાધિપઃ ॥ ૭॥

વિગતો નાયકો યસ્ય સ્વેચ્છાચારી વિનાયકઃ ।
સ્વાનન્દલોકવાસી ચ સ્વસુખેન પ્રભાવતઃ ॥ ૮॥

બ્રહ્મવિષ્ણુશિવાદ્યૈશ્ચ વેદૈર્યોગિભિરેવ ચ ।
સર્વૈઃ સમ્પૂજિતો દેવો ધર્મકામાર્થમુક્તયે ॥ ૯॥

અહં બ્રહ્મેતિ માહાત્મ્યાદ્ ગર્વો ભવતિ શાશ્વતઃ ।
શિવાદીનાં યદાધારાદિદં સર્વં પ્રવર્તતે ॥ ૧૦॥

તદા મદહરોઽયં વૈ તેષાં જ્ઞાનાર્થસિદ્ધયે ।
વિઘ્નકર્તા મહારાજઃ સ્વયં ભવતિ વિઘ્નપઃ ॥ ૧૧॥

પદભ્રષ્ટાઃ કૃતાસ્તેન સર્વે દેવાદયો દ્વિજાઃ ।
કિમાધારમિદં સર્વં વિચિન્વન્તિ સમાધિના ॥ ૧૨॥

તેન પશ્યન્તિ યોગેન ચેતસઃ પઞ્ચવૃત્તિભિઃ ।
તાસાં પ્રકાશકોઽયં વૈ ચિન્તામણિરિતિ સ્મૃતઃ ॥ ૧૩॥

વેદૈઃ સમ્પાદિતં જ્ઞાત્વા શરણં તં વ્રજન્તિ તે ।
તતો વિઘ્નહરો જાતસ્તેષાં સર્વાર્થદઃ સ્મૃતઃ ॥ ૧૪॥

સર્વસત્તાત્મકોઽયં વૈ વિઘ્નરાજઃ પ્રકીર્તિતઃ ।
અત એવ ગણેશાદ્ધિ પરં કિઞ્ચિન્ન વિદ્યતે ॥ ૧૫॥

સવિઘ્નસ્ત્વં પ્રજાતોઽસિ તમેવ શરણં વ્રજ ।
ચિન્તામણિં વિઘ્નહરં ગણેશં ચ વિનાયકમ્ ॥ ૧૬॥

સૂત ઉવાચ ।
પ્રજાપતિરિતિ શ્રુત્વા દક્ષો હૃષ્ટમનાઃ પુનઃ ।
પપ્રચ્છ વિનયેનૈવ કથાં પાપપ્રણાશિનીમ્ ॥ ૧૭॥

દક્ષ ઉવાચ ।
કોઽયં સ્વાનન્દવાસી વૈ કથં જ્ઞેયો ભવેન્મયા ।

વદ તત્ર વિભો માર્ગં તેન તં સતતં ભજે ॥ ૧૮॥

મુદ્ગલ ઉવાચ ।
અત્ર તે કથયિષ્યામિ ઇતિહાસં પુરાતનમ્ ।
પાર્વતીશિવસંવાદં યથા જાતં શૃણુષ્વ ભોઃ ॥ ૧૯॥

કૈલાસે ગિરિવર્યે તુ સુખાસીનં મહેશ્વરમ્ ।
પાર્વતી પ્રણતા ભૂત્વા પૃચ્છતિ સ્મ મુદાયુતા ॥ ૨૦॥

પાર્વત્યુવાચ ।
શિવ ત્વં સર્વદેવાનાં નાગાનાં રક્ષસાં તથા ।
માનવાનાં ચ સર્વેષાં પૂજ્યઃ સ્વામી ન સંશયઃ ॥ ૨૧॥

તેભ્યઃ પદપ્રદાતા ત્વં સર્વાધીશઃ પુરાતનઃ ।
માયાવિકારહીનશ્ચ શિવસ્તેન પ્રકીર્તિતઃ ॥ ૨૨॥

ત્વં કિં સમાધિના દેવ ધ્યાયસે માં વદ પ્રભો ।
ત્વત્તઃ પરતરં કિઞ્ચિન્ન દૃષ્ટં નૈવ સંશ્રુતમ્ ॥ ૨૩॥

ઇતિ પૃષ્ટો મહાદેવસ્તાં પ્રત્યૂચે ચ સાદરમ્ ।
સારં વેદાદિમાન્યં ચ બ્રહ્મભૂયકરં પરમ્ ॥ ૨૪॥

શ્રીમહાદેવ ઉવાચ ।
શૃણુ પ્રિયે પ્રવક્ષ્યામિ યં ધ્યાયામિ દિવાનિશમ્ ।
(Page ખં. ૧ અ. ૫ પાન ૧૪)
ગણેશં હૃદિ સંસ્થં મે સ્વાનન્દાવાસિનં પરમ્ ॥ ૨૫॥

સાકારં ચ નિરાકારં તસ્મિન્દેવિ ન વિદ્યતે ।
મનોવાણીવિહીનં ન મનોવાણીમયં ન વૈ ॥ ૨૬॥

શિવસ્ય વચનં શ્રુત્વા પાર્વતી પ્રેમસંયુતા ।
ઉવાચ મધુરં વાક્યં વાક્યજ્ઞા ભાવપૂર્વકમ્ ॥ ૨૭॥

પાર્વત્યુવાચ ।
કોઽસૌ ગણેશનામા વૈ કથં સ હૃદિ તિષ્ઠતિ ।
સ્વાનન્દવસતિઃ કા ચ યત્ર તિષ્ઠતિ સ પ્રભુઃ ॥ ૨૮॥

સાકારો ન નિરાકારો કથં સ જ્ઞાયતે જનૈઃ ।
મનોવાણીમયો નૈવ હીનસ્તાભ્યાં ન ચ ક્વચિત્ ॥ ૨૯॥

તસ્ય ધ્યાનં મહેશાપિ કર્તું નૈવ પ્રશક્યતે ।
ધ્યાયસે કેન માર્ગેણ ભવ મે કથય પ્રભો ॥ ૩૦॥

અહં દાસી ત્વદીયા વૈ શિષ્યભાવેન સંસ્થિતા ।
કથયસ્વ મહાદેવ ધ્યાનં ગાણેશકં મમ ॥ ૩૧॥

તમહં સાધયિષ્યામિ સાક્ષાત્કારેણ વૈ યથા ।
કૃતકૃત્યા ભવિષ્યામિ પ્રસાદાત્તે ન સંશયઃ ॥ ૩૨॥

મુદ્ગલ ઉવાચ ।
ઇતિ પૃષ્ટો મહાદેવો દેવ્યા ભક્ત્યાદરેણ ચ ।
પાત્રં ગણેશમાર્ગસ્ય દૃષ્ટ્વા પ્રેમયુતોઽબ્રવીત્ ॥ ૩૩॥

તત્તેઽહં શ ૃણુ વક્ષ્યામિ ગુહ્યાદ્ ગુહ્યતમં મહત્ ।
રહસ્યં વેદશાસ્ત્રાણાં યસ્માત્પરતરં ન ચ ॥ ૩૪॥

દક્ષ ઉવાચ ।
તવ વાક્યામૃતેનાઽહં પ્રીતો મુદ્ગલ સામ્પ્રતમ્ ।
ઉમામહેશસંવાદં યોગીન્દ્ર કથયસ્વ મે ॥ ૩૫॥

સૂત ઉવાચ ।
દક્ષસ્ય ભાવયુક્તં તદ્વચનં મુદ્ગલેન વૈ ।
શ્રુતં તેન સુસન્તુષ્ટો વક્તું સમુપચક્રમે ॥ ૩૬॥

મુદ્ગલ ઉવાચ ।
શમ્ભુઃ સ્મૃત્વા ગણેશાનં હૃદિ ધ્યાત્વા મહાયશાઃ ।
પ્રત્યુવાચ મહાદેવીં ગાણપત્યઃ પ્રતાપવાન્ ॥ ૩૭॥

શ્રીશિવ ઉવાચ ।
સર્વં માયામયં વિદ્ધિ જાયતે યચ્ચ ચેતસા ।
ચિત્તપ્રવેશહીનં ચ માયાતીતં નિગદ્યતે ॥ ૩૮॥

રચિતં દ્વિવિધં યેન સ એવ ગણનાયકઃ ।
સ્વસંવેદં મહઃ પ્રોક્તં વેદયેત્તદ્વિશેષતઃ ॥ ૩૯॥

તત્રૈવ દૃશ્યતે દેવો યોગિભિર્યોગપારગૈઃ ।
તેન સ્વાનન્દવાસી સ કથ્યતે વેદવાદિભિઃ ॥ ૪૦॥

ચિત્તસ્ય પઞ્ચભૂમીનાં પ્રકાશનકરઃ સ્મૃતઃ ।

ચિન્તામણિરિતિ ખ્યાતો હૃદિ સન્તિષ્ઠતિ પ્રભુઃ ॥ ૪૧॥

સમૂહે ગણધાતુશ્ચ તેષાં સ્વામી ગણેશ્વરઃ ।
અભેદયોગમાર્ગેણ સદા ધ્યાતું સ શક્યતે ॥ ૪૨॥

મુદ્ગલ ઉવાચ ।
શ્રુત્વા શિવવચો રમ્યં પાર્વતી વિનયાન્વિતા ।
ચકિતા પ્રત્યુવાચેદં વચનં હિતકારકમ્ ॥ ૪૩॥

પાર્વત્યુવાચ ।
ભગવન્કથિતં કૂટવચનં યોગભાવિતમ્ ।
ન બુદ્ધં તન્મયા સ્વામિંસ્તસ્માચ્ચ સુલભં વદ ॥ ૪૪॥

બ્રહ્મ માયામયં પ્રોક્તં કીદૃશં કથય પ્રભો ।
માયાહીનં કથં જ્ઞેયં વિસ્તરેણ વદસ્વ મે ॥ ૪૫॥

મુદ્ગલ ઉવાચ ।
શક્તિપ્રશ્નં ચ સંશ્રુત્ય હૃષ્ટઃ શમ્ભુઃ સુયોગવિત્ ।
સાશ્રુનેત્રઃ સરોમાઞ્ચો ભક્ત્યા જાતો મહાયશાઃ ॥ ૪૬॥

આદિમાયાં પ્રશંસન્ સન્ વક્તું તામુપચક્રમે ।
યોગમાર્ગસ્ય સિદ્ધ્યર્થં વિસ્તરેણ મહેશ્વરઃ ॥ ૪૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે પાર્વતીપ્રશ્નવિચારો નામ પઞ્ચમોઽધ્યાયઃ ॥ ૧.૫
(Page ખં. ૧ અ. ૬ પાન ૧૫)

## ૧.૬ પ્રકૃતિપુરુષવરપ્રદાનં નામ ષષ્ઠોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શૌનક ઉવાચ ।
પાર્વતીશિવસંવાદં કથયસ્વ મહામતે ।
પારાશર્યસ્ય સર્વજ્ઞ શિષ્ય સર્વાર્થતત્ત્વવિત્ ॥ ૧॥

સૂત ઉવાચ ।
મુદ્ગલેન યથા પ્રોક્તં દક્ષે વૈ શાન્તિકારકમ્ ।
શિવયોસ્તં ચ સઞ્જાતં સંવાદં કથયામિ ભોઃ ॥ ૨॥

શ્રીશિવ ઉવાચ ।
ધન્યા દેવિ મહાભાગે ત્વત્સમાન્યા ન વિદ્યતે ।
મહાપુણ્યેન તે બુદ્ધિર્ગણેશજ્ઞાનલાલસા ॥ ૩॥

કારિતોઽહં ત્વયા શક્તે સત્ સ્ત્રિયા નાત્ર સંશયઃ ।
મમૈવેદં મહદ્ભાગ્યં ગાણપત્યપ્રિયા ગૃહે ॥ ૪॥

ગણેશાય નમઃ કૃત્વા કથયામિ કથાનકમ્ ।
આદૌ માયામયં વિદ્ધિ માયાતીતં તતઃ પરમ્ ॥ ૫॥

સ્વસ્વરૂપમયં સર્વં જ્ઞાતવ્યં યોગિના સદા ।
દ્વિવિધં યોગમાર્ગેણ સાધનેન વિશેષતઃ ॥ ૬॥

આદૌ બ્રહ્મ સ્થિતં દેવિ એકાનેકાદિવર્જિતમ્ ।
સ્વતઃ પરત ઉત્થાનાત્તદેવ દ્વિવિધં બભૌ ॥ ૭॥

સ્વત ઉત્થાનકે નૈવ વિકલ્પઃ સદૃશઃ કૃતઃ ।
અહમસ્મીતિ ભાવેન બિમ્બં ભિન્નં વિનિઃસૃતમ્ ॥ ૮॥

સકલાભેદરૂપં યન્નિરાકારં સ્વભાવતઃ ।
અહમસ્મિ સદા પ્રોક્તં બ્રહ્મરૂપં ચ શાશ્વતમ્ ॥ ૯॥

તેનાપિ સ્વસ્વરૂપં તદ્ દૃષ્ટમાત્માત્મકં પરમ્ ।
કીદૃશોઽહં વિકલ્પશ્ચ કૃતો મોહેન તત્ક્ષણાત્ ॥ ૧૦॥

ચતુશ્ચતુઃ પદાર્થા યે યોગરૂપેણ સંસ્થિતાઃ ।
તેષામભેદરૂપં ચ દૃષ્ટં સર્વાત્મકં પરમ્ ॥ ૧૧॥

માયયા બિમ્બરૂપોઽયં જાતઃ સદ્યશ્ચ નામતઃ ।
માયા બિમ્બં દ્વિતીયં તત્તત્ર મોહપ્રધારણાત્ ॥ ૧૨॥

મોહધારણમાત્રેણ વિસ્મૃતં સ્વસ્વરૂપકમ્ ।
માયાસુખેપ્સુના જાતા તસ્ય દેવસ્ય તત્ક્ષણાત્ ॥ ૧૩॥

સર્વાકારા નિરાકારા માયા જાતા દ્વિધાપરા ।
બુદ્ધિરૂપા મહાભાગા તયા સર્વં પ્રબુધ્યતે ॥ ૧૪॥

નિરાકારં ચ સાકારં બુદ્ધ્યા સમ્બુધ્યતે જનૈઃ ।
બુદ્ધ્યા યદ્બુધ્યતે ક્ષેત્ર બુદ્ધિરૂપં તદેવ ચ ॥ ૧૫॥

તત્ર મોહો ચ સાકારો નિરાકારઃ સ્વયં પ્રભુઃ ।

મોહહીન ઇતિ ભ્રાન્તિર્દ્વિધા ગુણસમુત્થિતા ॥ ૧૬॥

સા સિદ્ધિર્મોહકર્ત્રી વૈ નાનાભ્રાન્તિપ્રકાશિકા ।
એકા બુદ્ધિશ્ચ સર્વત્ર તથા દ્વૈધે પ્રવર્તિતા ॥ ૧૭॥

સિધ્યા સમ્મોહિતા બુદ્ધિર્ભ્રાન્તા જાતા ચ પાર્વતી ।
સાકારમોહસંયુક્તા નિરાકારવિમોહિતા ॥ ૧૮॥

મોહધારકબુદ્ધિશ્ચ સિદ્ધિર્મોહપ્રદાયિની ।
તયોઃ પ્રકાશદાતા સ ગણેશાનોઽભવત્ સ્વયમ્ ॥ ૧૯॥

સ એવ નામતસ્તત્ર ન ગતો નિજરૂપધૃક્ ।
બિમ્બબિમ્બિપ્રભાવત્વાદ્ભાસતે તાદૃશો વૃથા ॥ ૨૦॥

સર્વાત્મકં ચ બિમ્બં યત્પરં તત્રૈવ બિમ્બિતમ્ ।
આત્મરૂપં નિરાકારં તયોઃ સંયોગિતાં ગતઃ ॥ ૨૧॥

સ એવ ગણરાજોઽયં માયાખેલકરઃ પ્રભુઃ ।
તસ્યેચ્છયા તદ્ દ્વિવિધં ચલતિ પ્રતિસૂત્રવત્ ॥ ૨૨॥

ત્રિવિધં ચૈકભાવં ચ જાતં મોહેન પાર્વતી ।
વિકલ્પઃ પ્રકૃતસ્તેન એકોઽહં સ્યાં બહુસ્ત્વિતિ ॥ ૨૩॥

વિકલ્પેન દ્વિધા ભૂતં દેહદેહિસ્વરૂપકમ્ ।
સોઽહં બ્રહ્મેતિ યત્પ્રોક્તં વેદ વૈ વેદવાદિભિઃ ॥ ૨૪॥

તદેવ દેહિ રૂપં ચ દેહમોહપ્રવારણાત્ ।
દેહરૂપં તથા તત્ર બિન્દુમાત્રં પ્રકીર્તિતમ્ ॥ ૨૫॥

ચતુર્વિધાનાં દેહાનાં બ્રહ્મરૂપં પુરાતનમ્ ।
(Page ખં. ૧ અ. ૬ પાન ૧૬)
બહુરૂપં ચ તદ્બિદ્ધિ દેહકૈવલ્યસંજ્ઞિતમ્ ॥ ૨૬॥

સોઽહં બ્રહ્મૈકરૂપં યદ્બહુરૂપં ચ બિન્દુમત્ ।
સ્વસ્વકાર્યેષુ નો શક્તં સત્તાહીનતયા શિવે ॥ ૨૭॥

તાભ્યાં તપઃ કૃતં ઘોરં સ્વસ્વરૂપસ્ય સુન્દરિ ।
દિવ્યવર્ષસહસ્રાન્તે પ્રસન્નોઽભૂદ્ ગજાનનઃ ॥ ૨૮॥

પ્રત્યક્ષતાં યયૌ તત્ર શુણ્ડાદણ્ડવિરાજિતઃ ।
લમ્બોદરો મહાકર્ણશ્ચતુર્બાહુસ્ત્રિનેત્રભૃત્ ॥ ૨૯॥

તસ્ય દર્શનમાત્રેણ સ્ફૂર્તિર્જાતા તયોસ્તદા ।
તયા તં તૌ સમાબુધ્ય નતૌ સ્તોત્રં પ્રચક્રતુઃ ॥ ૩૦॥

પ્રકૃતિપુરુષાવૂચતુઃ ।
નમસ્તે ગણનાથાય સ્વસંવેદ્યમયાય તે ।
નિરાકારસ્વરૂપા વૈ શુણ્ડા યસ્ય વિરાજતે ॥ ૩૧॥

યસ્ય દેહશ્ચ સાકારઃ કણ્ઠાધઃ પરિકથ્યતે ।
અભેદ એતયોર્જાતસ્તેન ત્વં વૈ ગજાનન ॥ ૩૨॥

ચતુર્વિધં નિજાનન્દાદ્વેદેષુ કથિતં ભવેત્ ।
એકમવ્યક્તરૂપં ચ દ્વિતીય સમરૂપકમ્ ॥ ૩૩॥

તૃતીયં સત્સ્વરૂપં ચ ચતુર્થં યત્સદા હ્યસત્ ।
ચતુર્હસ્તસ્વરૂપં તે તેન ત્વં વૈ ચતુર્ભુજઃ ॥ ૩૪॥

તવોદરે સ્થિતં સર્વં તેન લમ્બોદરઃ સ્મૃતઃ ।
માયામાયિકરૂપં ચ દ્વૌ પાદૌ દ્વિવિધં ચ તે ॥ ૩૫॥

એતે સર્વે ગણા ઢુણ્ઢે ત્વદીયા નાત્ર સંશયઃ ।
ગણનાથોઽસિ તેન ત્વં નામ્ના ખ્યાતશ્ચ સર્વદા ॥ ૩૬॥

એતાદૃશો નિજાત્માસાવાવયોર્ધ્યાન આબભૌ ।
સ્વસંવેદ્યતયા ધ્યાતો ભક્તાનુગ્રહકારકઃ ॥ ૩૭॥

ભક્તાભિમાનભાવેન દેહધારી સ્વયં હ્યભૂત્ ।
એતૈશ્ચ લક્ષણૈર્યુક્તો ગણેશો નામધારકઃ ॥ ૩૮॥

ધન્યં સર્વં કૃતં સ્વામિન્ યેન ત્વં દેહવાનભૂઃ ।
સ્વાનન્દવાસભૃત્ સાક્ષાદ્ હૃદિ નિત્યં સ્થિરો ભવ ॥ ૩૯॥

નમસ્તે વિઘ્નરાજાય નમસ્તે વિઘ્નહારિણે ।
ભક્તાનાં વૈ હ્યભક્તાનાં વિઘ્નકર્ત્રે નમોઽસ્તુ તે ॥ ૪૦॥

કર્મણાં ફલદાત્રે ચ જ્ઞાનાનાં સિદ્ધિદાયિને ।
અમેયશક્તયે તુભ્યં સર્વાધારાય તે નમઃ ॥ ૪૧॥

કિં કર્તવ્યં દયાસિન્ધો તદેવાજ્ઞાપય પ્રભો ।
તવ ભક્તિં મહાતીવ્રાં દેહિ નૌ ગણનાયક ॥ ૪૨॥

એવં સ્તુતિં સમાકર્ણ્ય પરિતુષ્ટો ગણાધિપઃ ।
મેઘગમ્ભીરયા વાચા હર્ષયન્નબ્રવીત્તદા ॥ ૪૩॥

શ્રીગણેશ ઉવાચ ।
સાધુ સાધુ મહાભાગૌ યદુક્તં સ્તોત્રમુત્તમમ્ ।
મમ પ્રીતિકરં સર્વકામદં પ્રભવિષ્યતિ ॥ ૪૪॥

ધમાર્થકામમોક્ષાણા દાયકં પુષ્ટિવર્ધનમ્ ।
કારાગૃહસ્થિતાનાં ચ મોચકં લક્ષપાઠતઃ ॥ ૪૫॥

મારણોચ્ચાટનાદીનાં નાશકં તત્તથૈવ ચ ।
એકવિંશતિવારં યઃ એકવિંશદ્દિનાવધિ ॥ ૪૬॥

પઠેત્તુ યદિ વૈ ભક્ત્યા સ ઇપ્સિતફલં લભેત્ ।
બ્રહ્મભૂયકરં ચૈતન્નિષ્કામપઠનાદ્ભવેત્ ॥ ૪૭॥

ભવતોસ્તપસા તુષ્ટઃ સ્તોત્રેણાનેન ભાવતઃ ।
પ્રીતો દાસ્યામિ સમ્પૂર્ણં ભવદ્ભ્યામીપ્સિતં ચ યત્ ॥ ૪૮॥

બિન્દુમાત્રસ્વરૂપેણ યત્સ્થિતં બ્રહ્મ શાશ્વતમ્ ।
તસ્માચ્ચતુર્વિધં વિશ્વં પ્રકટં સમ્ભવિષ્યતિ ॥ ૪૯॥

પ્રકર્ષેણ ચ સર્વેષાં કૃતિસ્તસ્માદ્વિનિઃસૃતા ।
પ્રકૃતિસ્તેન તે નામ ભવિષ્યતિ જનેષ્વિદમ્ ॥ ૫૦॥

સૃષ્ટ્વા ચતુર્વિધં વિશ્વં બન્ધહીના ભવિષ્યસિ ।
મદીયાં ભક્તિમચલાં પ્રકૃતે પ્રાપ્સ્યસિ ધ્રુવમ્ ॥ ૫૧॥

જનાસ્ત્વદીયભક્તિં યે કરિષ્યન્તિ સકામતઃ ।
(Page ખં. ૧ અ. ૬ પાન ૧૭)
નિષ્કામતશ્ચ તેભ્યસ્ત્વં સર્વં દાસ્યસિ શોભને ॥ ૫૨॥

ચતુર્વિધેપ્યયં શેતે પુરે તેનૈવ પૂરુષઃ ।
સોઽહમ્માત્રાત્મકો ભાવી નામ્ના સર્વત્ર તિષ્ઠતુ ॥ ૫૩॥

સર્વાકારવિહીનોઽયં તત્ર ભ્રાન્તો ભવિષ્યતિ ।
બિમ્બબિમ્બિત ભાવેન પ્રકૃતૌ મોહિતઃ સદા ॥ ૫૪॥

સ્વયં મોહવિહીનઃ સ સોઽહમ્માત્રાત્મકઃ સદા ।
મત્પ્રસાદાદ્ભવેન્નિત્યં બ્રહ્મ સોઽહં સુખાત્મકઃ ॥ ૫૫॥

મદીયા ભક્તિરચલા ભવિષ્યતિ તવાપિ ચ ।
તયા બન્ધવિહીનસ્ત્વં તથા માન્યો ભવિષ્યસિ ॥ ૫૬॥

તવ ભક્તિં કરિષ્યન્તિ જના ભાવેન સંયુતાઃ ।
તેભ્યસ્તદીપ્સિતં સર્વં દાસ્યસિ ત્વં ન સંશયઃ ॥ ૫૭॥

બ્રહ્મભૂયપદં ચૈવ દાસ્યસે યોગસેવયા ।
સાક્ષાત્પુરુષરૂપસ્ત્વં સર્વસત્તાત્મકો ભવ ॥ ૫૮॥

પ્રકૃતૌ વીર્યમાધત્સ્વ સર્વસત્તાત્મકં વિભો ।
તેનેયં સર્વસૂર્વિશ્વં સૃજિષ્યતિ ન સંશયઃ ॥ ૫૯॥

સૃષ્ટ્વા ચતુર્વિધં સર્વં પાલનં હરણં તથા ।
કર્તવ્યં કાલયોગેન કરણીયમિદં સ્મૃતમ્ ॥ ૬૦॥

સર્વેષાં પ્રકૃતિર્માતા પિતા પુરુષ ઉચ્યતે ।
નાનારૂપાણિ નામાનિ કલ્પયિષ્યન્તિ વૈ જનાઃ ॥ ૬૧॥

ઇત્યુક્ત્વા ગણરાજસ્તુ તત્રૈવાન્તરધીયત ।
પ્રકૃતિઃ પુરુષશ્ચૈવ યથાજ્ઞમૌ પ્રચક્રતુઃ ॥ ૬૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે પ્રકૃતિપુરુષવરપ્રદાનં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૧.૬

## ૧.૭ તત્ત્વકૃતસ્તુતિવર્ણનં નામ સપ્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

પાર્વત્યુવાચ ।
શ્રુત્વેદં ત્વન્મુખામ્ભોજાદ્ધર્ષશ્ચેતસ્યજાયત ।
પુનર્વદસ્વ મે સ્વામિન્ ગણરાજકથામૃતમ્ ॥ ૧॥

કથાનાં ચ રહસ્યં યત્તદેવૈતન્ન સંશયઃ ।
પુનાતિ પ્રાશ્નિકં શ્રોતૃન્ વક્તારં ભક્તિતઃ શ્રુતમ્ ॥ ૨॥

પ્રકૃતિઃ પુરુષશ્ચોભૌ કથં સૃષ્ટિં પ્રચક્રતુઃ ।
અન્તર્હિતે નિજાનન્દે ગણેશે સ્વેચ્છયા વિભૌ ॥ ૩॥

મુદ્ગલ ઉવાચ ।
પાર્વતીવચનં શ્રુત્વા પ્રહૃષ્ટઃ શઙ્કરોઽબ્રવીત્ ।

કથાં રસયુતાં રમ્યાં પાવનાનાં ચ પાવનીમ્ ॥ ૪॥

શઙ્કર ઉવાચ ।
શ‍ૃણુ દેવિ પ્રવક્ષ્યામિ ગણનાથકથાં શુભામ્ ।
ધન્યાસિ સાદરા જાતા સપ્રેમા વિઘ્નનાશિની ॥ ૫॥

અન્તર્હિતે ગણેશે ચ પ્રકૃતિઃ પુરુષસ્તથા ।
સામર્થ્યેન યુતૌ જાતૌ પરસ્પરમનોનુગૌ ॥ ૬॥

તપસા વરદાનેન મોહયામાસ તત્ક્ષણાત્ ।
પુરુષં પ્રકૃતિઃ સા વૈ નાનાભાવાર્થદર્શિની ॥ ૭॥

નાનાવિભવયુક્તાં તાં દૃષ્ટ્વા પુરુષસત્તમઃ ।
(Page ખં. ૧ અ. ૭ પાન ૧૮)
મોહિતઃ પૂર્ણભાવેન તદધીનોઽભવત્સદા ॥ ૮॥

સંવીક્ષિતા મહામાયા પુરુષેણ મહાત્મના ।
હાવભાવયુતા તત્ર સંસ્થિતા ભક્તિભાવતઃ ॥ ૯॥

તસ્યાં સત્તાત્મકં વીર્યં પુરુષેણ પ્રકાશકમ્ ।
નિક્ષિપ્તં સહસા દેવિ તેન સા ગર્ભવત્યભૂત્ ॥ ૧૦॥

સ ગર્ભો વવૃધે તત્ર તેજસા સ્વેન સંવૃતઃ ।
મહતા કાલયોગેન પૂર્ણો જાતઃ પ્રતાપવાન્ ॥ ૧૧॥

સમયે સુષુવે સા તં પુત્રં તેજોમયં પરમ્ ।
તસ્ય નામાઽભવલ્લોકે મહાનિત્યભિવિશ્રુતમ્ ॥ ૧૨॥

અન્તસ્તુ યત્સ્થિતં દેવિ સર્વાન્તર્યામિ તત્પરમ્ ।
લોકેષુ ચ મહત્તત્વં જ્ઞાતવ્યં તત્સમાધિના ॥ ૧૩॥

સર્વેષામાદિભૂતોઽયં મહાનાત્માઽભવત્પ્રભુઃ ।
જ્યેષ્ઠોઽયં તત્ત્વજાતીનાં હૃદિ તેષાં સમાસ્થિતઃ ॥ ૧૪॥

મહતા ચ તતઃ સૃષ્ટં યદહઙ્કારરૂપકમ્ ।
સ એવ ત્રિવિધો જાતો ભિન્નમૂર્તિઃ પ્રતાપવાન્ ॥ ૧૫॥

અહં સર્વત્ર તિષ્ઠામિ મદાધારમિદં સ્મૃતમ્ ।
તેનાહઙ્કારનામા સ સદાહઙ્કરણાત્ શિવે ॥ ૧૬॥

સ એવ બાહ્યભાવેન સ્થિતઃ સર્વત્ર સર્વરાટ્ ।

ઇચ્છિતં મહતા યદ્વૈ તત્ કર્તું સુસમાહિતઃ ॥ ૧૭॥

ત્રિવિધોઽસૌ ગુણૈસ્તત્ર તન્નિબોધ જગન્મયિ ।
સાત્ત્વિકો રાજસશ્ચૈવ તામસઃ કથ્યતે બુધૈઃ ॥ ૧૮॥

તેનાહઙ્કરણસ્યાપિ ત્રિશક્તિત્વં સમાગતમ્ ।
સાત્ત્વિકી જ્ઞાનશક્તિશ્ચ તયા ભાવઃ પ્રબુધ્યતે ॥ ૧૯॥

રાજસી યા ક્રિયાશક્તિસ્તયા કાર્યં પ્રવર્તતે ।
તામસી દ્રવ્યશક્તિર્યા દેહરૂપા પ્રકથ્યતે ॥ ૨૦॥

તત્રાદૌ તામસી શક્તિઃ પ્રેરિતા વિશ્વયોનિના ।
નિર્મમે શબ્દરૂપં સા તેનાકાશં વિનિર્મિતમ્ ॥ ૨૧॥

આકાશેન સ્પર્શ એવં નિર્મિતઃ સર્વસિદ્ધયે ।
સ્પર્શેન નિર્મિતો વાયુર્મહાબલયુતઃ પ્રભુઃ ॥ ૨૨॥

વાયુના નિર્મિતં રૂપં તેજોરૂપેણ નિર્મિતમ્ ।
તેજસશ્ચ રસોત્પત્તી રસાદાપો વિનિઃસૃતાઃ ॥ ૨૩॥

અદ્ભિશ્ચ નિર્મિતો ગન્ધો ગન્ધાદ્ભૂમિરજાયત ।
તમોગુણમયી સૃષ્ટિરેષા જાતા મહાદ્ભુતા ॥ ૨૪॥

તન્માત્રા ભૂતસર્ગશ્ચ પઞ્ચપઞ્ચાત્મકઃ સ્વરાટ્ ।
પઞ્ચભૂતાત્મકો દેહઃ સર્વત્રૈવ પ્રદૃશ્યતે ॥ ૨૫॥

તતો રાજસશક્ત્યા ચ પઞ્ચભૂતમયાનિ વૈ ।
ઇન્દ્રિયાણિ પ્રસૃષ્ટાનિ ક્રિયારૂપાણિ તાનિ વૈ ॥ ૨૬॥

પઞ્ચ જ્ઞાનેન્દ્રિયાણ્યાહુર્જ્ઞાનરૂપધરાણિ ચ ।
જિહ્વા ચક્ષુસ્ત્વચા નાસા કર્ણશ્ચૈવાઽત્ર પઞ્ચમઃ ॥ ૨૭॥

કર્મેન્દ્રિયાણિ પઞ્ચૈવ હસ્તૌ પાદૌ ગુદં ચ વાક્ ।
લિઙ્ગં પઞ્ચમમત્રૈવ એભિઃ સઞ્જાયતે ક્રિયા ॥ ૨૮॥

પઞ્ચ પ્રાણાસ્તથા જ્ઞેયાઃ પ્રાણો વ્યાનસ્ત્વપાનકઃ ।
ઉદાનશ્ચ સમાનો વૈ રાજસાઃ પઞ્ચ વાયવઃ ॥ ૨૯॥

સપ્તધાતુવિભાગાર્થં ક્રિયારૂપા ઉદાહૃતાઃ ।
એષાં ક્રિયાત્મિકા સૃષ્ટી રાજસી કથિતા પ્રિયે ॥ ૩૦॥

સાત્ત્વિક્યા માયયા દેવા ઇન્દ્રિયાણાં વિનિર્મિતાઃ ।
દિશો વાયુશ્ચ વરુણોઽશ્વિનૌ સૂર્યઃ પ્રકીર્તિતઃ ॥ ૩૧॥

એતા જ્ઞાનેન્દ્રિયાણાં ચ દેવતાઃ પરિકીર્તિતાઃ ।
અગ્નિર્વિષ્ણુઃ પ્રજાપાલ ઇન્દ્રો મિત્રશ્ચ પઞ્ચમઃ ॥ ૩૨॥

એતાઃ કર્મેન્દ્રિયાણાં વૈ દેવતાઃ પરિકીર્તિતાઃ ।
સાત્ત્વિકી સૃષ્ટિરિત્યુક્તા દશદેવસ્વરૂપિણી ॥ ૩૩॥

(Page ખં. ૧ અ. ૭ પાન ૧૯)
એતે તત્ત્વસ્વરૂપાખ્યા આદિદેવાઃ પ્રકીર્તિતાઃ ।
યથાવિધિ તથા જાતા જ્ઞાનહીના બભૂવિરે ॥ ૩૪॥

જ્ઞાનહીનત્વદોષેણ સૃષ્ટિં કર્તું ન ચ ક્ષમાઃ ।
તેભ્યો જ્ઞાનપ્રદાનાર્થમુપદેશં પ્રચક્રતુઃ ॥ ૩૫॥

પ્રકૃતિઃ પુરુષશ્ચોભૌ મન્ત્રમેકાક્ષરં પરમ્ ।
અનુષ્ઠાનવિધાયુક્તં દદતુર્ગણપસ્ય તૌ ॥ ૩૬॥

તે તત્રૈવ સ્થિતાઃ સર્વે તપશ્ચક્રુર્મહદ્ ભૃશમ્ ।
તેન સન્તુષ્ટતાં યાતો ગણેશો ગણવલ્લભઃ ॥ ૩૭॥

પ્રત્યક્ષતાં યયૌ તેષાં સમીપે સંસ્થિતો મહાન્ ।
તં દૃષ્ટ્વા હર્ષિતાઃ સર્વે દેવાઃ સ્તોત્રં પ્રચક્રિરે ॥ ૩૮॥

તત્ત્વાન્યૂચુઃ ।
નમસ્તે વક્રતુણ્ડાય ભક્તસંરક્ષકાય ચ ।
સર્વાધીશાય સર્વાય ગણાનાં પતયે નમઃ ॥ ૩૯॥

અવ્યક્તાવ્યક્તરૂપાય સત્યાસત્યાય તે નમઃ ।
સમાય વિષમાયૈવ વિઘ્નેશાય નમો નમઃ ॥ ૪૦॥

આત્મનેઽનાત્મને તુભ્યં નિર્ગુણાય ગુણાત્મને ।
નામરૂપધરાયૈવ દ્વાભ્યાં હીનાય તે નમઃ ॥ ૪૧॥

અનન્તોદરસંસ્થાય નાનાભોગકરાય ચ ।
ભોગહીનાય સર્વત્ર સ્વાનન્દપતયે નમઃ ॥ ૪૨॥

માયાધારાય વૈ તુભ્યં માયાહીનાય તે નમઃ ।
માયિનાં મોહકારાય સર્વજ્ઞાય ચ તે નમઃ ॥ ૪૩॥

સર્વસિદ્ધિધરાયૈવ સિદ્ધીનાં પતયે નમઃ ।
સિદ્ધિહીનાય સિદ્ધાય સિદ્ધાનાં પતયે નમઃ ॥ ૪૪॥

જગન્મયાય વૈ તુભ્યં જગદ્ધીનાય તે નમઃ ।
કર્મણાં ફલદાત્રે ચ કર્મરૂપાય તે નમઃ ॥ ૪૫॥

કર્મહીનાય તેઽજ્ઞાનજ્ઞાનદાત્રે નમો નમઃ ।
જ્ઞાનિનાં જ્ઞાનકર્ત્રે ચ જ્ઞાનહીનાય તે નમઃ ॥ ૪૬॥

ચતુર્વિધધરાયૈવ ચતુર્વિધમયાય ચ ।
ચતુર્વિધવિહીનાય સ્વસંવેદ્યાય તે નમઃ ॥ ૪૭॥

પાશાઙ્કુશધરાયૈવ દન્તાભયધરાય ચ ।
ચતુર્ભુજાય વૈ શૂર્પશ્રુતયે તુન્દિલાય ચ ॥ ૪૮॥

મહતે ચૈકદન્તાય મહતાં ચ મહીયસે ।
લઘવે લઘુરૂપાય લઘૂનાં લાઘવે નમઃ ॥ ૪૯॥

ગજવક્ત્રાય દેવાય બ્રહ્મણે બ્રહ્મરૂપિણે ।
બ્રહ્મણસ્પતયે ચૈવ બ્રહ્મદાત્રે નમો નમઃ ॥ ૫૦॥

કિમસ્માભિઃ સ્તુતિઃ કાર્યા હ્યપારગુણરાશયે ।
નમો નમો ગણેશાય ત્વં તુષ્ટો ભવ સર્વદા ॥ ૫૧॥

કૃતાઞ્જલિપુટાઃ સર્વે ઋષયશ્ચ સ્થિતાઃ પુરઃ ।
તાન્ દૃષ્ટ્વા ગણરાજસ્તુ હૃષ્ટઃ સન્ પ્રત્યુવાચ હ ॥ ૫૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે તત્ત્વકૃતસ્તુતિવર્ણનં નામ સપ્તમોઽધ્યાયઃ ॥ ૧.૭
(Page ખં. ૧ અ. ૮ પાન ૨૦)

## ૧.૮ ગુણેશવરપ્રદાનં નામાષ્ટમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શ્રીશિવ ઉવાચ ।
શૃણુ દેવિ ગણેશસ્ય ચરિતં પાપનાશનમ્ ।
ભુક્તિમુક્તિપ્રદં ચૈવ સ્મરણેન સુસિદ્ધિદમ્ ॥ ૧॥

ગજાનનઃ પ્રસન્નાત્મા પરમાત્મા પરાત્પરઃ ।

ભક્તાનન્દકરઃ સાક્ષાદૂચિવાન્ ભક્તિભાવિતઃ ॥ ૨॥

શ્રીગજાનન ઉવાચ ।
ભો ભોસ્તત્ત્વાનિ સર્વાણિ વરં બ્રૂત હૃદીપ્સિતમ્ ।
તપસાઽહં પ્રસન્તુષ્ટો ભક્ત્યા સ્તોત્રેણ ભાવતઃ ॥ ૩॥

ભવત્કૃતમિદં સ્તોત્રમતિપ્રીતિકરં મમ ।
સર્વસિદ્ધિપ્રદં ચૈવ પઠતે શ‍ૃણ્વતે ભવેત્ ॥ ૪॥

વિદ્યાકામો લભેદ્વિદ્યાં ધનકામો ધનં લભેત્ ।
સ્ત્રીકામઃ સ્ત્રિયમાપ્નોતિ પુત્રકામઃ સુપુત્રકાન્ ॥ ૫॥

મુક્તિકામો લભેન્મુક્તિં જયકામો જયં લભેત્ ।
અસ્ય સ્તોત્રસ્ય પઠનાત્ વાઞ્છિતં લભતે પરમ્ ॥ ૬॥

શ્રીશિવ ઉવાચ ।
ગણેશવચનં શ્રુત્વા ભક્તિનમ્રાત્મકન્ધરાઃ ।
ઋષયસ્તં પ્રણમ્યાદાવૂચુસ્તે હૃષ્ટમાનસાઃ ॥ ૭॥

આદિઋષય ઊચુઃ ।
પ્રસન્નો ભગવન્નદ્ય યદિ દેયો વરો મહાન્ ।
ત્વદીયામચલાં ભક્તિં દેહિ નો ગણનાયક ॥ ૮॥

સૃષ્ટિસામર્થ્યમત્યન્તમસ્માકં ત્વત્પ્રસાદતઃ ।
અસ્તુ વૈ ભજતાં સર્વસિદ્ધિદાશ્ચ વયં તથા ॥ ૯॥

યદ્યત્ હૃદીપ્સિતં દેવ તત્તત્ સિધ્યતુ સર્વદા ।
બન્ધહીનત્વમનિશં દેહિ ત્વં વિઘ્નનાશન ॥ ૧૦॥

તત્ત્વાનાં વચનં સર્વે શ્રુત્વા ગણપતિઃ સ્વયમ્ ।
દદૌ તેષામભીષ્ટં સ મહાદેવિ મહપ્રદઃ ॥ ૧૧॥

શ્રીગજાનન ઉવાચ ।
દત્તા વરા મયા દેવા યે ભવદ્ભિર્વૃતાઃ પરાઃ ।
ઇત્યુક્ત્વાન્તર્દધે ઢુણ્ઢિઃ ઋષીણાં પશ્યતાં ખલુ ॥ ૧૨॥

સ્વાનન્દે ચ ગતે દેવે ગણેશે પરમાત્મનિ ।
ખિન્ના ઇવાઽભવન્ દેવાઃ પરસ્પરમુખેક્ષણાઃ ॥ ૧૩॥

ગણેશવરદાનેન જ્ઞાનં પ્રાપ્ય મહાદ્ભુતમ્ ।

બુદ્ધિયુક્તા મહાદેવાઃ સૃષ્ટિં ચક્રુઃ પ્રભાવતઃ ॥ ૧૪॥

પરસ્પરપ્રવેશં ચ ચક્રુસ્ત ઋષયસ્તદા ।
તેનૈકભાવતાં પ્રાપ્તાસ્તસ્માદણ્ડં બભૂવ વૈ ॥ ૧૫॥

તસ્મિન્નણ્ડે પુમાનાદિરેકઃ સર્વાત્મશક્તિમાન્ ।
જાતો વૈ ભગવાન્ સાક્ષાદ્ ગુણેશો ગુણવલ્લભઃ ॥ ૧૬॥

મહતા કાલયોગેન દેહાત્તસ્ય વિનિઃસૃતાઃ ।
આપસ્તત્ર સ્થિતં હ્યણ્ડં તત્ર વૃદ્ધિં યયૌ ચ સઃ ॥ ૧૭॥

કાલેનાવયવી જાતસ્તતઃ સમ્પૂર્ણદેહવાન્ ।
તસ્ય તેજઃપ્રભાવેણ તદણ્ડં સ્ફુટિતં મહત્ ॥ ૧૮॥

સ એવ નિઃસૃતઃ સાક્ષાદસઙ્ખ્યાતાર્કસન્નિભઃ ।
અપારમહિમા યસ્ય સર્વાદિઃ સર્વભાવનઃ ॥ ૧૯॥

સર્વતો હસ્તપાદો વૈ સર્વતો નાસિકોદરઃ ।
સર્વતોઽક્ષિમુખોઽનન્તઃ સર્વતઃ શ્રુતિમાન્ બભૌ ॥ ૨૦॥

અસઙ્ખ્યાવયવો દેવો હ્યસઙ્ખ્યોદારવિક્રમઃ ।
અસઙ્ખ્યલીલયા યુક્તઃ પરમાત્મસ્વભાવવાન્ ॥ ૨૧॥

આદિમધ્યાન્તહીનઃ સ સર્વત્ર વ્યાપ્ય સંસ્થિતઃ ।
મહતાં ચ મહીયાન્ યો યસ્ય પારો ન દૃશ્યતે ॥ ૨૨॥

અણુભ્યોઽણુતરો દેવો રોમરન્ધ્રેષુ યસ્ય વૈ ।
બ્રહ્માણ્ડાનિ ભ્રમન્તિ સ્મ પરાગા ઇવ ચામ્બરે ॥ ૨૩॥

મહાકારણનામા વૈ તુરીયો દેહધારકઃ ।
આત્મપ્રતીતિરૂપં યત્કથ્યતેઽસૌ મહાદ્યુતિઃ ॥ ૨૪॥

ગુણાનામધિપોઽયં વૈ ગુણેશસ્તેન કથ્યતે ।
સર્વાત્મા સર્વરૂપશ્ચ નાદદેહધરઃ પ્રભુઃ ॥ ૨૫॥

(Page ખં. ૧ અ. ૮ પાન ૨૧)
ગુણેશેન કૃતં કર્મ નાનાચેષ્ટાત્મકં તતઃ ।
તેન નામાનિ જાતાનિ પશ્ચાત્તસ્ય મહાત્મનઃ ॥ ૨૬॥

આપઃ શરીરસંસૃષ્ટાસ્તત્ર સુપ્તોઽયમીશ્વરઃ ।
નારાયણ ઇતિ પ્રાપ્તં નામ તસ્ય મહાત્મનઃ ॥ ૨૭॥

આપો નરપ્રસૂતાશ્ચ તેન નારાઃ પ્રકીર્તિતાઃ ।
તા એવાયતનં તસ્ય કર્મણા તેન સ પ્રભુઃ ॥ ૨૮॥

ભિન્નં ભિન્નં સૃજતિ ચ ત્રિવિધં ત્રિવિધં પૃથક્ ।
બ્રહ્મેતિ તેન સમ્પ્રાપ્તં નામ તસ્ય પ્રભાવતઃ ॥ ૨૯॥

વેદોપનિષદિ પ્રોક્તો બ્રહ્મલોકઃ સનાતનઃ ।
સર્વેભ્યો યઃ પરઃ શ્રેષ્ઠમેનં વિદ્ધિ સુનિશ્ચિતમ્ ॥ ૩૦॥

સર્વેષાં યન્નદાતા સ કાલરૂપેણ વર્તતે ।
ચાલકસ્તેન નામાભૂન્ મહાદેવ ઇતિ પ્રભોઃ ॥ ૩૧॥

કર્મણામયમાધારો જાતઃ સૂર્ય ઇતિ સ્મૃતઃ ।
મોહકો વસ્તુજાતાનામાદિશક્તિશ્ચ તેન સઃ ॥ ૩૨॥

ઇત્યાદિનામતાં પ્રાપ્તો નાનાભાવેન કર્મણા ।
ગુણેશસ્તુ તુરીયાત્મા સર્વત્રાઽસૌ મહાન્ પ્રભુઃ ॥ ૩૩॥

કારણાનાં ચ સર્વેષાં કારણં ચ ન સંશયઃ ।
મહાકારણમેતચ્ચ પુરાણેષુ પ્રપઠ્યતે ॥ ૩૪॥

કર્તુઃ કર્તા સ્વયં સાક્ષાદ્ધર્તુર્હર્તા ન સંશયઃ ।
પાતુઃ પાતા પ્રકાશસ્ય પ્રકાશોઽયં ગુણેશ્વરઃ ॥ ૩૫॥

ત્રિદેહો ગુણતશ્ચાયં વામે રાજસતાં ગતઃ ।
સાત્ત્વિકો મધ્યભાગે સ દક્ષિણે તામસો બભૌ ॥ ૩૬॥

એતાદૃશો મહાત્માસાવાદિદેવો ગુણેશ્વરઃ ।
અજ્ઞાનેનાવૃતો યસ્માત્તેન વૈ તપસિ સ્થિતઃ ॥ ૩૭॥

સોઽતપત્તપ ઉગ્રં તુ હૃદિ ધ્યાત્વા ગજાનનમ્ ।
બહુકાલે વ્યતિક્રાન્તે પ્રસન્નોભૂદ્ગજાનનઃ ॥ ૩૮॥

આગતો દેવદેવેશો ધેનુર્વત્સમિવાદરાત્ ।
બોધયામાસ તં શીઘ્રં ગુણેશં ભક્તવત્સલઃ ॥ ૩૯॥

શ્રીગણેશ ઉવાચ ।
એકાક્ષરસ્ય મન્ત્રસ્ય જપેન તપસાઽપિ તે ।
પ્રસન્નોઽહં મહાબાહો ગુણેશ વૃણુ વાઞ્છિતમ્ ॥ ૪૦॥

ઇત્યેવં બોધિતો દેવિ ગણેશેન કૃપાવતા ।
ગુણેશ્વરઃપ્રતુષ્ટાવ ભક્તિભાવસમન્વિતઃ ॥ ૪૧॥

ગુણેશ ઉવાચ ।
નમામિ દેવં ગણનાથમીશં સદા સુશાન્તં હૃદિ યોગિનાં વૈ ।
અપારયોગં દૃઢયોગનાથં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૪૨॥

અયોગરૂપં કથિતું ત્વશક્યં નિવૃત્તિમાત્રં હ્યસમાધિસંસ્થમ્ ।
અભેદભેદાત્મકમૂલહીનં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૪૩॥

સદા સમાધિસ્થમનન્તપારં પ્રભું સ્વસંવેદ્યમયં વિભાન્તમ્ ।
નિજાત્મયોગેન ચ લભ્યમેવં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૪૪॥

વિદેહયોગેન ચ સાઙ્ખ્યરૂપં જનેન લભ્યં ગણરાજમીડ્યમ્ ।
સદા હ્યુપાધૌ ન હિતં ગણેશં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૪૫॥

સુસંસ્થિતં સર્વવિલાસયુક્તં હૃદ્વિજ્ઞબોધાત્મકમાદિદેવમ્ ।
અભેદમાત્રં પરમાર્થરૂપં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૪૬॥

અનાદિમધ્યાન્તમનન્તપારં સુસંવૃતં સન્તતમાત્મરૂપમ્ ।
ગણેશમાદ્યં પુરુષં પુરાણં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૪૭॥

અનાદિરૂપં પ્રકૃતિપ્રભેદં સદા સુબિન્દ્વાત્મકમપ્રમેયમ્ ।
અમાયિકં મોહકરં પ્રસિદ્ધં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૪૮॥

ગુણેષુ રૂપેણ વિરાજમાનમપારમવ્યક્તમયં ગણેશમ્ ।
(Page ખં. ૧ અ. ૮ પાન ૨૨)
ગુણૈર્વિહીનં ગુણચાલકં ચ સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૪૯॥

સમસ્વરૂપં જગદીશમેકં સુષુપ્તિરૂપં સકલાવભાસમ્ ।
અનાદિમાયામયમોહધારં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૫૦॥

જગન્મયં સૂક્ષ્મવિભૂતિધારં હિરણ્મયં સ્વપ્નગતં ગણેશમ્ ।
જનસ્ય વિજ્ઞાનકર પુરાણં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૫૧॥

સ્તુતં સદા દેવમુનીન્દ્રસિદ્ધૈઃ સ્થિતં જગન્મોહમયં પ્રસિદ્ધમ્ ।
સદા પરં સ્થૂલવિહારયુક્તં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૫૨॥

અસત્સ્વરૂપં વિવિધેષ્વભેદં ગણેશમાયામયશક્તિરૂપમ્ ।
મનોવચોહીનમહાનુભાવં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૫૩॥

રવિસ્વરૂપં હ્યમૃતં પુરાણમભેદોકાત્મકમાત્મરૂપમ્ ।
અખણ્ડમાનન્દઘનં ગણેશં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૫૪॥

સમં સદા વિષ્ણુમચિન્ત્યભાવમભેદભેદાદિવિવર્જિતં ચ ।
સદા સુખાનન્દમયં ગણેશં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૫૫॥

અચિન્ત્યરૂપં સકલૈર્વિહીનં સદાશિવં મોહવિહીનમાદ્યમ્ ।
અપારવેશં સ્વસુખાવભાસં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૫૬॥

પદાર્થરૂપં વિવિધપ્રભેદં વિકારયુક્તં પરમપ્રમેયમ્ ।
બોધાત્મકં ત્વમ્પદરૂપમેવ સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૫૭॥

અખણ્ડમેકાત્મકવિશ્વરૂપં વિકારહીનં મહદપ્રમેયમ્ ।
ગણેશમેકં હૃદિ તત્પદસ્થં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૫૮॥

ગણેશ ચૈતે વિવિધસ્વરૂપાઃ કલાવતારા ભવતો હિ ભવ્યાઃ ।
સુશાન્તમેકં ભવદીયરૂપં કથં વિભાવ્યં મનસા ન લભ્યમ્ ॥ ૫૯॥

યદા ચ સર્વાત્મમયં વદામિ તદા તુ સોઽહં પ્રકૃતિસ્વરૂપમ્ ।
ગકારરૂપં જગદીશભેદં ગકારમેકં શરણં પ્રપદ્યે ॥ ૬૦॥

મનોવચોહીનમથો વદામિ હ્યયોગસંયોગમયં ણકારમ્ ।
નિવૃત્તિરૂપં શરણં સદા વૈ નમામિ તં સર્વવરિષ્ઠમાદ્યમ્ ॥ ૬૧॥

ન શક્યસે વક્તુમવક્તુમેવમતો ભવન્તં પ્રણમામિ ઢુણ્ઢે ।
ગણેશ વિઘ્નેશ મહાનુભાવ પ્રસીદ ભો બ્રહ્મપતે મહાત્મન્ ॥ ૬૨॥

જન્મ ધન્યં ધન્યમક્ષિ વિદ્યા જ્ઞાનં તપઃ ફલમ્ ।
યેન દૃષ્ટો ગણાધીશઃ કૃતકૃત્યોઽસ્મિ સામ્પ્રતમ્ ॥ ૬૩॥

મહ્યં યદિ વરો દેયસ્તદા ભક્તિં દૃઢાં ત્વયિ ।
દેહિ મે પરમેશાન યયા મોહો વિનશ્યતિ ॥ ૬૪॥

સૃષ્ટિસર્જનસામર્થ્યં ભજતાં કામપૂરણમ્ ।
નિર્વિઘ્નં સર્વકાર્યેષુ દેહિ વિઘ્નવિનાશન ॥ ૬૫॥

ગુણેશવચનં શ્રુત્વા સુપ્રસન્નો ગજાનનઃ ।
મેઘગામ્ભીર્યસાદૃશ્યં વચનં ત્વિદમબ્રવીત્ ॥ ૬૬॥

શ્રીગણેશ ઉવાચ ।
ભવિતા મે મહાભક્તિઃ સૃષ્ટીનાં રચનાસ્તથા ।

નાનાવિધા ભવિષ્યન્તિ નિર્વિઘ્નં સર્વદા ભવેત્ ॥ ૬૭॥

ભવદ્ભ્યઃ સર્વદાતૃત્વં ભવિષ્યતિ તથાઽનઘ ।
મહાકાર્યે સમુત્પન્ને દાસ્યેઽહં દર્શનં ચ તે ॥ ૬૮॥

સ્તોત્રં ત્વયા કૃતં યચ્ચ સર્વમાન્યં ભવિષ્યતિ ।
પઠતાં શ‍ૃણ્વતાં ચૈવ બ્રહ્મભૂતકરં મહત્ ॥ ૬૯॥

(Page ખં. ૧ અ. ૯ પાન ૨૩)
સ્તોત્રં બ્રહ્મપતેઃ સાક્ષાન્નામ્ના વૈ સ્તુતિસારકમ્ ।
ભવિષ્યતિ મહાભાગ સર્વસિદ્ધિકરં પરમ્ ॥ ૭૦॥

સકામેભ્યો જનેભ્યોઽપિ કામદં ચિન્તિતપ્રદમ્ ।
નિષ્કામેભ્યઃ સ્વભક્તેભ્યો મુક્તિદં પ્રભવિષ્યતિ ॥ ૭૧॥

મમ પ્રીતિકરં પૂર્ણં સારં સર્વત્ર ભાષિતમ્ ।
ત્રિકાલપઠનાદસ્ય સાધ્યોઽહં નાત્ર સંશયઃ ॥ ૭૨॥

શ્રીશિવ ઉવાચ ।
ઇત્યુક્ત્વાન્તર્હિતઃ સાક્ષાદ્ગણેશો ભક્તવત્સલઃ ।
દેવસ્યાપિ વિયોગેન ગુણેશો વિમના હ્યભૂત્ ॥ ૭૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમ ખણ્ડે વક્રતુણ્ડચરિતે ગુણેશવરપ્રદાનં નામાષ્ટમોઽધ્યાયઃ ॥ ૧.૮

## ૧.૯ અષ્ટધા પ્રકૃતિવર્ણનં નામ નવમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ।
શ્રીશિવ ઉવાચ ।
વરદાનપ્રભાવેણ ગુણેશો જ્ઞાનવાનભૂત્ ।
સમર્થો ભગવાન્ સાક્ષાત્ સ્રષ્ટું તત્ર મનો દધે ॥ ૧॥

તસ્ય નિઃશ્વાસતો વેદા નિઃમૃતા રૂપધારિણઃ ।
સર્વજ્ઞાનકરાઃ સાક્ષાદ્ભાસ્વન્તો ગુરવઃ સતામ્ ॥ ૨॥

પશ્ચાત્તેન ગુણેશેન સમભૂતાત્મકં જગત્ ।
સૃષ્ટં સુષુપ્તિસંજ્ઞં ચ મહત્તત્ત્વાદિભિઃ સમૈઃ ॥ ૩॥

આનન્દવ્યવહારત્વાત્ પ્રધાનમિતિ કથ્યતે ।

કારણ દ્વન્દ્વભાવાનાં તેન કારણકં સ્મૃતમ્ ॥ ૪॥

માયા તમઃકરી યસ્માત્તેન તામસતાં ગતમ્ ।
સમાનવ્યવહારં ચ પ્રધાનં મોહદં બભૌ ॥ ૫॥

સ્વસ્યાપિ જડભાવશ્ચ તેન ન જ્ઞાયતે સદા ।
કિં કર્તવ્યમકર્તવ્યમિતિ તેન તતો મહત્ ॥ ૬॥

તપઃ કૃતં મહોગ્રં ચ દિવ્યં વર્ષસહસ્રકમ્ ।
તેન પ્રત્યક્ષતાં યાતો ગણેશો ભક્તવત્સલઃ ॥ ૭॥

સ્તુતઃ પ્રપૂજિતસ્તેન કારણેન મહાયશાઃ ।
સામર્થ્યં યોગરૂપં ચ દદૌ પરમભાવિતઃ ॥ ૮॥

વેદૈશ્ચાપિ કૃતં ઘોરં તપઃ પરમદારુણમ્ ।
તેષાં પ્રત્યક્ષતાં યાતો વિઘ્નેશો વિઘ્નવારણઃ ॥ ૯॥

વેદૈશ્ચ સંસ્તુતો દેવઃ સ્તોત્રૈઃ સ્વસ્વસમુદ્ભવૈઃ ।
બ્રાહ્મણસ્પત્યસૂક્તેન બહ્વૃચઃ સ્તુતવાન્ પ્રભુમ્ ॥ ૧૦॥

ગણેશશાન્તિકેનૈવ યજુસ્તં સ્તુતવત્તથા ।
નામાષ્ટકાર્થકૃત્સ્તોત્રં તેન સામ્ના ચ સંસ્તુતઃ ॥ ૧૧॥

અથર્વશીર્ષકં નામ તેનૈવાથર્વણાસ્તુતઃ ।
ઇત્યાદિ ગાણપત્યશ્ચ સ્તોત્રૈર્નાનાવિધૈઃ સ્તુતઃ ॥ ૧૨॥

પૂજિતો મૂલમન્ત્રેણ સન્તુષ્ટસ્તેન વિઘ્નહા ।
સર્વેષાં ગુરુરૂપા વૈ ભવિષ્યથ વરં દદૌ ॥ ૧૩॥

સર્વમાન્યા જગત્પૂજ્યા વેદાસ્તેન કૃતાસ્તદા ।
સાઙ્ગોપાઙ્ગસમાચારા ગુરવસ્તે મતાઃ ખલુ ॥ ૧૪॥

પાર્વત્યુવાચ ।
તમોગુણમયં સ્વામિન્ પ્રધાનં સમરૂપકમ્ ।
(Page ખં. ૧ અ. ૯ પાન ૨૪)
વરં પ્રાપ્ય ગણેશાત્તુ કિં કૃતં તેન તદ્વદ ॥ ૧૫॥

મુદ્ગલ ઉવાચ ।
પ્રિયોક્તં વચનં શ્રુત્વા હૃષ્ટરોમા મહેશ્વરઃ ।
તાં પ્રત્યુવાચ ભગવાન્ સ્મયન્નિવ સુશાન્તધીઃ ॥ ૧૬॥

શ્રીશિવ ઉવાચ ।
શ‍ૃણુ પ્રિયે પ્રવક્ષ્યામિ ગણેશપ્રીતિવર્ધને ।
વિભૂતિં તસ્ય દેવસ્ય ત્વં વૈ ભાગ્યવતી શિવે ॥ ૧૭॥

ગણેશવરદાનેન સૃષ્ટં તેનાપિ સૂક્ષ્મકમ્ ।
હિરણ્યગર્ભમાન્તર્યં સાત્ત્વિકં સ્વપ્નરૂપકમ્ ॥ ૧૮॥

મહદાદિમહાતત્ત્વૈઃ સૂક્ષ્મભૂતૈશ્ચ સંવૃતમ્ ।
દ્વન્દ્વવિજ્ઞાનમૂલં તદન્તરિક્ષસ્થિતં બભૌ ॥ ૧૯॥

બોધહીનેન તેનૈવ તપસ્તપ્તં સુદુષ્કરમ્ ।
તેન તુષ્ટો ગણેશાનો વાઞ્છિતં પ્રદદૌ વરમ્ ॥ ૨૦॥

વરદાનપ્રભાવેણ નાનાસામર્થ્યવાનભૂત્ ।
હિરણ્યગર્ભો ભગવાન્ સ્વપ્નમાયાધરઃ પ્રભુઃ ॥ ૨૧॥

તેન સ્થૂલસ્વરૂપં યત્સૃષ્ટં રાજસસંજ્ઞકમ્ ।
જાગ્રદ્ભોગકરં પૂર્ણં તત્ત્વૈશ્ચ સ્થૂલરૂપિભિઃ ॥ ૨૨॥

જ્ઞાનહીનેન તેનાથ તપસ્તપ્તં સુદારુણમ્ ।
તપસા ચૈવ સન્તુષ્ટો ગણેશઃ કરુણાનિધિઃ ॥ ૨૩॥

પ્રત્યક્ષતાં યયૌ તસ્ય જાગ્રદન્નમયસ્ય ચ ।
તેનાપિ પૂજિતો દેવઃ સ્તુતસ્તસ્મૈ વરં દદૌ ॥ ૨૪॥

વરદાનપ્રભાવેણ નાનાસામર્થ્યવાનભૂત્ ।
ઈશ્વરોન્નમયશ્ચાસાવેકોનેકમકલ્પયત્ ॥ ૨૫॥

જાગ્રત્સ્વપ્નસુષુપ્ત્યાખ્યત્ર્યવસ્થાપ્રચુરાણિ ચ ।
ભિન્નભિન્નાનિ જાતાનિ કોટિશઃ કોટિશઃ ખલુ ॥ ૨૬॥

ગુણેશરોમકૂપેભ્યો નિઃસૃતાનિ મહન્તિ ચ ।
અણ્ડાનિ ભિન્નભિન્નાનિ સર્વતઃ સંસ્થિતાનિ વૈ ॥ ૨૭॥

વ્યાપ્યરૂપાણિ ચાણ્ડાનિ વ્યાપકશ્ચ ગુણેશ્વરઃ ।
તયોરભેદભાવે સા પ્રકૃતિર્બ્રહ્મબિન્દુકમ્ ॥ ૨૮॥

જાગ્રતા સૃષ્ટમાકાશં બ્રહ્મ સર્વપ્રકાશમ્ ।
શબ્દમાત્રમયં ભૂતમાદિરૂપં સનાતનમ્ ॥ ૨૯॥

આકાશેન ચ સંસૃષ્ટો વાયુઃ સ્પર્શગુણાત્મવાન્ ।

વાયુના રૂપતન્માત્રં તેજઃ સૃષ્ટં પ્રકાશવત્ ॥ ૩૦॥

તેજસા રસસંયુક્તા આપઃ સૃષ્ટાઃ પ્રસારિણા ।
અદ્ભિર્ગન્ધગુણા પૃથ્વી સૃષ્ટા ધારણધર્મિકા ॥ ૩૧॥

તત્રૈકૈકપ્રવેશેન પઞ્ચીકરણભાગતઃ ।
પૃથ્વી પઞ્ચગુણા જાતા ચતુર્ભૂતપ્રવેશનાત્ ॥ ૩૨॥

આપશ્ચતુર્ગુણા જાતાસ્ત્રયાણાં સમ્પ્રવેશનાત્ ।
તેજસ્ત્રિગુણતાં પ્રાપ્તં ભૂતયોશ્ચ પ્રવેશનાત્ ॥ ૩૩॥

વાયુર્દ્વિગુણવાન્ જાત આકાશસ્ય પ્રવેશનાત્ ।
આકાશમેકગુણભૃદ્ભૂતાનાં બ્રહ્મસંજ્ઞિતમ્ ॥ ૩૪॥

પઞ્ચ ભૂતાનિ જાતાનિ વ્યવસ્થાસંયુતાનિ ચ ।
અષ્ટધા પ્રકૃતિઃ પ્રોક્તા કોશરૂપા સુશોભના ॥ ૩૫॥

તત્ર કોશીસ્વરૂપેણ ગુણેશો બિમ્બિતો યતઃ ।
તેન સામર્થ્યમાપ્રાપ્રા પ્રકૃતિશ્ચાષ્ટરૂપિણી ॥ ૩૬॥

અષ્ટાવરણસંયુક્તમણ્ડં સૃષ્ટં સ્વભાવતઃ ।
તત્રૈવ પુરુષો જજ્ઞે વિરાટ્ સ ભગવાન્ શિવે ॥ ૩૭॥

પઞ્ચાશત્કોટિવિસ્તારઃ પૃથ્વ્યાઃ પ્રોક્તો મયા ચ તે ।
આપો દશાધિકાસ્તસ્યાસ્તેજસ્તાભ્યો દશાધિકમ્ ॥ ૩૮॥

તસ્માદ્દશાધિકો વાયુસ્તસ્માત્સ્વં વૈ દશાધિકમ્ ।
તસ્માદ્દશાધિકં જાગ્રદભિમાનં પ્રકથ્યતે ॥ ૩૯॥

તસ્માદ્દશાધિકં સ્વાપ્નં મહત્તત્વમિતિ સ્મૃતમ્ ।
દ્વિતીયં નામ તસ્યાપિ કથ્યતે મુનિભિઃ સદા ॥ ૪૦॥

(Page ખં. ૧ અ. ૧૦ પાન ૨૫)
તસ્માદ્દશગુણા માયા જ્ઞેયા સૌષુપ્તિકાઽધિકા ।
ગુણેશઃ પુરુષો જ્ઞેયોઽનન્તોઽપારશ્ચતુર્થકઃ ॥ ૪૧॥

વિરાડાવરણં કૃત્વા સ્થિતા પૃથ્વી સનાતના ।
અદ્ભિઃ સમાવૃતા પૃથ્વી તેજસાપઃ સમાવૃતાઃ ॥ ૪૨॥

વાયુના ચાવૃતં તેજઃ ખેન વાયુઃ સમાવૃતઃ ।
અહઙ્કારેણ સંવૃત્તમાકાશં દેવિ સર્વતઃ ॥ ૪૩॥

અહઙ્કારશ્ચ મહતા સંવૃતો રાજસઃ સ્વયમ્ ।
માયયા ચ મહત્તત્ત્વં સંવૃતં સ્વપ્નસંજ્ઞિતમ્ ॥ ૪૪॥

માયાવરણમાન્ત્યં ચ જ્ઞાતવ્યં વિબુધૈઃ પરમ્ ।
અષ્ટાવરણસંયુક્તમણ્ડં તે કથિતં મયા ॥ ૪૫॥

અણ્ડાન્યેતાદૃશાન્યેવાસઙ્ખ્યાતાનિ પ્રિયે બભુઃ ।
તિર્યગૂર્ધ્વમધસ્તદ્વદ્ ગુણેશેન ધૃતાનિ ચ ॥ ૪૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે અષ્ટધા પ્રકૃતિવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૧.૯

## ૧.૧૦ નાનાબ્રહ્માણ્ડવર્ણનં નામ દશમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

પાર્વત્યુવાચ ।
શ્રોતુમિચ્છામિ સર્વેશ વિરાજશ્ચ સ્વરૂપકમ્ ।
કીદૃશોઽયં મહાભાગ તન્મે કથય શઙ્કર ॥ ૧॥

શિવ ઉવાચ ।
પઞ્ચકોટિપ્રવિસ્તારે યોજનાનાં સમન્તતઃ ।
તસ્ય દેહે ચ ભૂતાનિ સ્થાવરાણિ ચરાણિ ચ ॥ ૨॥

સંસ્થિતાનિ ચ સર્વાણિ ભુવનાનિ ચતુર્દશ ।
તત્તેઽહં સમ્પ્રવક્ષ્યામિ સમાહિતમનાઃ શ ૃણુ ॥ ૩॥

પાદયોસ્તસ્ય પાતાલં ગુલ્ફે તસ્ય રસાતલમ્ ।
પાષ્ણ્યોર્મહાતલં તસ્ય જઙ્ઘયોશ્ચ તલાતલમ્ ॥ ૪॥

સુતલં જાનુભાગેઽસ્ય વિતલં તૂરુમણ્ડલે ।
અતલં કટિસન્ધૌ ચ કટ્યાં ભૂલોકસંસ્થિતિઃ ॥ ૫॥

નાભૌ તસ્ય ભુવર્લોકઃ સ્વર્લોકશ્ચ હૃદિ સ્થિતઃ ।
મહર્લોકશ્ચ કણ્ઠે વૈ જનો લોકો મુખે સ્થિતઃ ॥ ૬॥

તપો લોકો લલાટે ચ સત્યલોકઃ શિરઃસ્થિતઃ ।
એતાવદ્દેહરૂપો વૈ વિરાટ્ સ પુરુષો મહાન્ ॥ ૭॥

સહસ્રશીર્ષશોભાઢ્યઃ સહસ્રાનનપાદવાન્ ।
સહસ્રહસ્તકર્ણઃ સ સહસ્રોદરવાન્ પ્રભુઃ ॥ ૮॥

સર્વત્ર વ્યાપ્યભાવેન સ્થિતોઽસૌ પરમેશ્વરઃ ।
મર્ત્યેષ્વમૃતભોક્તા ચ સ્વપ્રકાશેન વર્તતે ॥ ૯॥

તસ્યાન્તરે સ્થિતં રૂપં નામ્ના હૈરણ્યગર્ભકમ્ ।
એતાદૃશં તથા સ્વપ્નં વિશ્વરૂપં વિરાજતિ ॥ ૧૦॥

બહિર્વૈશ્વાનરશ્ચાયં જાગ્રદ્વૈરાટસંજ્ઞિતઃ ।
હિરણ્યગર્ભકોશસ્થઃ સ્વપ્નવૈરાટધારકઃ ॥ ૧૧॥

ઉભયોઃ સમભાવેન બાહ્યાન્તરસરૂપતઃ ।
ઈશ્વરો નામ વૈરાટઃ સુષુપ્તેર્ધારકો બભૌ ॥ ૧૨॥

ત્રિવિધં યદ્વિરાડ્ રૂપં કથિતં તે તુ પાર્વતિ ।
(Page ખં. ૧ અ. ૧૦ પાન ૨૬)
તુરીયમાત્મરૂપં યત્ ત્રિવિધેષુ પ્રવર્તતે ॥ ૧૩॥

અથ શ ૃણુ વિભિન્નાનામુત્પત્તિં ત્વલ્પભાવનામ્ ।
નાનાભાવધરાં તાં વૈ ચરાચરમયીં પરામ્ ॥ ૧૪॥

વિરાડજ્ઞાનભાવેનાવૃતસ્તેન તપઃ કૃતમ્ ।
એકાક્ષરવિધાનેન ગણેશં સન્દધૌ હૃદિ ॥ ૧૫॥

સોઽતપત્તપ ઉગ્રં ચ દિવ્યવર્ષસહસ્રકમ્ ।
તપસા ધ્યાનભાવેન પ્રત્યક્ષો ગણપોઽભવત્ ॥ ૧૬॥

બોધયામાસ તં દેવો વરં બ્રૂહીતિ સોઽબ્રવીત્ ।
ગણેશં સહસા દૃષ્ટ્વા પાદયોઃ પ્રણનામ તમ્ ॥ ૧૭॥

ધન્યં જન્મ તપો મેઽદ્ય ધન્યં જ્ઞાનં વપુશ્ચ દૃક્ ।
ધન્યા મે સમ્પદો દેવ ત્વદઙ્ઘ્રિયુગદર્શનાત્ ॥ ૧૮॥

ઇત્યુક્ત્વા સ્તોતુમારેભે ગણેશં બ્રહ્મનાયકમ્ ।
વાચા સંસ્પષ્ટયા હૃષ્ટો ભગવાન્ વિશ્વધારકઃ ॥ ૧૯॥

વિરાડુવાચ ।
નમસ્તે ગણનાથાય ગણાનાં પતયે નમઃ ।
વિઘ્નેશાય પરેશાય વિઘ્નહર્ત્રે નમો નમઃ ॥ ૨૦॥

સિદ્ધિબુદ્ધિપતે તુભ્યં નાનાસિદ્ધિપ્રદાયિને ।
નાનાજ્ઞાનપ્રદાત્રે ચ બ્રહ્મણે બ્રહ્મરૂપિણે ॥ ૨૧॥

મનોવાગતિભૂતાય યોગિનાં હૃદિ વાસિને ।
નાનાવતારકર્ત્રે ચ ભક્તસંરક્ષકાય તે ॥ ૨૨॥

નમો નમો મહેશાય શિવાય શિવદાયિને ।
સર્વત્ર સમભાવાય વિષ્ણવે પ્રભવિષ્ણવે ॥ ૨૩॥

તેજોરાશિપતે તુભ્યં ભાનવે તે નમો નમઃ ।
નાનામાયાપ્રભેદાત્મશક્તયે શક્તિરૂપિણે ॥ ૨૪॥

સ્રષ્ટ્રે પાત્રે ચ સંહર્ત્રે ચરાચરમયાય ચ ।
સર્વેભ્યો જ્ઞાનદાત્રે ચ નિર્મલાય નમો નમઃ ॥ ૨૫॥

સર્વેભ્યો ભિન્નરૂપાય માયાહીનાય તે નમઃ ।
માયિભ્યો મોહદાત્રે ચ માયાધારાય તે નમઃ ॥ ૨૬॥

ગુણાન્તં ન યયુર્યસ્ય નાનાબ્રહ્માણિ તે નમઃ ।
અતો મયિ ગણેશાન કૃપયાઽનુગ્રહં કુરુ ॥ ૨૭॥

ઇતિ સ્તુત્વા ગણેશાનં મૌનવાનભવત્સ્વયમ્ ।
વૈરાટઃ પુરુષસ્તત્ર કૃતાઞ્જલિપુટઃ સ્થિતઃ ॥ ૨૮॥

ભગવાંસ્તં ગણેશાન ઊચિવાન્ ભક્તિભાવિતઃ ।
વરં વરય દાસ્યામિ શઙ્કાં મા કુરુ વિશ્વપ ॥ ૨૯॥

ઇદં ત્વયા કૃતં સ્તોત્રં મમ પ્રીતિકરં ભવેત્ ।
યઃ પઠેદ્ભાવપૂર્વં તુ સિદ્ધિસ્તસ્ય ભવિષ્યતિ ॥ ૩૦॥

યં યં ચિન્તયતે કામં તં તં દાસ્યામિ વાઞ્છિતમ્ ।
ભુક્તિમુક્તિપ્રદં ભાવિ પઠનાચ્છ્રવણાદપિ ॥ ૩૧॥

ઇત્યુક્તવન્તં ગણનાથમાદ્યં વૈરાટદેવઃ પ્રણનામ તં વૈ ।
ભાવેન યુક્તો વચનં જગાદ હૃષ્ટઃ સ્વયં વિઘ્નહરં પ્રભું ચ ॥ ૩૨॥

વૈરાટ ઉવાચ ।
યદિ તુષ્ટોઽસિ દેવેશ યદિ દેયો વરો મહાન્ ।
તવ ભક્તિં દૃઢાં દેહિ યયા મોહો વિનશ્યતિ ॥ ૩૩॥

અતુલં સર્જનં સૃષ્ટેઃ પાલનં હરણં તથા ।

કરોમિ ત્વત્પ્રસાદેન ભક્તેભ્યો ભુક્તિમુક્તિદ ॥ ૩૪॥

ઐશ્વર્યમતુલં દેહિ ગજાનન મહાપ્રભો ।
યં યમિચ્છામિ તત્સર્વં સિધ્યતુ ત્વત્પ્રસાદતઃ ॥ ૩૫॥

શિવ ઉવાચ ।
તથેતિ વચનં ચોક્ત્વા ગણેશોન્તરધીયત ।
વિરાટ્ હર્ષેણ સંયુક્તો ગણેશં હૃદ્યભાવયત્ ॥ ૩૬॥

એવં દેવિ ચ સર્વત્ર નાનાણ્ડેષુ સ્થિતૈઃ પરૈઃ ।
વૈરાટૈસ્તૈઃ કૃતં પૂર્ણં ગણેશતપ ઉત્તમમ્ ॥ ૩૭॥

તેન સર્વે મહાત્માનઃ સ્વસ્વકર્મણિ સંસ્થિતાઃ ।
નિર્વિઘ્ના વરદાનેન ભગવન્તઃ સનાતનાઃ ॥ ૩૮॥

અનન્તાનિ પ્રજાનીહિ બ્રહ્માણ્ડાનિ ન શક્યતે ।
વક્તું કેનાપિ હેરમ્બં વિના તાનિ યથાયથમ્ ॥ ૩૯॥

સતતં ગણનાથોઽપિ ન સઙ્ખ્યાતું પ્રવર્તતે ।
ગણના શબ્દશાસ્ત્રેષુ યાવતી હ્યધિકં તતઃ ॥ ૪૦॥

અતઃ કેનાપિ સઙ્ખ્યાનં ન કૃતં વેદવાદિના ।
અનન્તાનિ મહાણ્ડાનિ જ્ઞાતવ્યાનિ જગન્મયિ ॥ ૪૧॥

એવં પ્રભાવયુક્તોઽસૌ હૃદયે મે પ્રવર્તતે ।
ગણેશો ધ્યાનલોભી ચ ભક્તેશો ભક્તવત્સલઃ ॥ ૪૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે નાનાબ્રહ્માણ્ડવર્ણનં નામ દશમોઽધ્યાયઃ ॥ ૧.૧૦

## ૧.૧૧ પઞ્ચદેવવરપ્રદાનં નામૈકાદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

પાર્વત્યુવાચ ।
ભગવન્ દેવદેવેશ કૃપાં કૃત્વા વદસ્વ મે ।
વૈરાટેન કથં સૃષ્ટં જગત્સ્થાવરજઙ્ગમમ્ ॥ ૧॥

અન્યચ્ચ બ્રૂહિ મે નાથ ધ્યાનમાર્ગં પુરાતનમ્ ।
યેન સાક્ષાત્કરિષ્યામિ ગણેશં નાઽત્ર સંશયઃ ॥ ૨॥

મુદ્ગલ ઉવાચ ।
ઇતિ પૃષ્ટો મહાદેવ્યા મહાદેવઃ પ્રહૃષ્ટવાન્ ।
કથાં પરમપુણ્યાં ચ કથયામાસ તાં શ‍ૃણુ ॥ ૩॥

દક્ષ ઉવાચ ।
ગણેશસ્ય કથાં શ્રુત્વા હર્ષશ્ચેતસિ જાયતે ।
કથયસ્વ મહાભાગ શિવેન કથિતં તુ યત્ ॥ ૪॥

મુદ્ગલ ઉવાચ ।
ધન્યોઽસિ દક્ષ લોકેષુ યેન સાદરતા ચ તે ।
ગણેશેઽમૃતધારાયાં કથાયાં નાઽત્ર સંશયઃ ॥ ૫॥

પ્રહૃષ્ટાં ગિરિજાં દૃષ્ટ્વા શિવો વચનમબ્રવીત્ ।
ધન્યા ધન્યા મહાભાગે શ‍ૃણુ સાદરમાદિતઃ ॥ ૬॥

શિવ ઉવાચ ।
ગણેશં મનસા ધ્યાત્વા વૈરાટઃ સ્રષ્ટુમારભત્ ।
તસ્ય નાભેઃ સમુત્પન્નો બ્રહ્મા લોકપિતામહઃ ॥ ૭॥

મુખાદ્વિષ્ણુર્જગત્પાતા નેત્રાચ્ચાઽહં હરોઽભવમ્ ।
સૃષ્ટિસ્થિતિલયાધારાસ્ત્રિરૂપગુણધારકાઃ ॥ ૮॥

વામાઙ્ગાચ્છક્તિરુત્પન્ના ત્વં વૈ પાર્વતિ મોહિની ।
દક્ષિણાઙ્ગાદ્રવિઃ સાક્ષાત્કર્માધારઃ સમાભવત્ ॥ ૯॥

પઞ્ચ દેવાઃ સમુત્પન્ના ભિન્ના જાતાઃ સ્વભાવતઃ ।
ન વિદુઃ કિઞ્ચિદાત્માનં વૈરાટં ચાપિ શોભને ॥ ૧૦॥

અન્ધે તમસિ સર્વત્ર બભ્રમુર્બહુકાલતઃ ।
ન કિઞ્ચિત્પ્રાપુરાયાસાત્ સ્થિતાઃ પરમદુઃખિતાઃ ॥ ૧૧॥

કિં કર્તવ્યં ક્વ ગન્તવ્યમજ્ઞાનેનાવૃતા ભૃશમ્ ।
કસ્માદ્વયં સમુત્પન્ના ન જાનીમો મહાપ્રભુમ્ ॥ ૧૨॥

અથ ચિન્તયતાં તેષાં બુદ્ધિર્જાતા સુનિશ્ચિતા ।
તપઃ કર્તું સમારબ્ધં યસ્મૈ કસ્મૈ નમોસ્ત્વિતિ ॥ ૧૩॥

સર્વેષાં મૂલભૂતં યદ્યાદૃશં તાદૃશં ખલુ ।
(Page ખં. ૧ અ. ૧૧ પાન ૨૮)

સ્વધીસ્થં તત્સમાચિન્ત્ય તપસ્તપ્તં સુદારુણમ્ ॥ ૧૪॥

તપસા ગણનાથસ્તુ પ્રસન્નોંઽતરમાશ્રિતઃ ।
તત્ર દૃષ્ટિઃ સમુત્પન્ના તેષાં વૈ ભાવિતાત્મનામ્ ॥ ૧૫॥

હૃદયે બીજરૂપં યત્સ્ફુરત્તદ્ દૃષ્ટમદ્ભુતમ્ ।
એકાક્ષરં મહામન્ત્રં પ્રાપ્ય તં હર્ષમાયયુઃ ॥ ૧૬॥

તં મન્ત્રં જપમાનૈસ્તૈસ્તદારભ્ય જગન્મયિ ।
તેન મન્ત્રપ્રભાવેણ જ્ઞાનં પ્રાપ્તં સુનિર્મલમ્ ॥ ૧૭॥

દિવ્યવર્ષસહસ્રેણ પ્રત્યક્ષઃ સમજાયત ।
ગણેશો ભક્તિભાવેન પુરસ્તેષાં સમુત્થિતઃ ॥ ૧૮॥

અનન્તકોટિસૂર્યોજાઃ શુણ્ડાદણ્ડવિરાજિતઃ ।
ચતુર્બાહુધરો લમ્બોદરઃ સાક્ષાત્ વિભૂષિતઃ ॥ ૧૯॥

ભૂષણૈરાયુધૈશ્ચૈવ સિદ્ધિબુદ્ધિસમન્વિતઃ ।
ભક્તાનન્દકરઃ શ્રીમાનાખુવાહો મહાદ્યુતિઃ ॥ ૨૦॥

તં દૃષ્ટ્વા ભયભીતાસ્તે દેવાઃ શમ્ભુપુરોગમાઃ ।
કિમિદં તેજ આયાતિ પ્રલયાગ્નિસમં મહત્ ॥ ૨૧॥

અસ્માન્ ધક્ષ્યતિ કિં દેવઃ વિઘ્નેશ કરુણાનિધે ।
તવ ભક્તા વયં સ્વામિન્ કથં વિઘ્નેન ભાવિતાઃ ॥ ૨૨॥

ઇતિ તેષાં વચઃ શ્રુત્વા ત્વભવત્સૌમ્યરૂપવાન્ ।
તં દૃષ્ટ્વા હર્ષિતાઃ સર્વે પ્રણેમુર્ભાવપૂર્વકમ્ ॥ ૨૩॥

ગણેશદર્શનેનૈવ સ્ફૂર્તિઃ પ્રાપ્તા મહાદ્ભુતા ।
તયા સર્વે યથાતથ્યં જ્ઞાતં તૈઃ પઞ્ચભિઃ પુરઃ ॥ ૨૪॥

તતસ્તં તુષ્ટુવુઃ સર્વે ભક્તિનમ્રાત્મકન્ધરાઃ ।
હૃષ્ટરોમાણ એવં તે સ્રવદશ્રુજલાવિલાઃ ॥ ૨૫॥

પઞ્ચદેવા ઊચુઃ ।
નમસ્તે વિઘ્નરાજાય ભક્તાનાં વિઘ્નહારિણે ।
વિઘ્નકર્ત્રે હ્યભક્તાનાં ગણેશાય નમો નમઃ ॥ ૨૬॥

હેરમ્બાય નમસ્તુભ્યં ઢુઢિરાજાય તે નમઃ ।
વિનાયકાય દેવાય બ્રહ્મણાં નાયકાય ચ ॥ ૨૭॥

લમ્બોદરાય સિદ્ધેશ ગજાનનધરાય ચ ।
શૂર્પકર્ણાય ગૂઢાય ચતુર્હસ્ત નમોઽસ્તુ તે ॥ ૨૮॥

લમ્બોષ્ઠાયૈકદન્તાય સર્વેશાય ગણાધિપ ।
અનન્તમહિમાધાર ધરણીધર તે નમઃ ॥ ૨૯॥

નમો માયામયાયૈવ માયાહીનાય તે નમઃ ।
મોહદાય નમસ્તુભ્યં મોહહન્ત્રે નમો નમઃ ॥ ૩૦॥

પઞ્ચભૂતમયાયૈવ પઞ્ચભૂતધરાય ચ ।
ઇન્દ્રિયાણાં ચાધિપાયેન્દ્રિયજ્ઞાનપ્રકારિણે ॥ ૩૧॥

અધ્યાત્મનેઽધિભૂતાયાધિદૈવાય ચ તે નમઃ ।
અન્નાયાન્નપતે તુભ્યમન્નાન્નાય નમો નમઃ ॥ ૩૨॥

પ્રાણાય પ્રાણનાથાય પ્રાણાનાં પ્રાણરૂપિણે ।
ચિત્તાય ચિત્તહીનાય ચિત્તેભ્યશ્ચિત્તદાયિને ॥ ૩૨॥

વિજ્ઞાનાય ચ વિજ્ઞાનપતયે દ્વન્દ્વધારિણે ।
વિજ્ઞાનેભ્યઃ સ્વવિજ્ઞાનદાયિને તે નમો નમઃ ॥ ૩૪॥

આનન્દાય નમસ્તુભ્યમાનન્દપતયે નમઃ ।
આનન્દાનન્દદાત્રે ચ કારણાય નમો નમઃ ॥ ૩૫॥

ચૈતન્યાય ચ યત્નાય ચેતનાધારિણે નમઃ ।
ચૈતન્યેભ્યઃ સ્વચૈતન્યદાયિને નાદરૂપિણે ॥ ૩૬॥

બિન્દુમાત્રાય બિન્દૂનાં પતયે પ્રાકૃતાય ચ ।
ભેદાભેદમયાયૈવ જ્યોતીરૂપાય તે નમઃ ॥ ૩૭॥

સોઽહમ્માત્રાય શૂન્યાય શૂન્યાધારાય દેહિને ।
શૂન્યાનાં શૂન્યરૂપાય પુરુષાય નમો નમઃ ॥ ૩૮॥

જ્ઞાનાય બોધનાથાય બોધાનાં બોધકારિણે ।
મનોવાણીવિહીનાય સર્વાત્મક નમો નમઃ ॥ ૩૯॥

વિદેહાય નમસ્તુભ્યં વિદેહાધારકાય ચ ।
વિદેહાનાં વિદેહાય સાઙ્ખ્યરૂપાય તે નમઃ ॥ ૪૦॥

(Page ખં. ૧ અ. ૧૧ પાન ૨૯)

નાનાભેદધરાયૈવ ચૈકાનેકાદિમૂર્તયે ।
અસત્સ્વાનન્દરૂપાય શક્તિરૂપાય તે નમઃ ॥ ૪૧॥

અમૃતાય સદાખણ્ડભેદાભેદવિવર્જિત ।
સદાત્મરૂપિણે સૂર્યરૂપાધારાય તે નમઃ ॥ ૪૨॥

સત્યાસત્યવિહીનાય સમસ્વાનન્દમૂર્તયે ।
આનન્દાનન્દકન્દાય વિષ્ણવે તે નમો નમઃ ॥ ૪૩॥

અવ્યક્તાય પરેશાય નેતિનેતિમયાય ચ ।
શિવાય શાશ્વતાયૈવ મોહહીનાય તે નમઃ ॥ ૪૪॥

સંયોગેન ચ સર્વત્ર સમાધૌ રૂપધારિણે ।
સ્વાનન્દાય નમસ્તુભ્યં મૌનભાવપ્રદાયિને ॥ ૪૫॥

અયોગાય નમસ્તુભ્યં નિરાલમ્બસ્વરૂપિણે ।
માયાહીનાય દેવાય નમસ્તે હ્યસમાધયે ॥ ૪૬॥

શાન્તિદાય નમસ્તુભ્યં પૂર્ણશાન્તિપ્રદાય તે ।
યોગાનાં પતયે ચૈવ યોગરૂપાય તે નમઃ ॥ ૪૭॥

ગણેશાય પરેશાય હ્યપારગુણકીર્તયે ।
યોગશાન્તિપ્રદાત્રે ચ મહાયોગાય તે નમઃ ॥ ૪૮॥

ગુણાન્તં ન યયુર્યસ્ય વેદાદ્યા વેદકારકાઃ ।
સ કસ્ય સ્તવનીયઃ સ્યાદ્યથામતિ તથા સ્તુતઃ ॥ ૪૯॥

તેન વૈ ભગવાન્ સાક્ષાચ્ચિન્તામણિગજાનનઃ ।
પ્રસન્નો ભવતુ ત્રાતાઽસ્માકં ત્વં પરમા ગતિઃ ॥ ૫૦॥

ઇત્યેવમુક્ત્વા દેવેશાસ્તૂષ્ણીં ભૂતાસ્તથા શિવે ।
ગણેશોઽપિ પ્રસન્નાત્મા હૃષ્ટઃ સન્ પ્રત્યુવાચ તાન્ ॥ ૫૧॥

શ્રીગણેશ ઉવાચ ।
પઞ્ચદેવા મહાભાગાઃ પ્રસન્નો ભવતાં સ્તવૈઃ ।
તપસા ચ તથા ભક્ત્યા વાઞ્છિતં બ્રૂત વૈ વરમ્ ॥ ૫૨॥

ભવત્કૃતમિદં સ્તોત્રં પરમાલ્હાદવર્ધનમ્ ।
મમ પ્રીતિકરં ભક્ત્યા સર્વદં પ્રભવિષ્યતિ ॥ ૫૩॥

યઃ પઠેદ્ભાવપૂર્વં સ ધર્મકામાર્થમોક્ષભાક્ ।

પુત્રપૌત્રયુતઃ શ્રીમાનન્તે સ્વાનન્દમાપ્નુયાત્ ॥ ૫૪॥

સપ્તવારં પઠેન્નિત્યમેકવિંશતિવાસરમ્ ।
કારાગૃહગતો વાઽપિ મુચ્યતે બન્ધનાત્ સ્વયમ્ ॥ ૫૫॥

એકકાલં દ્વિકાલં વા ત્રિકાલમપિ યઃ પઠેત્ ।
સ વૈ દેવાદિકૈર્વન્દ્યો ભવિષ્યતિ ન સંશયઃ ॥ ૫૬॥

મારણોચ્ચાટનાદિભ્ય એકવિંશતિવારતઃ ।
તાવદ્દિનાનિ પાઠેન તસ્ય નૈવ ભયં ભવેત્ ॥ ૫૭॥

ધનધાન્યાદિકં સર્વમ્મારોગ્યં પશુવર્ધનમ્ ।
યં યં ચિન્તયતે કામં તં તં પ્રાપ્નોતિ નિશ્ચિતમ્ ॥ ૫૮॥

શિવ ઉવાચ ।
ગણેશવચનં શ્રુત્વા હૃષ્ટા વિષ્ણ્વાદયઃ સુરાઃ ।
પ્રણિપત્ય ગણાધીશં કૃતાઞ્જલિપુટા જગુઃ ॥ ૫૯॥

પઞ્ચદેવા ઊચુઃ ।
સનાથા હિ વયં જાતાઃ સર્વે ત્વય્યાગતે પ્રભો ।
વરં દેહિ ગણાધીશ તવ ભક્તિં દૃઢાં તથા ॥ ૬૦॥

તેન માયા ન બાધેત નરાન્ દેવાનપિ પ્રભો ।
કિમસ્માભિઃ પ્રકર્તવ્યં તદાજ્ઞાપય સર્વદા ॥ ૬૧॥

સામર્થ્યં વિવિધં દેહિ ભજતાં કામપૂરણમ્ ।
સ્થાનં સદાનન્દનામ દેહિ નાથ નમોઽસ્તુ તે ॥ ૬૨॥

ગણેશ ઉવાચ ।
ચતુર્મુખ મહાબાહો રજોગુણસમુદ્ભવ ।
સૃષ્ટિકર્તા ભવ ત્વં વૈ બ્રહ્મા નામ્ના મહાદ્યુતે ॥ ૬૩॥

સત્યલોકનિવાસી તુ હંસવાહનવાન્ ભવ ।
વેદાદિજ્ઞાનયુક્તશ્ચ સર્વેષાં ત્વં પિતામહઃ ॥ ૬૪॥

ચતુર્ભુજોઽસિ દેવેશ ત્વં વૈ સત્ત્વસમુદ્ભવઃ ।
પાલકઃ સર્વલોકાનાં વિષ્ણુનામા ભવિષ્યસિ ॥ ૬૫॥

વૈકુણ્ઠે વસતિસ્તે સ્યાત્ વાહનં ગરુડસ્તવ ।
(Page ખં. ૧ અ. ૧૧ પાન ૩૦)

નાનાવતારવાંશ્ચાપિ ભવિષ્યસિ મહાબલઃ ॥ ૬૬॥

પઞ્ચવક્ત્ર મહાતેજસ્તમોગુણસમુદ્ભવ ।
સંહારકારકો નિત્યં હરનામા ભવિષ્યસિ ॥ ૬૭॥

કૈલાસે વસતિસ્તેઽસ્તુ વાહનં વૃષભસ્તથા ।
તૃતીયેન સ્વનેત્રેણ સર્વં ભસ્મીકરિષ્યસિ ॥ ૬૮॥

સહસ્રકિરણ ત્વં વૈ સૂર્યનામા ભવિષ્યસિ ।
કર્મણાં ચાલકત્વાત્ ષડૃતુધર્મપ્રકાશકઃ ॥ ૬૯॥

ત્રિગુણાનામહમ્ભાવાત્ત્વં જાતોઽસિ પ્રકાશકઃ ।
રથોશ્વાલઙ્કૃતશ્ચાપિ વાહનં તે ભવિષ્યતિ ॥ ૭૦॥

સૌરલોકે નિવાસશ્ચ ગ્રહરાજો ભવિષ્યસિ ।
વૃષ્ટિમૂલં ત્વમેઽવાસિ તેજોરાશિઃ પ્રતાપવાન્ ॥ ૭૧॥

ચતુર્ભુજે મહાશક્તે ત્વં જાતાઽસિ ત્રિદેહતઃ ।
નાનાવિષયભોગાર્થં સદેહા મોહકારિણી ॥ ૭૨॥

શક્તિનામ્ની મહામાયા ભવિષ્યસિ ન સંશયઃ ।
દ્વિધા મોહપ્રદાત્રી ત્વં ભુક્તિમુક્તિભ્રમાત્મિકા ॥ ૭૩॥

સિંહવાહનગા નિત્યં શક્તિલોકનિવાસિની ।
નાનાભોગવિમોહેન જગત્ત્વં મોહયિષ્યસિ ॥ ૭૪॥

મહાકાર્યે સમુત્પન્ને પ્રત્યક્ષોઽહં ભવામિ વૈ ।
મત્તુલ્યાઃ સર્વભાવેન કૃતા દેવા ન સંશયઃ ॥ ૭૫॥

આયુધં ભૂષણં શ્રેષ્ઠં નાનાસામર્થ્યમદ્ભુતમ્ ।
સઙ્કલ્પસિદ્ધતાં ચૈવ દદૌ તેભ્યો ગણાધિપઃ ॥ ૭૬॥

શિવ ઉવાચ ।
ઇતિ દત્ત્વા વરાન્ દેવો ગણેશોંઽતર્દધે સ્વયમ્ ।
તેઽપિ હૃષ્ટા નિજાત્માનં કૃતકૃત્યં ચ મેનિરે ॥ ૭૭॥

ભજતાં ભક્તિભાવેન કામપૂરાઃ કૃતા વયમ્ ।
પરમેશ્વરતાં પ્રાપ્તાઃ પ્રસાદાદ્ગણપસ્ય ચ ॥ ૭૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે પઞ્ચદેવવરપ્રદાનં નામૈકાદશોઽધ્યાયઃ ॥ ૧.૧૧

# ૧.૧૨ બ્રહ્મવિષ્ણુવિવાદો નામ દ્વાદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શૌનક ઉવાચ ।
સૂત સૂત મહાપ્રાજ્ઞ પરમાનન્દદાયક ।
કથામમૃતરૂપાં ચ કથયસ્વ મહાદ્યુતે ॥ ૧॥

વયં પ્રસન્નતાં યાતાઃ કૃતકૃત્યા યથા તથા ।
સુકથામૃતપાનેન સ્વાનન્દેન પરિપ્લુતાઃ ॥ ૨॥

કથયસ્વ કથાં દિવ્યાં પઞ્ચદેવૈશ્ચ કિં કૃતમ્ ।
વિસ્તારેણ યથાન્યાયં યેન મુક્તા ભવામ ચ ॥ ૩॥

શ્રુત્વા તેષાં મુનીનાં ચ વચનં ભક્તિભાવિતમ્ ।
હૃષ્ટઃ સૂતઃ પુનઃ પ્રાહ કથાં પાપપ્રણાશિનીમ્ ॥ ૪॥

સૂત ઉવાચ ।
એવમેવ સ દક્ષેણ પૃષ્ટો યોગીશ્વરો મહાન્ ।
મુદ્ગલસ્તં યથોવાચ તથા વચ્મિ મહામુને ॥ ૫॥

મુદ્ગલ ઉવાચ ।
શ‌ૃણુ દક્ષ મહાભાગ પાર્વત્યા શિવસન્નિધૌ ।
યત્પૃષ્ટં યચ્છ્રુતં સર્વં કથયામિ સવિસ્તરમ્ ॥ ૬॥

(Page ખં. ૧ અ. ૧૨ પાન ૩૧)
પાર્વત્યુવાચ ।
ભગવન્ દેવદેવેશ તારિતાઽહં ત્વયા પ્રભો ।
સુકથામૃતપાનેન કૃતકૃત્યાઽસ્મિ સામ્પ્રતમ્ ॥ ૭॥

પઞ્ચ દેવાઃ સમર્થાશ્ચ પ્રાભવન્ વરદાનતઃ ।
કિં ચક્રુસ્તે મહાત્માનઃ કથયસ્વ વિધાનતઃ ॥ ૮॥

ગણેશભક્તિયુક્તં ચેચ્ચરિતં કથયસ્વ મે ।
અથવા ગાણપત્યાનાં ચરિતં બ્રહ્મદાયકમ્ ॥ ૯॥

વ્યર્થસંલપનેનાયુર્નાશઃ કાર્યો ન શોભનૈઃ ।
ધન્યાસ્તે સાધવો લોકા ગણરાડ્ભક્તિભાવિતાઃ ॥ ૧૦॥

મુદ્ગલ ઉવાચ ।
પ્રિયાયા વચનં શ્રુત્વાઽતિહૃષ્ટઃ સ મહેશ્વરઃ ।
ઉવાચ સ્મયમાનશ્ચાલિઙ્ગ્ય દેવીં મહાયશાઃ ॥ ૧૧॥

શિવ ઉવાચ ।
ધન્યાઽસિ પાર્વતિ ત્વં ચ સાર્થકં જન્મ તે પરમ્ ।
ભક્ત્યા ધૃતો ગણેશોઽયં હૃદિ તેન વરાનને ॥ ૧૨॥

ગણેશભક્તિયુક્તા યે નરાસ્તે બ્રહ્મરૂપિણઃ ।
દર્શનાન્મુક્તિદાતારઃ સર્વેભ્યો નાત્ર સંશયઃ ॥ ૧૩॥

ગણેશં યઃ પરિત્યજ્ય સિદ્ધિમિચ્છતિ શાશ્વતીમ્ ।
સ મૂઢાત્મા તુ વિજ્ઞેયો નારકી નાત્ર સંશયઃ ॥ ૧૪॥

અન્યદેવસ્ય યે ભક્તા ગણેશં નાર્ચયન્તિ ચેત્ ।
તેષાં ન ભવિતા સિદ્ધિર્નરકેષુ પતન્તિ તે ॥ ૧૫॥

સુધાં સન્ત્યજ્ય રૂક્ષાન્નં સેવતે દુર્મતિર્યથા ।
ગણેશાનં તથા ત્યક્ત્વાઽન્યસ્ય દેવસ્ય સેવકઃ ॥ ૧૬॥

અસ્માકં જનકો માતા સર્વેષાં નાત્ર સંશયઃ ।
જ્યેષ્ઠરાજ ઇતિ ખ્યાતસ્તેનાદૌ પૂજ્યકોઽભવત્ ॥ ૧૭॥

ત્યક્ત્વા ગણેશં મૂઢાત્મા દેવાદીનપિ પૂજયેત્ ।
ગણેશોલ્લઙ્ઘનાત્તં વૈ ક્ષિપામો નરકે વયમ્ ॥ ૧૮॥

ગણેશનિન્દકો જન્તુરસ્માકં ભક્તિકારકઃ ।
નારકી ભવિતા સદ્યોસ્મદ્ગુરુદ્વેષકારકઃ ॥ ૧૯॥

અતસ્ત્વં ધન્યરૂપાઽસિ સર્વેષાં મૂલબીજકમ્ ।
ભજસિ ત્વં ગણેશાનં ભક્તિભાવસમન્વિતા ॥ ૨૦॥

સત્યં દેવિ ત્વયા પ્રોક્તં ગાણેશાનાં પ્રકીર્તનમ્ ।
ગણેશસ્ય ચ વા કાર્યે તેન જન્મ કૃતાર્થકમ્ ॥ ૨૧॥

ગણેશં પ્રાર્થયામીતિ શ ृણુ ચિન્તામણે પ્રભો ।
ચિત્ત નિવાસકારિન્ વૈ ગજાનન મહોદર ॥ ૨૨॥

ગાણપત્યા મહાભાગાસ્તેષાં સઙ્ગઃ સદાસ્તુ મે ।
તેષાં મધ્યે તથા વાસં દેહિ ત્વં દ્વિરદાનન ॥ ૨૩॥

અગ્રે મે ગાણપત્યાસ્તે પૃષ્ઠે વામે ચ દક્ષિણે ।
સર્વત્ર સહ તૈર્વાસો ગાણપત્યૈર્ભવત્વિતિ ॥ ૨૪॥

યેષાં મુખારવિન્દેષુ ગણેશચરિતં બભૌ ।
ભવબન્ધહરં પૂર્ણમિહાઽમુત્ર સુખપ્રદમ્ ॥ ૨૫॥

ચરિતં ગાણપત્યાનાં ગણરાટ્સેવનાત્મકમ્ ।
અહર્નિશં પ્રભવતિ ચેષ્ટદં ઢુણ્ઢિભક્તિદમ્ ॥ ૨૬॥

તારિતોઽહં ત્વયા દેવિ કથાં પૃચ્છસિ માં પુનઃ ।
ગણેશભક્તિપૂતાં વા ભક્તાનાં તસ્ય ભાવતઃ ॥ ૨૭॥

પ્રષ્ટુઃ શ્રોતુશ્ચ વક્તુર્યા બ્રહ્મભૂયપદપ્રદા ।
ઇહ તાં તુ વદામિ ત્વાં ગાણેશીં સુખદાયિનીમ્ ॥ ૨૮॥

પઞ્ચદેવાસ્તથા જાતા યથા ગણપતિઃ સ્વયમ્ ।
વરદઃ કથયામાસ ઈશ્વરાજ્ઞાનભાવિતાઃ ॥ ૨૯॥

પઞ્ચલોકાઃ સમુદ્ભતા વરદાનપ્રભાવતઃ ।
નિરાધારા અખણ્ડાશ્ચાવસંસ્તેષુ વિભાગશઃ ॥ ૩૦॥

કૈલાસે શઙ્કરશ્ચૈવ વૈકુણ્ઠે વિષ્ણુરેવ ચ ।
સૌરલોકે રવિઃ શક્તિલોકે ચૈવ જગન્મયિ ॥ ૩૧॥

સત્યલોકે તથા બ્રહ્મા વસતિ સ્મ મુદાન્વિતઃ ।
(Page ખં. ૧ અ. ૧૨ પાન ૩૨)
ઐશ્વર્યભોગભોક્તારઃ પરસ્પરહિતે રતાઃ ॥ ૩૨॥

સત્યસઙ્કલ્પવન્તસ્ત ઈશ્વરા બ્રહ્મમાનિનઃ ।
બહુકાલેન તેષાં વૈ મત્સરઃ સમજાયત ॥ ૩૩॥

અહં શ્રેષ્ઠતમશ્ચૈવ સર્વેષાં પ્રભુરીશ્વરઃ ।
હૃદયે મન્યમાનાસ્તે વિવાદં ચક્રુરઞ્જસા ॥ ૩૪॥

આપશ્ચ તત્ર સંસૃષ્ટા વિષ્ણુના સ્વશરીરતઃ ।
તાસુ સંસુપ્તવાન્ દેવો બહુકાલં યથાસુખમ્ ॥ ૩૫॥

જલે શૈવાલવલ્લી ચ સમુત્પન્ના ક્રમેણ વૈ ।
બહુકાલેન તન્મધ્યે પૃથ્વી જાતા સ્વભાવતઃ ॥ ૩૬॥

લીલાર્થે વિષ્ણુના સૃષ્ટં નાભ્યાં કમલમુજ્જ્વલમ્ ।

શતયોજનવિસ્તારં કર્ણિકાપત્રશોભિતમ્ ॥ ૩૭॥

સુવાસબહુલં વીક્ષ્ય તેન રેમે જનાર્દનઃ ।
એકકાલે જગામ સ્મ તત્ર બ્રહ્મા પિતામહઃ ॥ ૩૮॥

કમલં તેન સન્દૃષ્ટં વિસ્મિતો હૃદયે ભૃશમ્ ।
કેન સૃષ્ટમિદં દિવ્યં પદ્મ પરમશોભનમ્ ॥ ૩૯॥

તત્ર નારાયણં દૃષ્ટ્વા પ્રસુપ્તં સ મહાર્ણવ ।
પ્રભુમુત્થાપયામાસ બ્રહ્મા તં સ્નેહભાવતઃ ॥ ૪૦॥

બ્રહ્મણો વચનેનૈવ સમુત્તસ્થૌ જનાર્દનઃ ।
બ્રહ્માણં માનયામાસ સ્વાગતં ભો પિતામહ ॥ ૪૧॥

તત્ર બ્રહ્મા મહાવિષ્ણું પ્રત્યુવાચ સમત્સરઃ ।
કિં મોહાર્થં ત્વયા સ્મૃષ્ટં પદ્મં પરમશોભનમ્ ॥ ૪૨॥

અહં બ્રહ્મા જગત્સ્રષ્ટા સર્વાદિઃ સર્વભાવનઃ ।
મયા પ્રક્રિયતે સૃષ્ટિઃ પશ્ચાત્ત્વં પાલયિષ્યસિ ॥ ૪૩॥

સૃજામિ યદિ નો તાં ચેત્કિં પાસિ ત્વં જનાર્દન ।
મદધીનશ્ચ સર્વેષાં ભાવસ્તેનાહમીશ્વરઃ ॥ ૪૪॥

બ્રહ્મણો વચનં શ્રુત્વા વિસ્મિતઃ સ જનાર્દનઃ ।
ઉવાચ મધુરં વાક્યં બ્રહ્માણં સાન્ત્વયન્નિવ ॥ ૪૫॥

વિષ્ણુરુવાચ ।
સૃષ્ટવાન્ કમલં નાહં મોહિતું ત્વાં પિતામહ ।
લીલાર્થં પદ્મમેવેદં પશ્ય ત્વં નાત્ર સંશયઃ ॥ ૪૬॥

સમત્સરમિદં વાક્યં ત્વયોક્તં યત્ પિતામહ ।
અહં ત્વાં પાલયામીદં તેન સ્રષ્ટા ભવાન્ કિલ ॥ ૪૭॥

નાન્યો પાતાસ્તિ મત્તસ્તે સર્વેષાં પાતૃભાવતઃ ।
અહં સ્થિતો મહાવિષ્ણુર્મત્સમો નૈવ વિદ્યતે ॥ ૪૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે બ્રહ્મવિષ્ણુવિવાદો નામ દ્વાદશોઽધ્યાયઃ ॥ ૧.૧૨
(Page ખં. ૧ અ. ૧૩ પાન 33)

## ૧.૧૩ પઞ્ચદેવવિવાદો નામ ત્રયોદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શિવ ઉવાચ ।
શ‍ૃણુ દેવિ કથાં પુણ્યાં ગણેશપ્રીતિવર્ધિનીમ્ ।
યજ્જાતમાદિકાલે વૈ તત્તેઽહં કથયામિ ચ ॥ ૧॥

વિષ્ણોર્વચનમાકર્ણ્ય ગર્વયુક્તં પ્રભાવતઃ ।
ભગવાંસ્તમુવાચેદં વેદકર્તા પિતામહઃ ॥ ૨॥

બ્રહ્મોવાચ ।
વિષ્ણો ત્વં યદિ માં પાતા સર્વેશશ્ચ મહાન્ પ્રભુઃ ।
પશ્યોદરગતો ભૂત્વા પ્રભાવં મે જગદ્ગુરો ॥ ૩॥

બ્રહ્મણો ગિરમાકર્ણ્ય પ્રવિષ્ટોઽસૌ જનાર્દનઃ ।
યોગમાયાબલેનૈવ યોગીશો જઠરે વિધેઃ ॥ ૪॥

બ્રહ્માણ્ડરચનાં તત્ર દૃષ્ટ્વા નાનાવિધાં પરામ્ ।
નાભિપદ્મયુતં વિષ્ણું દદર્શ પુરુષોત્તમઃ ॥ ૫॥

વિસ્મિતો હૃદિ મોહેન કિમદ્ભુતમિદં મહત્ ।
પશ્યન્નાન્તં જગામાઽસૌ નિઃસૃતો દેહમધ્યતઃ ॥ ૬॥

નિઃસૃતઃ પ્રણિપત્યાઽઽદૌ તં વિધિં ત્વવદત્પ્રભુઃ ।
બ્રહ્મન્નાન્તં પ્રજાનામિ ત્વદીયં વૈ ન સંશયઃ ॥ ૭॥

ત્વદીયજઠરેઽહં વૈ સ્થિતસ્તેન ભવાન્ ગુરુઃ ।
સર્વેશો નાત્ર સન્દેહઃ સ્રષ્ટા ત્વં સ્વપ્રભાવતઃ ॥ ૮॥

ત્વમેવ ભગવન્ પશ્ય મદીયે જઠરે પરમ્ ।
પ્રભાવં પૂર્ણભાવેન મદીયં કીદૃશં પ્રભો ॥ ૯॥

નારાયણવચઃ શ્રુત્વા બ્રહ્મા વિસ્મિતમાનસઃ ।
યોગસ્યૈવ પ્રભાવેણ ગતસ્તત્ર યથારુચિ ॥ ૧૦॥

વિષ્ણોશ્ચ જઠરે બ્રહ્મા બ્રહ્માણ્ડં લોકસઙ્કુલમ્ ।
બ્રહ્માણમપરં તત્ર સ્થિતં પશ્યન્ વિમોહિતઃ ॥ ૧૧॥

બ્રહ્મા નાન્તં જગામાઽસૌ પશ્યન્ પશ્યન્ મહાત્મનઃ ।
બહિર્ગન્તું મનશ્ચક્રે વિષ્ણુના માર્ગ આવૃતઃ ॥ ૧૨॥

દ્વારાણિ યોગભાવેન પિહિતાનિ સ્વમાયયા ।
ભ્રમન્ ભ્રમન્ સ્વયં બ્રહ્મા પ્રાપ નો માર્ગમુત્તમમ્ ॥ ૧૩॥

તત્ર યોગબલેનાઽપિ બ્રહ્મા વૈ પદ્મનાલતઃ ।
નિર્ભિદ્ય સહસા દ્વારં યયૌ તેન બહિર્વિધિઃ ॥ ૧૪॥

બહિરાગત્ય વિષ્ણુ તં ક્રોધેન સ જગાદ હ ।
વશમાનીય માં કિં ત્વં સ્વચ્છન્દો ભવસિ પ્રભો ॥ ૧૫॥

અહં સ્વેન પ્રભાવેણ નિઃસૃતો યોગમાયયા ।
દ્વારાણિ પિહિતાન્યેવ કિમર્થં વદ માધવ ॥ ૧૬॥

વચનં પ્રાહ દેવસ્ય શ્રુત્વા વિષ્ણુમહાયશાઃ ।
પ્રહસ્ય તમુવાચેત્થં સ્નેહયુક્તં સમાહિતઃ ॥ ૧૭॥

વિષ્ણુરુવાચ ।
વશીકર્તું વિધે ત્વાહમિચ્છામિ ન જગદ્ગુરો ।
દ્વારાણિ પિહિતાન્યેવ મયા ક્રીડાર્થમાદરાત્ ॥ ૧૮॥

પરસ્પરં તુ લીલાર્થં કૃતં યત્પ્રપિતામહ ।
પ્રભાવં જ્ઞાતુકામસ્ય ત્વપરાધં ક્ષમસ્વ મે ॥ ૧૯॥

ઇતિ પ્રસાદિતો બ્રહ્મા પ્રસન્નઃ પ્રાહ તં પુનઃ ।
ક્રીડાર્થં યત્ત્વયા વિષ્ણો કૃતં જ્ઞાતં ન વૈ મયા ॥ ૨૦॥

અહં ક્રોધસમાયુક્તઃ સઞ્જાતોઽજ્ઞાનતઃ પ્રભો ।
અપ્રિયં ભાષણં વિષ્ણો યત્ ક્ષમસ્વ કૃતં મયા ॥ ૨૧॥

તવાન્તં નૈવ જાનામિ જઠરેઽહં સમાસ્થિતઃ ।
ત્વં શ્રેષ્ઠો મે ગુરુઃ સાક્ષાન્નાત્ર સંશયવાન્ હરે ॥ ૨૨॥

ભવાનહમતઃ પ્રાજ્ઞૌ શ્રેષ્ઠૌ સર્વેશ્વરૌ પરૌ ।
શમ્ભુઃ શક્તિશ્ચ સૂર્યશ્ચ ગર્વયુક્તા બભૂવિરે ॥ ૨૩॥

તેષાં પ્રમાણં તજ્ જ્ઞેયમિતિ સસ્મરતુઃ પ્રભૂ ।
તયોઃ સ્મરણમાત્રેણ સંયયુસ્તત્ર તે ત્રયઃ ॥ ૨૪॥

પ્રથમં પ્રાપ્તવાંસ્તત્ર શઙ્કરઃ શૂલધૃક્ પ્રભુઃ ।
ઉક્તવાંસ્તૌ કિમર્થં મે સ્મરણં વદતં કૃતમ્ ॥ ૨૫॥

(Page ખં. ૧ અ. ૧૩ પાન ૩૪)
તત્રોચતુર્હરિર્બ્રહ્મા શ ૃણુ શઙ્કર મે વચઃ ।
તવૈશ્વર્યં કિયન્માનં દર્શયસ્વ સદાશિવ ॥ ૨૬॥

તયોર્વચનમાકર્ણ્ય ગર્વયુક્તઃ સદાશિવઃ ।
ઉવાચ ક્રોધસંયુક્તો વચનં વિસ્મયન્નિવ ॥ ૨૭॥

શિવ ઉવાચ ।
અહં હર્તા ચ સર્વેષાં યુવયોર્નાત્ર સંશયઃ ।
મત્તઃ પરં ન કિઞ્ચિદ્વૈ જ્ઞાતવ્યં સર્વભાવતઃ ॥ ૨૮॥

ઇત્યુક્ત્વા સ સ્વયં શમ્ભુર્દર્શયામાસ તૌ વપુઃ ।
જ્યોતીરૂપં મહાલિઙ્ગં પરં સર્વત્ર સંસ્થિતમ્ ॥ ૨૯॥

તત્તૌ દૃષ્ટ્વા મહાશ્ચર્યં વિસ્મિતૌ વિધિમાધવૌ ।
અધ ઊર્ધ્વં પુરઃ પશ્ચાદ્વામદક્ષિણસન્તતમ્ ॥ ૩૦॥

તત્ર બ્રહ્મા સ્વયં વિષ્ણુમુવાચ મધુરં વચઃ ।
અધસ્ત્વં ગચ્છ દેવેશ ઊર્ધ્વં ગચ્છામિ ભાવતઃ ॥ ૩૧॥

શિવસ્યાન્તં પ્રપશ્યાવઃ કીદૃશોઽયં મહેશ્વરઃ ।
અતસ્ત્વં ત્વરિતો ભૂત્વા કુરુ શીઘ્રમિદં વચઃ ॥ ૩૨॥

ઇત્યુક્તો બ્રહ્મણા વિષ્ણુસ્તં પ્રત્યૂચે પ્રભાવતઃ ।
બ્રહ્મન્મહ્યં વરં દેહિ પશ્ચાદ્ગન્તું સમુત્સહે ॥ ૩૩॥

ભ્રાન્તો બ્રહ્માઽભવત્તત્ર વરં બ્રૂહીતિ સોઽબ્રવીત્ ।
દાસ્યામિ નાત્ર સન્દેહઃ પ્રીતસ્ત્વં વરયાશુ ચ ॥ ૩૪॥

વિષ્ણુરુવાચ ।
ત્વં મે પુત્રો ભવ બ્રહ્મન્નેષ એવ વરો મતઃ ।
તસ્ય તદ્વચનં શ્રુત્વા વિસ્મિતો વિધિરબ્રવીત્ ॥ ૩૫॥

વઞ્ચિતોઽહં ત્વયા નૂનં સમ્ભ્રમેઽસ્મિન્ સમુત્થિતે ।
દત્તો વરો યતસ્તેન તવ પુત્રો ભવામ્યહમ્ ॥ ૩૬॥

સૃષ્ટિકાલે ચ સમ્પ્રાપ્તે ત્વન્નાભિકમલાત્ સ્વયમ્ ।
દેહં સૃજામિ યોગેન પદ્મજોઽહં તવાત્મજઃ ॥ ૩૭॥

ઇત્યુક્તઃ સ હરિસ્તત્ર તં પ્રણમ્ય તથેતિ ચ ।

પ્રવિષ્ટોધઃ શિવસ્યાપિ દ્રષ્ટું પારં મહાત્મનઃ ॥ ૩૮॥

બ્રહ્માઽપિ ત્વરિતો ભૂત્વોર્ધ્વં યયૌ પારલિપ્સયા ।
ન તત્ર પારમીશસ્ય પ્રાપ્તવાન્ સ પિતામહઃ ॥ ૩૯॥

વિષ્ણુશ્ચ શઙ્કરસ્યાધો ન પારં દૃષ્ટવાન્ તતઃ ।
બહુકાલેન તો તત્રાઽઽગતૌ તૌ ખિન્નમાનસૌ ॥ ૪૦॥

પરસ્પરવિચારેણ શઙ્કરં સ્તોતુમુદ્યતૌ ।
બદ્ધાઞ્જલિપુટાવેતૌ સ્તોત્રં ચક્રતુરુત્તમમ્ ॥ ૪૧॥

બ્રહ્મવિષ્ણૂ ઊચતુઃ ।
નમસ્તે શઙ્કરાયૈવ નમસ્તે શૂલપાણયે ।
રુદ્રાય કાલરૂપાય ત્ર્યમ્બકાય નમો નમઃ ॥ ૪૨॥

ઉમાપતે નમસ્તુભ્યં વૃષભેશ્વરવાહન ।
આદિદેવાય દેવાય મહાદેવાય તે નમઃ ॥ ૪૩॥

પ્રસીદ ભગવન્ શમ્ભો નાન્તં પશ્યાવહે વિભો ।
કિંરૂપં કિંસ્વભાવં ત્વાં ન જાનીવઃ કથઞ્ચન ॥ ૪૪॥

દર્શય સ્વાત્મરૂપં ભો મહેશ્વર નમોઽસ્તુ તે ।
યેન તે ભજનં દેવ જનાઃ કુર્વન્તિ નિર્ભયાઃ ॥ ૪૫॥

તયોર્વચનમાકર્ણ્ય શમ્ભુઃ પ્રાકટ્યમાસ્થિતઃ ।
તતસ્તં તૌ દદૃશતુર્હરિશ્ચ ભગવાન્ વિધિઃ ॥ ૪૬॥

વામભાગે સ્થિતં વિષ્ણું દક્ષિણાઙ્ગે પિતામહમ્ ।
વિશ્વં ચરાચરં સર્વં લિઙ્ગે તત્રાસ્ય સંસ્થિતમ્ ॥ ૪૭॥

અપારમહિમાનં તં દૃષ્ટ્વા નેમતુરાદરાત્ ।
ઉપસંહર રૂપં તત્ત્વમેવ પરમેશ્વરઃ ॥ ૪૮॥

તયોર્વચનમાકર્ણ્ય હૃષ્ટઃ સન્ શઙ્કરઃ પ્રભુઃ ।
ભગવાન્ પૂર્વરૂપેણ સન્તસ્થૌ વૃષભધ્વજઃ ॥ ૪૯॥

ઉવાચ તૌ મહાદેવો વૃણુતં વરમીપ્સિતમ્ ।
દાસ્યામિ ભવતોભાવાત્ સ્તોત્રસન્તુષ્ટમાનસઃ ॥ ૫૦॥

(Page ખં. ૧ અ. ૧૪ પાન ૩૫)
ય એતત્પઠતિ સ્તોત્રં સ કામાન્ લભતેઽખિલાન્ ।

મત્પ્રિયઃ સોઽપિ ભવતિ મલ્લોકેંઽતે પ્રગચ્છતિ ॥ ૫૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે પઞ્ચદેવવિવાદો નામ ત્રયોદશોઽધ્યાયઃ ॥ ૧.૧૩

## ૧.૧૪ ગણેશપ્રાદુર્ભાવો નામ ચતુર્દશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શિવ ઉવાચ ।
શ‍ૃણુ દેવિ પ્રવક્ષ્યામિ યજ્જાતં ચાદ્ભુતં તતઃ ।
ગણેશમાયામોહેન મોહિતાનાં ચરિત્રકમ્ ॥ ૧॥

શિવસ્ય વચનં શ્રુત્વા વિષ્ણુબ્રહ્માણમબ્રવીત્ ।
વરં વૃણુ વિરિઞ્ચ ત્વાં શિવાત્પુત્રો ભવેતિ મે ॥ ૨॥

તવ પુત્રઃ શિવો જાતસ્તેન મે પૌત્રતાં ગતઃ ।
ઉભયોઃ સફલં પૂર્ણં વાઞ્છિતં જાતમદ્ભુતમ્ ॥ ૩॥

વિષ્ણોર્વચનમાકર્ણ્ય વિધિઃ શઙ્કરમબ્રવીત્ ।
મમ પુત્રો ભવ ત્વં વૈ વર એષ વૃતો મયા ॥ ૪॥

વિષ્ણુનાઽપિ તદેવોક્તં તથા વૈ શઙ્કરોઽબ્રવીત્ ।
તવ ભાલાદ્ભવિષ્યામિ રુદ્રોઽહં ત્વંશતો વિધે ॥ ૫॥

શિવસ્ય વચનં શ્રુત્વા સન્તુષ્ટૌ વિધિમાધવૌ ।
ઊચતુઃ શઙ્કરં તત્ર સ્નેહાત્તં ભાવપૂર્વકમ્ ॥ ૬॥

વિધિવચ્છિવ પશ્ય ત્વમૈશ્વર્યં ચાવયોઃ પૃથક્ ।
તેન તુષ્ટૌ મહાદેવ ભવિષ્યાવો ન સંશયઃ ॥ ૭॥

તયોર્દૈશ્વરં ભાવં શિવોઽપિ જ્ઞાનચક્ષુષા ।
દૃષ્ટ્વા નાન્તં જગામાઽસૌ તૌ પુનઃ પ્રત્યુવાચ હ ॥ ૮॥

ભવતોર્મહિમાનં ચાપારં પશ્યામિ શાશ્વતમ્ ।
વયં ત્રયઃ સમાખ્યાતા ઈશ્વરાઃ સર્વતઃ પરાઃ ॥ ૯॥

એતસ્મિન્નન્તરે તત્રાઽજગામ સ દિવાકરઃ ।
તેજોરાશિઃ સદાત્મા ચ પૃચ્છતિ સ્મ સમાહિતઃ ॥ ૧૦॥

કિમર્થં સ્મરણં દેવા મદીયં કૃતમાદરાત્ ।

તન્મે કથયતાદ્ય ત્વાગતોઽહં સ્નેહતઃ પરમ્ ॥ ૧૧॥

ભાનોર્વચનમાકર્ણ્યે પ્રહૃષ્ટાસ્તે ત્રયો ભૃશમ્ ।
ઊચુઃ પ્રસન્નભાવેનૈશ્વર્યં તે દર્શય પ્રભો ॥ ૧૨॥

તેષાં શ્રુત્વા ગિરં સૌમ્યાં દર્શયામાસ રૂપકમ્ ।
તેજોમયમપારં યચ્ચરાચરમયં મહત્ ॥ ૧૩॥

સૂર્યસ્ય તેજસા સર્વે નિષ્પ્રભાસ્તે ત્રયઃ કૃતાઃ ।
પ્રણષ્ટદૃષ્ટયો જાતા ન શેકુર્દ્રષ્ટુમઞ્જસા ॥ ૧૪॥

જ્ઞાનદૃષ્ટ્યા ચ તં દૃષ્ટ્વા ચરાચરતનું પ્રભુમ્ ।
અપારરૂપં ભાસ્વન્તં નતાસ્તં સ્નેહભાવતઃ ॥ ૧૫॥

દર્શયિત્વા તથાત્માનં સૌમ્યરૂપોર્યમાઽભવત્ ।
તમૂચુસ્તે ત્રયો દેવા નાન્તં દદૃશિમ પ્રભો ॥ ૧૬॥

અસ્માકમપિ પશ્ય ત્વમૈશ્વર્યં સ્નેહભાવતઃ ।
તેષાં તદ્વચનં શ્રુત્વા રવિહૃષ્ટો બભૂવ હ ॥ ૧૭॥

જ્ઞાનદૃષ્ટ્યા રવિસ્તેષામૈશ્વર્યં દૃષ્ટવાન્ પરમ્ ।
ઉવાચ પ્રણતો ભૂત્વા વિસ્મિતશ્ચેતસા ભૃશમ્ ॥ ૧૮॥

ભવન્તોઽપિ મહાત્માનો નાન્તં પશ્યામિ સર્વતઃ ।
યુષ્માકમૈશ્વરં ભાવમદ્ભુતં દૃષ્ટવાનહમ્ ॥ ૧૯॥

(Page ખં. ૧ અ. ૧૪ પાન ૩૬)
વયં સર્વેશ્વરાઃ સર્વે ભગવન્તઃ સનાતનાઃ ।
ન્યૂનાધિકં કલામાત્રં વિદ્યતે નૈવ નિશ્ચિતમ્ ॥ ૨૦॥

તસ્મિન્ ક્ષણે સ્વયં શક્તિરાગતા મોહિની પરા ।
ઉવાચ તાન્ પ્રસન્ના મે કિમર્થં સ્મરણં કૃતમ્ ॥ ૨૧॥

તામૂચુસ્તે ચ ચત્વારો દેવાઃ સ્નેહેન ભાવિતાઃ ।
દર્શયસ્વ મહાદેવિ ઐશ્વર્યં કીદૃશં તવ ॥ ૨૨॥

ઇત્યુક્ત્વા સા સ્વરૂપં તદ્દર્શયામાસ સુન્દરમ્ ।
ચરાચરમયં પૂર્ણં સ્થૂલસૂક્ષ્માદિભિર્યુતમ્ ॥ ૨૩॥

દૃષ્ટ્વા રૂપં તદીયં વૈ ભ્રાન્તાસ્તે શરણં યયુઃ ।
નાન્તં દદૃશિમાર્યે તે રૂપસ્ય મહતઃ કિલ ॥ ૨૪॥

સૌમ્યરૂપા તદા જાતા તામૂચુઃ પશ્ય ભાવતઃ ।
અસ્માકં દેવિ ચૈશ્વર્યં કીદૃશા વયમેવ ચ ॥ ૨૫॥

તેષાં વચનમાકર્ણ્ય જ્ઞાનદૃષ્ટ્યા સ્મ પશ્યતિ ।
નાન્તં જગામ તેષાં વૈ નતા સા તાન્વિશેષતઃ ॥ ૨૬॥

ઉવાચ સ્નેહભાવેન નાન્તં પશ્યામિ કુત્રચિત્ ।
ભવન્તોઽપિ મહાત્માન ઈશ્વરાઃ પૂર્ણભાવતઃ ॥ ૨૭॥

વયં પઞ્ચ સમા નાથા નાન્તરં દૃશ્યતે ક્વચિત્ ।
કઃ સમર્થો ભવેદ્દેવો નિશ્ચયો નૈવ દૃશ્યતે ॥ ૨૮॥

ગણેશમાયયા ભ્રાન્તા અવદંસ્તે પરસ્પરમ્ ।
પ્રભુરેકશ્ચ સર્વત્ર વેદે વૈ પઠ્યતે બુધૈઃ ॥ ૨૯॥

પ્રભવઃ પઞ્ચ કુત્રાપિ નોક્તાઃ શાસ્ત્રેષુ સમ્મતાઃ ।
અતઃ કોઽપિ પ્રભુર્ભાવ્યઃ સ ચ વૈ કુત્ર વર્તતે ॥ ૩૦॥

એવં વિવાદે સમ્પ્રાપ્તે વિસ્મૃતં જ્ઞાનમાધકમ્ ।
ગાણેશં ચિત્તચાઞ્ચલ્યાદૂર્ધ્વં જગ્મુઃ પ્રભાવતઃ ॥ ૩૧॥

ન કિઞ્ચિદ્દૃશુસ્તત્રાધો ભાગે પ્રયયુસ્તતઃ ।
એવં દશ દિશો ભ્રાન્તાઃ પશ્યન્તસ્તે પરસ્પરમ્ ॥ ૩૨॥

ન કિઞ્ચિદ્દૃશુસ્તત્ર સ્થિતા એકત્ર તે પુનઃ ।
યોગમાર્ગેણ ચિત્તે સ્વે ધ્યાનં ચક્રુઃ ક્રમેણ ચ ॥ ૩૩॥

બ્રહ્માડભેદસ્વરૂપં તે રેમિરે યોગભાવતઃ ।
એકીભૂતા ઇવાત્માનઃ શાન્તિં પ્રાપ્તાઃ સ્વભાવતઃ ॥ ૩૪॥

તતસ્તાન્ દર્શયામાસ યોગિધ્યેયમનુત્તમમ્ ।
સ્વરૂપં ગણરાજસ્તુ હૃદયે સંસ્થિતં પરમ્ ॥ ૩૫॥

ચતુર્ભુજ ત્રિનેત્રં તચ્છુણ્ડાદણ્ડવિરાજિતમ્ ।
એકદન્તં શૂર્પકર્ણં વક્રતુણ્ડ મહોદરમ્ ॥ ૩૬॥

રક્તવર્ણં મહાકાયં સિન્દૂરાલિપ્તમેવ ચ ।
નાભિશેષં કિરીટાદિનાનાભૂષણશોભિતમ્ ॥ ૩૭॥

સિદ્ધિબુદ્ધિયુતં પૂર્ણં વિભૂતિભિરુપાસિતમ્ ।

ચિન્તામણિં મણિં ચૈવ દધત્તુ હૃદયે શુભમ્ ॥ ૩૮॥

પ્રસન્નવદનં ભક્તાનુગ્રહાણાં પ્રકારકમ્ ।
હૃદિ દૃષ્ટાઽભવન્નેવ વિસ્મિતાસ્તે સુરાઃ પ્રિયે ॥ ૩૯॥

તમાદૌ શઙ્કરસ્યૈવ હૃદિ પ્રકટતાં ગતઃ ।
તં પપ્રચ્છ સ્વયં શભુઃ કો ભવાન્ વદ મે પ્રભો ॥ ૪૦॥

શાન્તિયોગેન સમ્પ્રાપ્તઃ કિં ન બ્રહ્મપતિઃ પરઃ ।
કથયસ્વ મહાભાગ ત્વાં ન જાનામિ તત્ત્વતઃ ॥ ૪૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે ગણેશપ્રાદુર્ભાવો નામ ચતુર્દશોઽધ્યાયઃ ॥ ૧.૧૪
(Page ખં. ૧ અ. ૧૫ પાન ૩૭)

## ૧.૧૫ ગણેશપ્રસન્નભાવો નામ પઞ્ચદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
શિવસ્ય વચનં શ્રુત્વા ભક્તિભાવેન તોષિતઃ ।
ઉવાચ મધુરં વાક્યં વિઘ્નેશસ્તં પ્રહર્ષયન્ ॥ ૧॥

વક્રતુણ્ડ ઉવાચ ।
શ‍ૃણુ શમ્ભો મહાભાગ મમ માયાવિમોહિત ।
ગણેશોઽહં પુનર્દૃષ્ટસ્તપસા ભાવિતાત્મના ॥ ૨॥

યઃ પુરા ભવતો દેવ વરદાતાઽભવં પરઃ ।
ઉગ્રેણ તપસા તુષ્ટોઽકરવં જ્ઞાનસંયુતમ્ ॥ ૩॥

મમૈષા સતતં માયા પ્રમોહયતિ માનવાન્ ।
તેન વિસ્મરણં પ્રાપ્તં તવાઽપિ ન ચ સંશયઃ ॥ ૪॥

એવમુક્ત્વા શિવં માયામોહજાલં નિરાકરોત્ ।
સર્વં ચ સ્મરણં તેન પુનઃ પ્રાપ્તં શિવસ્ય ચ ॥ ૫॥

સર્વં સ્મૃત્વા શિવસ્તત્ર સ્તોતું સમુપચક્રમે ।
તાવદન્તર્હિતં જાતં રૂપં ગણપતેઃ શુભમ્ ॥ ૬॥

પુનર્ધ્યાનેન શમ્ભુઃ સ તમેવાચિન્તયન્ સ્થિતઃ ।

નાપશ્યદ્ હૃદિ તદ્રૂપં તેનાકુલ ઇવાऽભવત્ ॥ ૭॥

આયયૌ વિષ્ણુરભ્યાશે સર્વં ત્વકથયચ્છિવમ્ ।
અદૃષ્ટે તાદૃશં રૂપં કથયામાસ સોऽપિ તમ્ ॥ ૮॥

એવં પઞ્ચાપ્યદૃષ્ટ્વા તત્ વિસ્મિતા અભવન્ પરમ્ ।
એકત્ર મિલિતા જાતાસ્તુષ્ટુવુસ્તં ગતસ્મયાઃ ॥ ૯॥

પઞ્ચ દેવા ઊચુઃ ।
નમસ્તે વક્રતુણ્ડાય ત્રિનેત્રં દધતે નમઃ ।
ચતુર્ભુજાય દેવાય પાશાઙ્કુશધરાય ચ ॥ ૧૦॥

લમ્બોદર નમસ્તુભ્યં નાભિશેષાય તે નમઃ ।
મહતે ચૈકદન્તાય શૂર્પકર્ણાય તે નમઃ ॥ ૧૧॥

સિન્દૂરારુણદેહાય રક્તવર્ણધરાય ચ ।
મહાકાયાય સૂક્ષ્માય ગણેશાય નમો નમઃ ॥ ૧૨॥

સિદ્ધિબુદ્ધિયુતાયૈવ વિભૂતિસહિતાય ચ ।
ચિન્તામણિધરાયૈવ તથા ચિન્તામણે નમઃ ॥ ૧૩॥

અવ્યક્તાય પરેશાય પરેષાં ચ પરાય તે ।
મનોવાણીવિહીનાય વિઘ્નેશાય નમો નમઃ ॥ ૧૪॥

નાનામાયાધરાયૈવ માયિનાં મોહકારિણે ।
હેરમ્બાય નમસ્તુભ્યં બ્રહ્મણાં પતયે નમઃ ॥ ૧૫॥

દર્શયસ્વ નિજં રૂપં ભક્તેભ્યઃ પ્રીતિદાયકમ્ ।
સનાથા હિ વયં તેન સર્વનાથાય તે નમઃ ॥ ૧૬॥

સ્તુવતાં તુ પુરઃ પ્રાદુરાસીદ્દેવો ગજાનનઃ ।
તં દૃષ્ટ્વા દણ્ડવત્ સર્વે પ્રણતા ભક્તિભાવતઃ ॥ ૧૭॥

તાનુત્થાપ્ય સ્વયં ઢુણ્ઢિર્વચનં ચેદમબ્રવીત્ ।
સ્તોત્રેણ ભાવિતો દેવાઃ પ્રીતો વો નાત્ર સંશયઃ ॥ ૧૮॥

યઃ પઠેત્ સ્તોત્રમેતદ્વૈ સ મે માન્યો ભવેત્ સુરાઃ ।
વાઞ્છિતં પૂરયિષ્યામ્યન્તે મે સાયુજ્યમાપ્નુયાત્ ॥ ૧૯॥

શૃણુધ્વં મે વચો રમ્યં મા ગર્વં કુરુત પ્રિયાઃ ।
ભવન્તો મદધીનાશ્ચ કલાંશા નાત્ર સંશયઃ ॥ ૨૦॥

ક્રીડાર્થં નિર્મિતાઃ સર્વે સ્પર્ધમાનાઃ પરસ્પરમ્ ।
કિમર્થં મનસિ ભ્રાન્તા જાતાઃ પૂર્ણાત્મકા અપિ ॥ ૨૧॥

શ્રાવ્યં જ્ઞાનં રહસ્યં યન્ મદીયં તેન ભાવિતાઃ ।
સદા મોહવિનિર્મુક્તા ભવિતારશ્ચ મત્સમાઃ ॥ ૨૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે ગણેશપ્રસન્નભાવો નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૧.૧૫
(Page ખં. ૧ અ. ૧૬ પાન ૩૮)

## ૧.૧૬ ગણેશગીતાસારકથનં નામ ષોડશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શિવ ઉવાચ ।
ગણેશવચનં શ્રુત્વા પ્રણતા ભક્તિભાવતઃ ।
પપ્રચ્છુસ્તં પુનઃ શાન્તા જ્ઞાનં બ્રૂહિ ગજાનન ॥ ૧॥

ગણેશ ઉવાચ ।
દેહશ્ચતુર્વિધઃ પ્રોક્તસ્ત્વં પદં બ્રહ્મભેદતઃ ।
સોઽહં દેહી ચતુર્ધા તત્પદં બ્રહ્મ સદૈક્યતઃ ॥ ૨॥

સંયોગ ઉભયોર્યશ્ચાઽસિ પદં બ્રહ્મ કથ્યતે ।
સ્વત ઉત્થાનકં દેવા વિકલ્પકરણાદ્ દ્વિધા ॥ ૩॥

સદા સ્વસુખનિષ્ઠં યદ્બ્રહ્મ સાઙ્ખ્યં પ્રકીર્તિતમ્ ।
પરતશ્ચોત્થાનકં તત્ ક્રીડાહીનતયા પરમ્ ॥ ૪॥

સ્વતઃ પરત ઉત્થાનહીનં યદ્બ્રહ્મ કથ્યતે ।
સ્વાનન્દઃ સકલાભેદરૂપઃ સંયોગકારકઃ ॥ ૫॥

તદેવ પઞ્ચધા જાતમીશ્વરાસ્તન્નિબોધત ।
સ્વતશ્ચ પરતો બ્રહ્મોત્થાનં યદ્ દ્વિવિધં સ્મૃતમ્ ॥ ૬॥

બ્રહ્મણો નામ તદ્ભેદે કથ્યતે ભિન્નભાવતઃ ।
તયોરનુભવો યશ્ચ યોગિનાં હૃદિ જાયતે ॥ ૭॥

રૂપં તદેવ જ્ઞાતવ્યમસદ્ભેદેષુ કથ્યતે ।

સા શક્તિરિયમાખ્યાતા બ્રહ્મરૂપા હ્યસન્મયી ॥ ૮॥

તત્રામૃતમયાધારઃ સૂર્ય આત્મા પ્રકથ્યતે ।
શક્તિસૂર્યમયો વિષ્ણુરાનન્દો નન્દનાત્તયોઃ ॥ ૯॥

ત્રિવિધેષુ તદાકારસ્તત્ ક્રિયાહીનરૂપકઃ ।
શિવો નેતિ ચતુર્થોઽયં ત્રિનેતિ કરણાત્પરઃ ॥ ૧૦॥

ત્રિવિધં મોહમાત્રં યન્નિર્મોહસ્તુ સદાશિવઃ ।
તેષામભેદે યદ્બ્રહ્મ સ્વાનન્દઃ સર્વયોગતઃ ॥ ૧૧॥

પઞ્ચાનાં બ્રહ્મણાં યચ્ચ બિમ્બં માયામયં સ્મૃતમ્ ।
બ્રહ્મા સ એવ વિજ્ઞેયઃ સર્વાદિઃ સર્વભાવનઃ ॥ ૧૨॥

બિમ્બેન સકલં સૃષ્ટં તેનાયં પ્રપિતામહઃ ।
અસત્ સત્ સમનેતિ સ્વાનન્દરૂપા વયં સ્મૃતાઃ ॥ ૧૩॥

સ્વાનન્દાદ્યત્ પરં બ્રહ્માયોગાખ્યં બ્રહ્મણાં ભવેત્ ।
કેષામપિ પ્રવેશો ન તત્ર તસ્યાઽપિ કુત્રચિત્ ॥ ૧૪॥

મદીયં દર્શનં તત્રાયોગે નો યોગિનાં ભવેત્ ।
સ્વાનન્દે દર્શનં પ્રાપ્તં સ્વસંવેદ્યાત્મકં ચ મે ॥ ૧૫॥

સ્વાનન્દવાસિનં તેન વેદેષુ પ્રવદન્તિ મામ્ ।
ચતુર્ણાં બ્રહ્મણાં ભોગાસ્તં યોગાભેદયોગતઃ ॥ ૧૬॥

સંયોગશ્ચ હ્યયોગશ્ચ તયોઃ પરતરો મતઃ ।
પૂર્ણશાન્તિપ્રદો યોગશ્ચિત્તવૃત્તિનિરોધતઃ ॥ ૧૭॥

ક્ષિપ્તં મૂઢં ચ વિક્ષિપ્તમેકાગ્રં ચ નિરોધકમ્ ।
પઞ્ચભૂમિમયં ચિત્તં તત્ર ચિન્તામણિઃ સ્થિતઃ ॥ ૧૮॥

પઞ્ચભૂમિનિરોધેન પ્રાપ્યતે યોગિભિર્હૃદિ ।
શાન્તિરૂપાત્મયોગેન તતઃ શાન્તિર્મદાત્મિકા ॥ ૧૯॥

એતદ્યોગાત્મકં જ્ઞાનં ગાણેશં કથિતં મયા ।
નિત્યં યુક્તં ચ યોગેન નૈવ મોહં પ્રગચ્છથ ॥ ૨૦॥

ચિત્તરૂપા સ્વયં બુદ્ધિઃ સિદ્ધિર્મોહમયી સ્મૃતા ।
નાનાબ્રહ્મવિભેદેન તાભ્યાં ક્રીડતિ તત્પતિઃ ॥ ૨૧॥

ત્યક્ત્વા ચિન્તાભિમાનં ચ ગણેશોહં સમાધિના ।
ભવિષ્યન્તિ ભવન્તોઽપિ મદ્રૂપા મોહવર્જિતાઃ ॥ ૨૨॥

શિવ ઉવાચ ।
ઇત્યુક્ત્વા વિરરામાઽથ ગણેશો ભક્તવત્સલઃ ।
તેઽપિ ભેદં પરિત્યજ્ય શાન્તિં પ્રાપ્તાશ્ચ તત્ક્ષણાત્ ॥ ૨૩॥

એકવિંશતિસુશ્લોકૈર્ગણેશેન પ્રકીર્તિતમ્ ।
ગીતાસારં સુશાન્તેભ્યઃ શાન્તિદં યોગસાધનૈઃ ॥ ૨૪॥

ગણેશગીતાસારં ચ યઃ પઠિષ્યતિ ભાવતઃ ।
શ્રોષ્યતિ શ્રદ્ધધાનશ્ચેદ્બ્રહ્મભૂતસમો ભવેત્ ॥ ૨૫॥

ઇહ ભુક્ત્વાઽખિલાન્ ભોગાનન્તે યોગમયો ભવેત્ ।
(Page ખં. ૧ અ. ૧૭ પાન ૩૯)
દર્શનાત્તસ્ય લોકાનાં સર્વપાપં લયં વ્રજેત્ ॥ ૨૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમ ખણ્ડે વક્રતુણ્ડચરિતે ગણેશગીતાસારકથનં નામ ષોડશોઽધ્યાયઃ ॥ ૧.૧૬

## ૧.૧૭ શિવપાર્વતીસંવાદસમાપ્તિર્નામ સપ્તદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શિવ ઉવાચ ।
ગણેશગીતાસારં તે શ્રુત્વા પઞ્ચ સુરેશ્વરાઃ ।
ઊચુસ્તં વિસ્મિતાઃ સર્વે પ્રણમ્ય ગણનાયકમ્ ॥ ૧॥

પઞ્ચ દેવા ઊચુઃ ।
ભગવન્ ભવતા સર્વં કથિતં તથ્યમેવ ચ ।
તેન તૃપ્તા વયં સ્વામિન્ મોહશૂન્યાઃ કૃતાસ્ત્વયા ॥ ૨॥

તવ દર્શનમાત્રેણ સ્મરણં પૂર્વકં કૃતમ્ ।
ગુણરૂપા વયં ઢુણ્ઢે કથં બ્રહ્મમયા વદ ॥ ૩॥

તેષાં વચનમાકર્ણ્ય તાનુવાચ ગજાનનઃ ।
ભક્તવત્સલભાવેન તોષિતોઽસૌ મહાપ્રભુઃ ॥ ૪॥

ગણેશ ઉવાચ ।

સ્વપદે જગતિ બ્રહ્મરૂપા વૈ જગદીશ્વરાઃ ।
ભિન્નભાવે ગુણાત્માનો ભવન્તોઽપિ મયા કૃતાઃ ॥ ૫॥

ચતુર્વિધેન ભાવેન ક્રીડામિ નનુ તત્ર ચ ।
ક્રીડયા પતિતં બિમ્બં તેન પઞ્ચવિધોઽભવમ્ ॥ ૬॥

બહલેષુ વિલાસેષુ તેષુ ભાવેષુ દેવપાઃ ।
ભવન્તો મદધીનાશ્ચ સંસ્થિતા નાત્ર સંશયઃ ॥ ૭॥

એષુ ભિન્નવિહારેષુ રજઃસત્ત્વતમોમયાઃ ।
મયા બ્રહ્મા હરિઃ શમ્ભુર્ભિન્ના જાતા હિ માયયા ॥ ૮॥

અહઙ્કારસ્ત્રિદેવાનાં સૂર્યો મોહમયી તથા ।
શક્તિસ્ત્રિગુણસિધ્યર્થમેતે પઞ્ચ મયા કૃતાઃ ॥ ૯॥

અહમત્ર સ્થિતોંઽશેન વક્રતુણ્ડ ઇતિ સ્મૃતઃ ।
બિન્દુબ્રહ્મમયઃ સાક્ષાદ્ભિન્નભાવપ્રકાશકઃ ॥ ૧૦॥

તુરીયં મે મયા રૂપં કૃતં યદ્ ગુણપં સુરાઃ ।
જ્ઞાતવ્યં બુદ્ધિરૂપં તદ્દક્ષિણાઙ્ગં પ્રકથ્યતે ॥ ૧૧॥

પઞ્ચદેવવિહારાખ્યં વામાઙ્ગં સિદ્ધિરૂપકમ્ ।
સિદ્ધિબુદ્ધિયુતોઽહં વૈ બિન્દુમાત્રાત્મકોઽભવમ્ ॥ ૧૨॥

ભક્તાનાં વિઘ્નરૂપા યે વક્રાસ્તે કથિતાઃ સુરૈઃ ।
તાંસ્તુણ્ડેન હનિષ્યામિ વક્રતુણ્ડસ્તતઃ સ્મૃતઃ ॥ ૧૩॥

મમ માયા મયાજ્જીવાદ્વક્રં બ્રહ્મમુખં યતઃ ।
તેનાઽહં વક્રતુણ્ડસ્તુ લભ્ય ઉન્મનસા ભવેઃ ॥ ૧૪॥

ભવતાં કાર્યસિદ્ધ્યર્થં વિહારાર્થં તુ માયયા ।
બિન્દુરૂપધરો ભૂત્વા સ્થિતોઽહં ભાવપૂર્વકમ્ ॥ ૧૫॥

યદિ મે સ્મરણં યૂયં વિસ્મરિષ્યથ વૈ તદા ।
માયામોહેન સમ્ભ્રાન્તા ભવિષ્યથ મહેશ્વરાઃ ॥ ૧૬॥

ભવદ્ભિઃ સતતં તસ્માત્ કર્તવ્યં સ્મરણં હૃદિ ।
આદૌ પૂજ્યો ભવિષ્યામિ દૈવે પિત્ર્યે ચ કર્મણિ ॥ ૧૭॥

તેન સિદ્ધિયુતાઃ સર્વે ભવિષ્યન્તિ ન સંશયઃ ।
ઇત્યુક્ત્વાન્તર્દધે દેવો ગણેશો ગણપાલકઃ ॥ ૧૮॥

(Page ખં. ૧ અ. ૧૭ પાન ૪૦)

શિવ ઉવાચ ।

ઇતિ તે કથિતો દેવિ ધ્યાનમાર્ગઃ પુરાતનઃ ।
તં ધ્યાયામિ હૃદિસ્થં મે ગણેશં બ્રહ્મનાયકમ્ ॥ ૧૯॥

અખિલં બ્રહ્મણા સૃષ્ટં ચરાચરમયં શિવે ।
નાનાવતારવાન્ વિષ્ણુઃ સ પાતિ ગણપાજ્ઞયા ॥ ૨૦॥

અહં સંહારકારી ચ ત્વં પ્રમોદપ્રદા શિવે ।
કર્મણાં ચાલકઃ કાલૈર્ભાનુર્જાતો ન સંશયઃ ॥ ૨૧॥

હિમાચલસુતા ત્વં વૈ જાતા તેન સુવિસ્મૃતમ્ ।
ત્વયાઽખિલં હૃદિસ્થં ચ જ્ઞાનં ગણપબોધકમ્ ॥ ૨૨॥

મયા સુસ્મારિતં તુભ્યં સ્મર સર્વં શુચિસ્મિતે ।
ભવતી ચ મહામાયા પશ્ય ત્વં ગણપં હૃદિ ॥ ૨૩॥

અષ્ટૌ તસ્યાઽવતારાંશ્ચ કથયામિ સમાસતઃ ।
ભજતા તેન માર્ગેણ ભવેદ્યોગો ન દુર્લભઃ ॥ ૨૪॥

પ્રથમો વક્રતુણ્ડશ્ચ ત્વમ્પદબ્રહ્મ કથ્યતે ।
દ્વિતીયં એકદન્તશ્ચ તત્પદબ્રહ્મબોધકઃ ॥ ૨૫॥

મહોદરસ્તૃતીયસ્તુ બ્રહ્માસિ પદધારકમ્ ।
ગજાનનશ્ચતુર્થશ્ચ સાઙ્ખ્યરૂપો મહેશ્વરિ ॥ ૨૬॥

લમ્બોદર ઇતિ ખ્યાતો હ્યેતદ્બ્રહ્મ ત્વયિ સ્થિતમ્ ।
ષષ્ઠો વિકટનામા ચ સદ્બ્રહ્માત્મરવિઃ પરઃ ॥ ૨૭॥

વિઘ્નરાજઃ સ્વયં વિષ્ણુઃ સપ્તમઃ સમતાઙ્ગતઃ ।
ધૂમ્રવર્ણોઽષ્ટમઃ શમ્ભુરવ્યક્તો નેતિ કથ્યતે ॥ ૨૮॥

અષ્ટબ્રહ્મસુ તત્પાલાઃ કલારૂપધરાઃ સ્મૃતાઃ ।
ગણપા ગણરાજસ્ય હ્યવતારાઃ પ્રકીર્તિતાઃ ॥ ૨૯॥

સ્વસંવેદ્યમયં બ્રહ્મ તેન વૈ પ્રધૃતાઃ પ્રિયે ।
સર્વેષાં બ્રહ્મણાં દેવિ ખેલકસ્તેન સ સ્મૃતઃ ॥ ૩૦॥

અયોગસ્યાવતારશ્ચ ખેલનાદિ ન વિદ્યતે ।

સ્વાનન્દવાસિનં વિદ્ધિ ખેલકં સતતં પ્રિયે ॥ ૩૧॥

પૂર્ણયોગો ગણાધીશઃ સ્વાનન્દાયોગવર્જિતઃ ।
યોગિનાં તત્ર શાન્તિશ્ચ હ્યભવદ્યોગસેવયા ॥ ૩૨॥

ઇતિ સર્વં સમાખ્યાતં યત્પૃષ્ટં દેવિ શોભનમ્ ।
અનેન વિધિના નિત્યં ગણેશં ભજ સર્વદા ॥ ૩૩॥

અસ્માકં કુલદેવશ્ચ ગણેશો નાત્ર સંશયઃ ।
પૂજ્યતે સ મયા નિત્યં ચિન્તામણિવિનાયકઃ ॥ ૩૪॥

પઞ્ચાનાં ચિત્તવૃત્તીનાં પ્રકાશકતયા સ્થિતઃ ।
તેન ચિન્તામણિર્નામ કથ્યતે સ ગજાનનઃ ॥ ૩૫॥

ગજવક્ત્રાત્મિકાં મૂર્તિં પશ્ય દેવિ ગૃહે સ્થિતામ્ ।
મણિરત્નમયીં સાક્ષાત્ પૂજયામિ સુભક્તિતઃ ॥ ૩૬॥

મુદ્ગલ ઉવાચ ।
ઇત્યુક્ત્વા દર્શયામાસ ધ્યાનસ્થાનં સદાશિવઃ ।
એકાન્તે વીક્ષ્ય વૈ દેવી વિસ્મિતા સાઽભવત્પરમ્ ॥ ૩૭॥

ઇત્યુક્ત્વા વિરરામાથ શઙ્કરઃ કરુણાનિધિઃ ।
તં પુનઃ પ્રત્યુવાચેદં મહાદેવી જગન્મયી ॥ ૩૮॥

શક્તિરુવાચ ।
સર્વેષાં મોહસન્દાત્રી તામસસ્ય સદાશિવ ।
તવ પત્ની કથં જાતા હ્યેકભાગસ્થિતસ્ય વૈ ॥ ૩૯॥

અમું મે સંશયં દેવ છેત્તુમર્હસિ સામ્પ્રતમ્ ।
ત્વદન્યઃ સંશયચ્છેત્તા સર્વજ્ઞો નાસ્તિ કુત્રચિત્ ॥ ૪૦॥

પાર્વતીવચનં શ્રુત્વા શિવો હર્ષસમન્વિતઃ ।
ઉવાચ મધુરં વાક્યં બોધયંસ્તાં સહેતુકમ્ ॥ ૪૧॥

શિવ ઉવાચ ।
શ ૃણુ દેવિ પુરા વૃત્તં યેન ત્વં મત્પ્રિયાઽભવઃ ।
તત્તેઽહં કથયિષ્યામિ કથાસારં સુખપ્રદમ્ ॥ ૪૨॥

વિવાદઃ પઞ્ચદેવાનાં સ્પર્ધયા સમભૂચ્ચ યઃ ।
તત્રૈશ્વર્યં મયા દૃષ્ટં ત્વદીયં મહદદ્ભુતમ્ ॥ ૪૩॥

(Page  ખં. ૧ અ. ૧૭-૧૮ પાન ૪૧)
પઞ્ચાનાં બોધકો દેવો ગણેશોંઽતર્દધે યદા ।
બોધયિત્વા યથાન્યાયમસ્માન્ બ્રહ્મમયઃ પ્રભુઃ ॥ ૪૪॥

તતો મયા તપસ્તપ્તં તવ પ્રાપ્તૌ પ્રિયે મહત્ ।
ભક્તિભાવેન સન્તુષ્ટા ત્વં જાતા શતવર્ષતઃ ॥ ૪૫॥

મત્સમીપે સમાગમ્ય વૃણુષ્વ વરમીપ્સિતમ્ ।
પ્રસન્નાઽહં મહાદેવ દાસ્યેઽહમિતિ ચાબ્રવીઃ ॥ ૪૬॥

ત્વાં નત્વા સ્તુતવાન્નાનાચેષ્ટિતૈસ્ત્વત્સ્વરૂપકૈઃ ।
તેન તષ્ટિઃ પરા જાતા તવાપિ જગદીશ્વરિ ॥ ૪૭॥

મયા પ્રયાચિતં દેવિ ત્વં મે પત્ની ભવ પ્રિયે ।
એષ એવ વરો મહ્યં દાતવ્યો જગદીશ્વરિ ॥ ૪૮॥

મદીયં વચનં શ્રુત્વા સસ્મિતા ભાવપૂર્વકમ્ ।
જાતા ત્વં મે વરં દત્ત્વાંઽતર્ધાનં ચ કૃતં ત્વયા ॥ ૪૯॥

અતસ્ત્વં મે પ્રિયા જાતા વરદાનપ્રભાવતઃ ।
તવ વામાઙ્ગસમ્ભૂતા લક્ષ્મીનારાયણપ્રિયા ॥ ૫૦॥

દક્ષિણાઙ્ગાત્ સમુદ્ભુતા સાવિત્રી બ્રહ્મણઃ પ્રિયા ।
હૃદયાત્તે ચ સમ્ભૂતા સંજ્ઞા પત્ની રવેરપિ ॥ ૫૧॥

ઇતિ સર્વં સમાખ્યાતં સ્મર સર્વં શુચિસ્મિતે ।
સાધય ત્વં પુનર્યોગં ગાણેશં શાન્તિદં પરમ્ ॥ ૫૨॥

મુદ્ગલ ઉવાચ ।
શિવેન કથિતં સર્વં શ્રુત્વા દેવી નગાત્મજા ।
એકાન્તે સાધયામાસ યોગં ગણપતેઃ પરમ્ ॥ ૫૩॥

પૂર્વસંસ્કારભાવેન સ્વલ્પકાલેન સા શિવા ।
શાન્તિં પ્રાપ્તા મહાભાગા પ્રયયૌ શિવસન્નિધૌ ॥ ૫૪॥

મુદલ ઉવાચ ।
ઇતિ તે કથિતં દક્ષ ચેષ્ટિતં ગણપસ્ય ચ ।
ભજ ત્વં સર્વભાવેન ગણેશં બ્રહ્મનાયકમ્ ॥ ૫૫॥

તેન ત્વં વિઘ્નહીનોઽપિ ભવિતાસિ ન સંશયઃ ।

સર્વમાન્યો મહાયોગી શોકહીનો જગદ્ગુરુઃ ॥ ૫૬॥

॥ ॐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે શિવપાર્વતીસંવાદસમાપ્તિર્નામ સપ્તદશોઽધ્યાયઃ ॥ ૧.૧૭

## ૧.૧૮ મુદ્ગલદેવદૂતસંવાદો નામાષ્ટાદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શૌનક ઉવાચ ।
શ્રુતં સૂત મહાભાગ કથિતં પરમાદ્ભુતમ્ ।
ચરિતં ગણનાથસ્ય તેન તૃપ્તા વયં પ્રભો ॥ ૧॥

શિવશક્તિમહાવાદં શ્રુત્વા તૃષ્ણા વિવર્ધતે ।
પુનશ્ચ વદ સૂત ત્વં ગણેશસ્ય વિચેષ્ટિતમ્ ॥ ૨॥

સૂત ઉવાચ ।
શૃણુ શૌનક યત્નેન દક્ષેણૈવં મહામુનિઃ ।
સત્કથામૃતપાનં ચ કૃત્વા પૃષ્ટઃ પુનશ્ચ યત્ ॥ ૩॥

શક્તિશઙ્કરસંવાદં બ્રહ્મભૂયપદપ્રદમ્ ।
શ્રુત્વા દક્ષો મહાભાગઃ પપ્રચ્છ મુનિસત્તમઃ ॥ ૪॥

(Page  ખં. ૧ અ. ૧૮ પાન ૪૨)
દક્ષ ઉવાચ ।
કિઞ્ચિત્પુરાતનં પુણ્યં ફલિતં મે મહાદ્ભુતમ્ ।
પીતં મુદ્ગલ તે વક્ત્રાત્ કથામૃતમિદં મયા ॥ ૫॥

ધન્યોઽસિ કૃતકૃત્યોઽસિ ગણેશે ભક્તિમાનસિ ।
ગણેશાચ્ચ પરં નાસ્તિ જ્ઞાતં ત્વદ્વાક્યતો મયા ॥ ૬॥

વદ મુદ્ગલ માહાત્મ્યં પુનર્ગણપતેઃ શુભમ્ ।
ન તૃપ્તોઽહં મહાયોગિન્ પીત્વા બ્રહ્મામૃતં મહત્ ॥ ૭॥

શિવશૈલસુતાવાદો મહાનન્દપ્રદાયકઃ ।
તત્રાષ્ટૌ ગણરાજસ્ય હ્યવતારાઃ શ્રુતા મયા ॥ ૮॥

તેષાં તચ્ચરિતં ચાઽપિ માહાત્મ્યં તેઽપિ યન્ મહત્ ।
શ્રોતુમિચ્છામિ યોગીશ દયાં કૃત્વા વદસ્વ મે ॥ ૯॥

કિમર્થં ગણરાજોઽયમવતારં કરોતિ વૈ ।
બ્રહ્મભૂયમયો દેવસ્તદ્વદસ્વ મહામુને ॥ ૧૦॥

પરોપકરણાર્થાય ત્વાદૃશા મુનિસત્તમાઃ ।
ભ્રમન્તિ ધરણીં બ્રહ્મન્ પતિતેભ્યઃ સુખપ્રદાઃ ॥ ૧૧॥

દર્શનસ્પર્શનેનૈવ ભાષણેન વિશેષતઃ ।
પાવયન્તિ જનાન્ સર્વાન્ સાધવઃ સમદર્શિનઃ ॥ ૧૨॥

સૂત ઉવાચ ।
શ્રુત્વા દક્ષવચો રમ્યં પ્રત્યુવાચ સ મુદ્ગલઃ ।
પ્રહૃષ્ટો ભાવયુક્તસ્ય દક્ષસ્ય ચ મહાત્મનઃ ॥ ૧૩॥

મુદ્ગલ ઉવાચ ।
શ‍ૃણુ દક્ષ મહાભાગ ધન્યોઽસિ ન ચ સંશયઃ ।
યેન ત્વં ગણનાથસ્ય કથાં પૃચ્છસિ માં પ્રભો ॥ ૧૪॥

પાપિનાં નાસ્તિકાનાં વૈ દામ્ભિકાનાં કદાચન ।
સત્કથાઽમૃતપાનસ્ય ચેચ્છા નોત્પદ્યતે ક્વચિત્ ॥ ૧૫॥

દ્વન્દ્વભાવવિચારજ્ઞાસ્તથા સહનકારકાઃ ।
ભૂતેષુ સમભાવાશ્ચ સંસારતરણે રતાઃ ॥ ૧૬॥

પરોપકારકાર્યેષુ મતિસ્તેષાં પ્રવર્તતે ।
એતાદૃશા મહાભાગા ગણેશે સાદરાઃ પ્રભો ॥ ૧૭॥

કથાં ગણપતેર્નિત્યં શ‍ૃણ્વન્તિ ચ પઠન્તિ તે ।
શ્રાવયન્તિ જનાનન્યાન્ ભક્તિભાવસમન્વિતાઃ ॥ ૧૮॥

અતસ્ત્વં સાદરો ભૂત્વા શ‍ૃણુષે પાપનાશિનીમ્ ।
કૃત્વા વર્ધયસિ પ્રશ્નં કથાં ગણપતેઃ શુભામ્ ॥ ૧૯॥

શ‍ૃણુ યચ્ચ પુરાવૃત્તં મદીયં ભાવપૂર્વકમ્ ।
તવાઽગ્રે કથયિષ્યામિ સંશયો યેન નશ્યતિ ॥ ૨૦॥

અવતારકથામગ્રે જ્ઞાસ્યસિ ત્વં યથાર્થતઃ ।
ગણરાજપદં સર્વં પ્રાપ્સ્યસિ ત્વં ચ ભક્તિમાન્ ॥ ૨૧॥

અહં તપસિ સંવિષ્ટઃ શિલોઞ્છાજીવમાશ્રિતઃ ।
દશ પઞ્ચ દિનેષ્વેવ દ્વાદશ્યાં મમ પારણમ્ ॥ ૨૨॥

દ્રોણમાત્રં ચિનોમ્યન્નમુપોષણસમન્વિતઃ ।
તેનાન્નેન યથાન્યાયં પઞ્ચયાગાનકૃષ્યહમ્ ॥ ૨૩॥

એવં બહુગતે કાલે તપસે મયિ સંસ્થિતે ।
દેવાઃ સર્વે ભયોદ્વિગ્નાઃ કિમયં સાધયિષ્યતિ ॥ ૨૪॥

ઐદ્રં પદં વિધાતુર્વા વૈષ્ણવં શૈવમેવ ચ ।
કિં વાઞ્છતિ મહાભાગો મુનિસ્તપસિ સંસ્થિતઃ ॥ ૨૫॥

ઇતિ દેવૈઃ પ્રેષિતસ્તુ મુનિઃ સર્વાર્થકોવિદઃ ।
મમાશ્રમે પરીક્ષાર્થં દુર્વાસાઃ કોપવાન્ યયૌ ॥ ૨૬॥

નગ્ન ઉન્મત્તતુલ્યઃ સન્નાગતઃ પારણે મમ ।
મહ્યં ભિક્ષાં મુને દેહિ યયા તૃપ્તો ભવામ્યહમ્ ॥ ૨૭॥

ઇત્યૂચે તુ મયા દત્તમન્નં તસ્મૈ મહાત્મને ।
ન જ્ઞાતો મુનિમુખ્યોઽયં દુર્વાસા આગતો ગૃહમ્ ॥ ૨૮॥

તદન્નં સકલં ભુક્ત્વા દ્રોણમાત્રં મહામુનિઃ ।
(Page ખં. ૧ અ. ૧૮ પાન ૪૩)
ઉચ્છિષ્ટં લિપ્તવાન્ દેહે ગતો વિકલમાનસઃ ॥ ૨૯॥

માનસે મે મહાનન્દઃ પ્રાપ્તો દક્ષ પ્રજાપતે ।
ધન્યં તપો મદીયં વૈ તૃપ્તઃ સર્વાન્નભુક્ જનઃ ॥ ૩૦॥

ઉપોષણે સમાયુક્તોઽહં તત્ર તપસિ સ્થિતઃ ।
પુનઃ સ દ્વાદશીઘસ્રે પારણાર્થં સમાયયૌ ॥ ૩૧॥

દુર્વાસસં પુનર્યાતં તાદૃશં વેષમાસ્થિતમ્ ।
મહતા હર્ષયુક્તેનાઽપૂજયં ચ મહામુનિમ્ ॥ ૩૨॥

સર્વાન્નં ભુક્તવાન્ સદ્ય એવં ષડ્વારમાયયૌ ।
મમ ભાવપરીક્ષાર્થં તપઃખણ્ડનકારકઃ ॥ ૩૩॥

પૂર્વપુણ્યપ્રભાવેણ ચ્યાવિતો ન મનાગપિ ।
ત્રિમાસોપોષિતો ભાવયુક્તેન તપસાઽભવમ્ ॥ ૩૪॥

તપસા ભાવશુદ્ધેન પરિતુષ્ટો મહામુનિઃ ।
સ્વરૂપં દર્શયામાસ યોગરૂપં મહાદ્ભુતમ્ ॥ ૩૫॥

ઉવાચ શુદ્ધિમાપન્નો મુદ્ગલ ત્વં ન સંશયઃ ।

ગચ્છ સ્વર્ગં મહાભાગ અક્ષયં ભોક્તુમર્હસિ ॥ ૩૬॥

સ્વર્ગલોકા જિતાઃ સર્વે ત્વયાऽક્ષય્યપ્રકાશકાઃ ।
તપસા શુદ્ધભાવેનાધુના તાન્ ગચ્છ મુદ્ગલ ॥ ૩૭॥

ઇત્યુક્ત્વા માં સ દુર્વાસા ગતઃ સ્વાશ્રમમણ્ડલે ।
તસ્મિન્નેવ ક્ષણે સ્વર્ગાદ્વિમાનં તત્ર ચાગતમ્ ॥ ૩૮॥

વિમાનાત્ પુરુષો દિવ્યભૂષણૈર્ભૂષિતઃ પરઃ ।
ઉત્તીર્ય મે સુસાન્નિધ્યમાગતઃ પૂજિતો મયા ॥ ૩૯॥

ઉવાચ મધુરં વાક્યં ચલેતિ ત્વં મયાસહ ।
સ્વર્ગાદાગતવન્તં વૈ વિદ્ધિ મુદ્ગલ માં તથા ॥ ૪૦॥

બૃહસ્પતિપુરોગઃ સ દેવ ઇન્દ્રઃ પ્રતાપવાન્ ।
ત્વદર્થં સંસ્થિતઃ સ્વામિન્ તેનાહં પ્રેષિતો મુને ॥ ૪૧॥

ઇદં વિમાનમારુહ્ય નાનાભોગસમન્વિતમ્ ।
મયા સાર્ધં મહાભાગ ચલ સ્વર્ગં સુભોગદમ્ ॥ ૪૨॥

સૂત ઉવાચ ।
દેવદૂતવચો રમ્યં શ્રુત્વૈવં મુદ્ગલો મુનિઃ ।
વિનયાવનતો ભૂત્વા તં પપ્રચ્છ મુદાન્વિતઃ ॥ ૪૩॥

મુદ્ગલ ઉવાચ ।
સ્વર્ગેષુ સર્વલોકેષુ કે ગુણાઃ સન્તિ તાન્ વદ ।
દોષાઃ કે તત્ર તિષ્ઠન્તિ શ્રુત્વા યામિ ત્વરાન્વિતઃ ॥ ૪૪॥

સૂત ઉવાચ ।
મુદ્ગલસ્ય વચઃ શ્રુત્વા દેવદૂતસ્તમબ્રવીત્ ।
વિનયેન ચ સન્તુષ્ટો યથાતથ્યં વિભાગશઃ ॥ ૪૫॥

દેવદૂત ઉવાચ ।
કર્મભૂમિરિયં બ્રહ્મન્ ભોગભૂમિસ્તુ સા મતા ।
સ્વર્ગરૂપા નરાદીનાં કર્મભોગપ્રદાયિની ॥ ૪૬॥

નાનાસુખપ્રદં તત્ર ગુણં વક્તું ન શક્યતે ।
ઈપ્સિતં લભતે સર્વં સદા યૌવનસંસ્થિતિઃ ॥ ૪૭॥

ક્લમઃ સ્વેદાદિકં તત્ર નૈવ શીતોષ્ણતા તથા ।

અપ્સરોભિર્વિહારાશ્ચ કામરૂપા ગતિર્ભવેત્ ॥ ૪૮॥

સ્વકર્મતુલ્યભોગાશ્ચ ભોક્તવ્યાઃ સર્વભાવતઃ ।
યે યે ભોગા દેહિનાં ચ તે તે તત્ર સમાસ્થિતાઃ ॥ ૪૯॥

ભોગભૂમિઃ સમાખ્યાતા સ્વર્ગરૂપા મહામુને ।
વદ તત્ર ચ કિં ન્યૂનં યતઃ પૃચ્છસિ માં પ્રભો ॥ ૫૦॥

ત્વયા નાનાવિધં કર્મ તપસા સાધિતં મુને ।
સ્વર્ગલોકાઃ કૃતાઃ સર્વેઽક્ષયાસ્તાન્ ભોક્તુમર્હસિ ॥ ૫૧॥

તત્ર સ્વર્ગે ત્રયો દોષાસ્તાન્ શૃણુષ્વ મહામુને ।
ઇહ કર્મ કૃતં લોકૈર્ભોક્તવ્યં શુભરૂપકમ્ ॥ ૫૨॥

તત્ર કર્મ કૃતં લોકૈઃ તદેવ ફલહીનકમ્ ।
તેન લોકો હિ દુઃખ્યસ્તિ તદન્તે કિં ભવેદિતિ ॥ ૫૩॥

(Page ખં. ૧ અ. ૧૮-૧૯ પાન ૪૪)
એતાદૃશં મયા કર્મ પુણ્યરૂપં કૃતં મહત્ ।
એતાવન્તં ચ કાલં મે સ્વર્ગવાસો ભવિષ્યતિ ॥ ૫૪॥

એકં દોષં મહાન્તં ચ જાનીહિ મુનિસત્તમ ।
દ્વિતીયં શૃણુ દોષં ત્વં કથયામિ સવિસ્તરમ્ ॥ ૫૫॥

નાના સ્વર્ગેષુ મિત્રાણિ નાના પ્રીતિવિવર્ધનાઃ ।
દેવાસ્તત્ર મહાભાગ સહ તૈર્મોદતે સ્વયમ્ ॥ ૫૬॥

સત્કર્મ તસ્ય તેનૈવ ભુક્તં સ્વર્ગે યથાયથમ્ ।
પશ્ચાત્ પતનકાલ તુ તમધઃ પાતયન્તિ તે ॥ ૫૭॥

ક્ષણમેકં ન તં કોઽપિ સ્નેહં પશ્યતિ લોકપઃ ।
પતનસ્ય ભયં ચિત્તે દોષોઽયં પાતરૂપકઃ ॥ ૫૮॥

તૃતીયં દોષરૂપં યચ્છૃણુ ત્વં ભાવપૂર્વકમ્ ।
તદ્વદિષ્યામિ તે પ્રીત્યા યેન જ્ઞાનં ભવેત્પરમ્ ॥ ૫૯॥

સત્કર્મકારિણસ્ત્વન્યે મહાભોગકરા મુને ।
સન્તિ સ્વર્ગેષુ ચાનેકે તાન્ દૃષ્ટ્વા તપતિ સ્વયમ્ ॥ ૬૦॥

ધિઙ્ માં ન્યૂનવિહારેણ તિષ્ઠામિ સ્વલ્પપુણ્યતઃ ।
મહાપુણ્યકરા અન્યે અધિકં વિહરન્ત્યુત ॥ ૬૧॥

સદા હૃદિ તપત્યેવં સ્વર્ગભૂમિસ્વભાવતઃ ।
હૃદિ તાપાત્મકો દોષસ્તૃતીયઃ કથિતો મયા ॥ ૬૨॥

અનન્તગુણસંયુક્તં સ્વર્ગં જાનીહિ તાપસ ।
દોષૈસ્ત્રિભિઃ સમાયુક્તં મહાપુણ્યપ્રભાવતઃ ॥ ૬૩॥

ધન્યસ્ત્વં મુનિશાર્દૂલ તત્ સ્વર્ગે વિજિતે ત્વયા ।
ભુઙ્ક્ષ્વ ભોગાન્ મનોજ્ઞાન્ વૈ ચલ શીઘ્રં મયા સહ ॥ ૬૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે મુદ્ગલદેવદૂતસંવાદો નામાષ્ટાદશોઽધ્યાયઃ ॥ ૧.૧૮

## ૧.૧૯ અઙ્ગિરામુદ્ગલસંવાદો નામૈકોનવિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
દેવદૂતવચઃ શ્રુત્વા મુદ્ગલસ્તમથાબ્રવીત્ ।
શ઼ૃણુ શૌનક માહાત્મ્યં મુનેસ્તસ્ય સુયોગિનઃ ॥ ૧॥

મુદ્ગલ ઉવાચ ।
દેવદૂત મયા સર્વં ત્વયોક્તં બુદ્ધિપૂર્વકમ્ ।
શ્રુતં પુનઃ પ્રપૃચ્છામિ તન્ મે વદ મહામતે ॥ ૨॥

દોષૈસ્ત્રિભિવિહીનં તં કં લોકં વદ મે પ્રભો ।
મનસ્તાપવિહીનાશ્ચ મોદન્તે યત્ર માનવાઃ ॥ ૩॥

સૂત ઉવાચ ।
મુદ્ગલસ્ય વચઃ શ્રુત્વા દેવદૂત ઉવાચ હ ।
લોકં ચ તમહં તુભ્યં કથયામિ સવિસ્તરમ્ ॥ ૪॥

દેવદૂત ઉવાચ ।
નિષ્કામકર્મણા વિપ્ર બ્રહ્મલોકઃ પ્રલભ્યતે ।
વૈકુણ્ઠઃ શિવલોકશ્ચ સૌરઃ શાક્તો જનેન ચ ॥ ૫॥

તત્રાઽપિ દોષયુક્તત્વં વર્તતે મુનિસત્તમ ।
બ્રહ્મભૂયપદં યચ્ચ દોષહીનં પ્રચક્ષતે ॥ ૬॥

દેવદૂતમુખાદિત્થં શ્રુત્વા વૈ મુદ્ગલો મુનિઃ ।
તં પપ્રચ્છ પુનઃ સાધુર્ભક્તિનમ્રાત્મકન્ધરઃ ॥ ૭॥

(Page ખં. ૧ અ. ૧૯ પાન ૪૫)
મુદ્ગલ ઉવાચ ।
કુત્ર તલ્લભ્યતે સ્વામિન્ વદ સર્વમશેષતઃ ।
ઉપકારપરોઽસિ ત્વં તેન પૃચ્છામિ તત્ત્વતઃ ॥ ૮॥

દેવદૂત ઉવાચ ।
કર્મભૂમિરિયં બ્રહ્મન્નત્ર વૈ લભ્યતે જનૈઃ ।
ધર્માર્થકામમોક્ષાદિ બ્રહ્મભૂયં ન સંશયઃ ॥ ૯॥

શ્રુત્વા તસ્ય વચો રમ્યં મુદ્ગલસ્તમુવાચ હ ।
ગચ્છ દૂત નમસ્તુભ્યં સ્વર્ગં પ્રતિ નયામ્યહમ્ ॥ ૧૦॥

હૃદિ સન્તાપસંયુક્તં પુનઃ પાતભયાત્મકમ્ ।
સ્વર્ગં નેચ્છામિ ભો વિદ્વન્ બ્રહ્મ તત્સાધયામ્યહમ્ ॥ ૧૧॥

દેવદૂત ઉવાચેદં મુદ્ગલં મુનિસત્તમમ્ ।
ભાગ્યહીનોઽસિ નૂનં ત્વં સ્વર્ગં નૈવાભિનન્દસિ ॥ ૧૨॥

સ્વર્ગેચ્છા કસ્ય નૈવાસ્તિ નરસ્ય વદ માં મુને ।
ઉગ્રૈસ્તપોભિર્દાનૈશ્ચ યજ્ઞૈઃ સ્વર્ગશ્ચ લભ્યતે ॥ ૧૩॥

નાનાપુણ્યાદિકં કૃત્વા સત્કર્માદિસુસાધનૈઃ ।
ઇચ્છન્તિ મનુજાઃ સ્વર્ગં મહાસૌખ્યપ્રદં પરમ્ ॥ ૧૪॥

સ સ્વર્ગશ્ચ ત્વયા પ્રાપ્તસ્તપસોગ્રૈઃ સુસાધનૈઃ ।
નેચ્છસિ ત્વં મહામૂઢ જ્ઞાનહીનોઽસિ મે મતમ્ ॥ ૧૫॥

દેવદૂતં વદન્તં તં તદા પુનરિદં વચઃ ।
મુદ્ગલઃ સ્નેહસંયુક્તઃ પ્રત્યુવાચ હસન્નિવ ॥ ૧૬॥

મુદ્ગલ ઉવાચ ।
કિં માં મોહયસિ પ્રાજ્ઞ દેહોઽયં બન્ધનાત્મકઃ ।
દેહસૌખ્યકરઃ સ્વર્ગો મુક્તિદો ન બુધૈઃ સ્મૃતઃ ॥ ૧૭॥

તત્રાપિ હૃદિ સન્તાપો વર્તતે દૂતસત્તમ ।
તાપત્રયસમાયુક્તં વિદ્વાન્નેચ્છતિ કર્હિચિત્ ॥ ૧૮॥

ગચ્છ ત્વં ચ મહાભાગ બૃહસ્પતિપુરોગમમ્ ।
ઇન્દ્રં પ્રણામં કથય નાઽઽગતો મુનિરિત્યપિ ॥ ૧૯॥

એવમુક્ત્વા નમસ્કૃત્ય દેવદૂતમહં પ્રભો ।
અગ્રેશ્ચ ગતવાન્ શાલાં ગતો દૂતો યથાગતમ્ ॥ ૨૦॥

મયાઽપિ સ્વાશ્રમે તત્ર સ્થિતં મનસિ ધારિતમ્ ।
વિધિના બ્રહ્મવેદેષુ નાનારૂપં પ્રકથ્યતે ॥ ૨૧॥

કિં પ્રમાણં ભવેત્તેષાં સાધનીયં મયા કથમ્ ।
પૂર્ણભાવમવિજ્ઞાય ભ્રાન્તોઽહં નાત્ર સંશયઃ ॥ ૨૨॥

અતઃ સંશયનાશાર્થં ગમિષ્યામિ મહામુનિમ્ ।
યોગિશ્રેષ્ઠૈરઙ્ગિરસં વન્દ્યં વેદજ્ઞમુત્તમમ્ ॥ ૨૩॥

શબ્દબ્રહ્મણિ નિષ્ણાતં પરે બ્રહ્મણિ તન્મયમ્ ।
અસ્માકં મૂલપુરુષં સાક્ષાદ્ બ્રહ્મશરીરકમ્ ॥ ૨૪॥

ઇતિ નિશ્ચિતવાંસ્તત્ર ગતોઽહં મુનિસન્નિધૌ ।
આશ્રમોઽસ્ય મયા દૃષ્ટઃ સર્વભૂતાભયપ્રદઃ ॥ ૨૫॥

નાતપો ન ચ શીતત્વં ન ક્રોધઃ કામસમ્ભવઃ ।
ન માત્સર્યાદિકં તત્ર સમકાલયુતો બભૌ ॥ ૨૬॥

નાવૃષ્ટિર્નાતિવૃષ્ટિશ્ચ હ્યકાલે મરણં ન ચ ।
ન ગ્રહાદિકૃતા પીડા તત્ર રક્ષોભયં ન ચ ॥ ૨૭॥

સર્વશાન્તિપ્રદઃ પૂર્ણસ્તાપસાનાં હિતાવહઃ ।
વિસ્મિતેન સુપુણ્યેન પ્રવિષ્ટો ભાગ્યયોગતઃ ॥ ૨૮॥

તત્ર નાનામુનીનાં ચ વત્સાઃ પરમશોભનાઃ ।
મયા દૃષ્ટા મહાભાગ વેદઘોષનિનાદિતાઃ ॥ ૨૯॥

અગ્નિહોત્રાદિભિર્યુક્તા નાનાપક્ષિનિનાદિતાઃ ।
વૃક્ષવલ્લીસમાયુક્તા નાનાપુષ્પફલાશ્રિતાઃ ॥ ૩૦॥

નાનાસરોવરાણ્યેવ હંસકારણ્ડવૈર્બભુઃ ।
નાનાપક્ષિવૃતાન્યેવ સુધારૂપજલાનિ વૈ ॥ ૩૧॥

સુનિર્મલપયાંસ્યેવ મકરાદિયુતાનિ ચ ।
કમલૈઃ કુમુદૈર્નાનાશોભમાનાનિ ષટ્પદૈઃ ॥ ૩૨॥

સિંહવ્યાઘ્રમૃગા નાગા ગજા ગાવશ્ચ મૂષિકાઃ ।
(Page ખં. ૧ અ. ૧૯ પાન ૪૬)
નિર્વૈરાઃ પ્રાણિનસ્તત્ર નિવસન્તિ પ્રજાપતે ॥ ૩૩॥

એવં દૃષ્ટ્વા મહાભાગ આશ્રમં હર્ષસંયુતઃ ।
પશ્યન્ પુનશ્ચ હ્યભવં વિસ્મિતો નિજચેતસિ ॥ ૩૪॥

તં વૈ કુશાસનસ્થં ચ સાક્ષાત્ સૂર્યમિવાપરમ્ ।
તેજસા દીપ્યમાનં ત્વપશ્યમઙ્ગિરસં મુનિમ્ ॥ ૩૫॥

સિદ્ધૈર્નાનાવિધૈશ્ચૈવ યોગિભિર્મુનિભિર્વૃતમ્ ।
શિષ્યેભ્યો બ્રહ્મવિદ્યાં તાં કથયન્તં યથાર્થતઃ ॥ ૩૬॥

દણ્ડવત્તં પ્રણમ્યાદૌ ભક્તિભાવયુતોઽભવમ્ ।
પ્રાઞ્જલિઃ પ્રયતો ભૂત્વા સંસ્થિતો મુનિસન્નિધૌ ॥ ૩૭॥

તવ ગોત્રભવં સ્વામિન્ મુદ્ગલં મુનિસત્તમ ।
દર્શનાર્થં સમાયાતં વિદ્ધિ માં બ્રહ્મદાયક ॥ ૩૮॥

મદીયં વચનં શ્રુત્વા પ્રસન્નઃ પ્રાહ માં મુનિઃ ।
વત્સ ત્વમાગતસ્તાત તિષ્ઠાઽત્ર મમ સન્નિધૌ ॥ ૩૯॥

અવિઘ્નભાવયુક્તેન તપસ્તપ્તં ત્વયા સુત ।
તેન મે દર્શનં પ્રાપ્તં સત્પુત્રોઽસિ ન સંશયઃ ॥ ૪૦॥

મુનેર્વચનમાકર્ણ્ય પ્રાપ્તોઽહં પરમાં મુદમ્ ।
તત્ર સ્થિતોઽભવં દક્ષ સન્નિધૌ તસ્ય ધીમતઃ ॥ ૪૧॥

કસ્મિંશ્ચિદ્ દિવસે તત્ર લબ્ધ્વાઽવસરમુત્તમમ્ ।
પૃષ્ટો મયા મહાયોગી શ‍ૃણ્વત્સુ ચ મુનિષ્વપિ ॥ ૪૨॥

જ્ઞાતુમિચ્છામિ ભો સ્વામિન્ વદ માં કરુણાનિધે ।
અસ્માકં ત્વં ગતિઃ સાક્ષાત્ સર્વેષાં ચૈવ ભક્તિતઃ ॥ ૪૩॥

સૂત ઉવાચ ।
વચનં મુદ્ગલસ્યાઽપિ શ્રુત્વા તં પુનરબ્રવીત્ ।
અઙ્ગિરા ભગવાન્ યોગી પ્રહસંસ્તં પ્રહર્ષયન્ ॥ ૪૪॥

અઙ્ગિરા ઉવાચ ।

મહ્યં પૃચ્છસિ કિં તાત તદ્ બ્રૂહિ ત્વં મહાદ્યુતે ।
ભાવતો મન્ત્રકર્તા ત્વં પુરાણાચાર્ય એવ ચ ॥ ૪૫॥

મુદ્ગલ ઉવાચ ।
કથિતં બ્રહ્મવેદેષુ નાનાભાવસમન્વિતમ્ ।
કિં પ્રમાણં વેદિતવ્યં બ્રહ્મભૂયેપ્સુભિઃ પ્રભો ॥ ૪૬॥

અઙ્ગિરા ઉવાચ ।
શ‍ૃણુ પુત્ર પ્રવક્ષ્યામિ વેદાન્તૈયન્ત્પ્રભાષિતમ્ ।
ક્રમેણ બ્રહ્મલાભાર્થં નાનાબ્રહ્મનિરૂપણમ્ ॥ ૪૭॥

અન્નં બ્રહ્મેતિ યત્પ્રોક્તં તત્રોપાધિઃ સમાગતઃ ।
અન્નરૂપો મહાતેજા અન્નકોશમયં તતઃ ॥ ૪૮॥

પ્રાણો બ્રહ્મેતિ યત્પ્રોક્તં પ્રાણકોશપ્રકાશકમ્ ।
મનો બ્રહ્મેતિ જાનીહિ મનઃકોશમયં તથા ॥ ૪૯॥

વિજ્ઞાનં બ્રહ્મ ચોક્તં વિજ્ઞાનકોશપ્રધારકમ્ ।
આનન્દો બ્રહ્મ સમતાનન્દકોશપ્રભાસકમ્ ॥ ૫૦॥

ચૈતન્યં બ્રહ્મ યત્પ્રોક્તં મહાકારણધારકમ્ ।
બિન્દુબ્રહ્મ યદુક્તં તજ્જ્ઞાનદેહમયં મુને ॥ ૫૧॥

ચિદ્બ્રહ્મેતિ સમાખ્યાતં સોઽહં માત્રાત્મકં મતમ્ ।
બોધો બ્રહ્મેતિ વેદેષુ સ્વત ઉત્થાનવેદકમ્ ॥ ૫૨॥

સાઙ્ખ્યં બ્રહ્મેતિ યત્પ્રોક્તં વિદેહાધારકં સુત ।
કર્મજ્ઞાને તુ વેદે ચ કથિતે તે તદાત્મકે ॥ ૫૩॥

સમં બ્રહ્મેતિ જાનીહિ કથિતં નન્દનાત્મકમ્ ।
અવ્યક્તં સહજં બ્રહ્મ જ્ઞાતવ્યં નેતિરૂપકમ્ ॥ ૫૪॥

(Page ખં. ૧ અ. ૨૦ પાન ૪૭)
શક્તિબ્રહ્મેતિ વેદેષુ હ્યસદ્રૂપપ્રકાશકમ્ ।
સૂર્યો બ્રહ્મેતિ યત્પ્રોક્તમાત્મરૂપં પ્રકીર્તિતમ્ ॥ ૫૫॥

વિષ્ણુર્બ્રહ્મેતિ યત્પ્રોક્તમુભયાત્મકધારકમ્ ।
શિવો બ્રહ્મેતિ શાસ્ત્રેષુ નિર્મોહસ્ય પ્રકાશકમ્ ॥ ૫૬॥

સ્વાનન્દો બ્રહ્મવેદે ચ સંયોગમયમુત્તમમ્ ।

નિર્વૃત્તિર્બ્રહ્મશાસ્ત્રેષુ હ્યયોગાધારકં પરમ્ ॥ ૫૭॥

એવં નાનાપ્રકારૈશ્ચ વેદાદૌ ચ પ્રકથ્યતે ।
મુનિભિર્બ્રહ્મવાદજ્ઞૈઃ સર્વં તથ્યં પ્રમાણતઃ ॥ ૫૮॥

બૃંહત્યથો બૃંહયતિ યદ્બ્રહ્મ શ્રુતિવાક્યતઃ ।
તદેવ બ્રહ્મભૂતત્વં જ્ઞાતવ્યં મુનિભિઃ સદા ॥ ૫૯॥

અનાદ્યાત્મચિદાદ્યૈર્યદ્યુક્તં બ્રહ્મ પ્રકથ્યતે ।
તદેવોપાધિયુક્તં વૈ યોગિભિઃ સુવિચારિતમ્ ॥ ૬૦॥

બ્રહ્મેતિ બ્રહ્મ વિજ્ઞેયં તચ્ચ યોગેન લભ્યતે ।
તદર્થં મથનં સર્વં કર્મજ્ઞાનાદિકસ્ય ચ ॥ ૬૧॥

તદેવ બ્રહ્મ પ્રત્યક્ષં બ્રહ્મણસ્પતિવાચકમ્ ।
બ્રહ્મણાં બ્રહ્મ વિખ્યાતં વેદસ્મૃતિસુભાષિતમ્ ॥ ૬૨॥

બૃંહત્યથો બૃંહયતિ ગણશબ્દઃ પ્રકીર્તિતઃ ।
સમૂહે ગણધાતુશ્ચ કવિભિઃ કથિતો ભવેત્ ॥ ૬૩॥

બાહ્યાન્તરાદિકાનાં ચ સમૂહો ગણ ઉચ્યતે ।
તત્રાઽભેદેન યોગેન પ્રાપ્યતે યોગિભિઃ પરઃ ॥ ૬૪॥

અન્નાનાં બહવો ભેદા બાહ્યાન્તરવિભાવતઃ ।
તદેવ ગણવાચ્યં ચ જ્ઞાતવ્યં વિવુધૈઃ સદા ॥ ૬૫॥

ઇત્યાદયો ગણાસ્તસ્યાનન્તા બ્રહ્મપ્રવાચકાઃ ।
તેષાં સ્વામી ગણેશાનઃ સ એવ બ્રહ્મણસ્પતિઃ ॥ ૬૬॥

તં ભજસ્વ મહાભાગ બ્રહ્મભૂયં યદીચ્છસિ ।
તસ્યાવતારદેહા યં જ્ઞાનાદિબ્રહ્મસંજ્ઞિતાઃ ॥ ૬૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુડચરિતે અઙ્ગિરામુદ્ગલસંવાદો નામૈકોનવિંશતિતમોઽધ્યાયઃ ॥ ૧.૧૯

## ૧.૨૦ ગણેશમુદ્ગલસમાગમો નામ વિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
વચઃ શ્રુત્વા ચાઙ્ગિરસો હૃષ્ટરોમા સ મુદ્ગલઃ ।

વિનયાવનતો ભૂત્વોવાચ તં વિસ્મયન્નિવ ॥ ૧॥

મુદ્ગલ ઉવાચ ।
તસ્યાવતારમાહાત્મ્યં કથયસ્વ મહામુને ।
તત્ક્રમેણ ભજિષ્યામિ બ્રહ્મભૂયસ્ય સિદ્ધયે ॥ ૨॥

અઙ્ગિરા ઉવાચ ।
અનન્તા હ્યવતારાશ્ચ ગણેશસ્ય મહાત્મનઃ ।
ન શક્યન્તે ચ તે વક્તું મયા વર્ષશતૈરપિ ॥ ૩॥

સઙ્ક્ષેપેણ પ્રવક્ષ્યામિ મુખ્યાનાં મુખ્યતાં ગતાન્ ।
અવતારાંશ્ચ તસ્યાષ્ટૌ વિખ્યાતાન્ બ્રહ્મધારકાન્ ॥ ૪॥

વક્રતુણ્ડાવતારશ્ચ દેહાનાં બ્રહ્મધારકઃ ।
મત્સરાસુરહન્તા સ સિંહવાહનગઃ સ્મૃતઃ ॥ ૫॥

એકદન્તાવતારો વૈ દેહિનાં બ્રહ્મધારકઃ ।
મદાસુરસ્ય હન્તા સ આખુવાહનગઃ સ્મૃતઃ ॥ ૬॥

મહોદર ઇતિ ખ્યાતો જ્ઞાનબ્રહ્મપ્રકાશકઃ ।
મોહાસુરસ્ય શત્રુર્વૈ આખુવાહનગઃ સ્મૃતઃ ॥ ૭॥

ગજાનનઃ સ વિજ્ઞેયઃ સાઙ્ખ્યેભ્યઃ સિદ્ધિદાયકઃ ।
(Page ખં. ૧ અ. ૨૦ પાન ૪૮)
લોભાસુરપ્રહર્તા વૈ આખુગશ્ચ પ્રકીર્તિતઃ ॥ ૮॥

લમ્બોદરાવતારો વૈ ક્રોધાસુરનિબર્હણઃ ।
શક્તિબ્રહ્માખુગઃ સદ્યત્તસ્ય ધારક ઉચ્યતે ॥ ૯॥

વિકટો નામ વિખ્યાતઃ કામાસુરવિદાહકઃ ।
મયૂરવાહનશ્ચાઽયં સૌરબ્રહ્મધરઃ સ્મૃતઃ ॥ ૧૦॥

વિઘ્નરાજાવતારશ્ચ શેષવાહન ઉચ્યતે ।
મમતાસુરહન્તા સ વિષ્ણુબ્રહ્મેતિ વાચકઃ ॥ ૧૧॥

ધૂમ્રવર્ણાવતારશ્ચાભિમાનાસુરનાશકઃ ।
આખુવાહન એવાઽસૌ શિવાત્મા તુ સ ઉચ્યતે ॥ ૧૨॥

એતેઽષ્ટૌ તે મયા પ્રોક્તા ગણેશાંશા વિનાયકાઃ ।
એતે ભજનમાત્રેણ સ્વસ્વબ્રહ્મપ્રદાયકાઃ ॥ ૧૩॥

સ્વાનન્દવાસકારી યો ગણેશાનઃ પ્રકથ્યતે ।
સ્વાનન્દે યોગિભિર્દૃષ્ટો બ્રહ્મણ્યેવ ન સંશયઃ ॥ ૧૪॥

તસ્યાવતારભૂતાશ્ચાઽષ્ટૌ વિઘ્નહરણાઃ સ્મૃતાઃ ।
સ્વાનન્દભજનેનૈવ લીનાસ્તત્ર ભવન્તિ તે ॥ ૧૫॥

માયા તત્ર સ્વયં લીના ભવિષ્યતિ સુપુત્રક ।
સંયોગે મૌનભાવશ્ચ સમાધિઃ પ્રાપ્યતે જનૈઃ ॥ ૧૬॥

અયોગિગણરાજસ્ય ભજનેન વિનશ્યતિ ।
માયાભેદમયં બ્રહ્મ નિવૃત્તિઃ પ્રાપ્યતે પરા ॥ ૧૭॥

યોગાત્મકગણેશાનો બ્રહ્મણસ્પતિવાચકઃ ।
તત્ર શાન્તિઃ સમાખ્યાતા યોગરૂપા જનૈઃ કૃતા ॥ ૧૮॥

નાનાશાન્તિપ્રભેદશ્ચ સ્થાને સ્થાને પ્રકથ્યતે ।
શાન્તીનાં શાન્તિરૂપા સા યોગશાન્તિઃ પ્રકીર્તિતા ॥ ૧૯॥

યોગસ્ય યોગતા દૃષ્ટા સર્વબ્રહ્મસુપુત્રક ।
ન યોગાત્ પરમં બ્રહ્મ બ્રહ્મભૂતેન લભ્યતે ॥ ૨૦॥

એતદેવ પરં ગુહ્યં કથિતં વત્સ તેઽખિલમ્ ।
ભજ ત્વં સર્વભાવેન ગણેશં બ્રહ્મનાયકમ્ ॥ ૨૧॥

મયા પૂર્ણં તપશ્ચીર્ણં ગણેશસ્ય મહાત્મનઃ ।
મહ્યં દત્તો વરસ્તેન વાઞ્છિતો ભક્તિતોષતઃ ॥ ૨૨॥

તવ વંશે ચ ગાણેશા ભવિષ્યન્તિ વિશેષતઃ ।
તત્રાપિ મુદ્ગલોઽત્યન્તં ગાણપત્યો ભવિષ્યતિ ॥ ૨૩॥

ન મુગલસમો ભક્તો ગણેશસ્ય પ્રદૃશ્યતે ।
ન ભૂતો ન ભવિષ્યન્ વા ભક્તરાજઃ સ એકરાટ્ ॥ ૨૪॥

મુદ્ગલસ્ય પ્રણામેન સ્પર્શભાષણદર્શનૈઃ ।
વાયુસ્પર્શાદિભિર્ભાવૈરુદ્ધરિષ્યન્તિ જન્તવઃ ॥ ૨૫॥

મહ્યમેવં વરં દત્વા ગણેશોઽતર્દધે સુત ।
સ ત્વં મુદ્ગલનામાસિ મમ વંશસ્ય ભૂષણમ્ ॥ ૨૬॥

ધન્યો વંશો મદીયોદ્ય ગાણપત્યશ્ચ યત્ર વૈ ।
સમુત્પન્ના મહાભાગા જન્તૂનાં નારકાઃ સ્મૃતાઃ ॥ ૨૭॥

ત્વં સાક્ષાન્ મૂર્તિમાંસ્તેષુ ગાણપત્યઃ પ્રતાપવાન્ ।
સમુત્પન્નો મહાયોગી ભવિષ્યસિ ન સંશયઃ ॥ ૨૮॥

મુદ્ગલં ચૈવમુક્ત્વાતમઙ્ગિરા ઉપદિષ્ટવાન્ ।
એકાક્ષરમહામન્ત્રં ગણેશસ્ય યથાવિધિ ॥ ૨૯॥

ગચ્છ પુત્ર ત્વમદ્યૈવ તપસે વનમુત્તમમ્ ।
આરાધય ગણેશં સ દર્શનં તે પ્રદાસ્યતિ ॥ ૩૦॥

પ્રણમ્યાઽસૌ ચાઙ્ગિરસં મુદ્ગલઃ પ્રયયૌ વનમ્ ।
એકનિષ્ઠતયા તેપે તપઃ પૂર્ણં મહાદ્ભુતમ્ ॥ ૩૧॥

એકાક્ષરવિધાનેન સાઙ્ગેન પરિતુષ્ટવાન્ ।
ગણેશોઽબ્દસહસ્રેણ દિવ્યેન ચ સમાગતઃ ॥ ૩૨॥

આખુવાહશ્ચતુર્બાહુઃ સિદ્ધિબુદ્ધિસમન્વિતઃ ।
પ્રમોદામોદકાદ્યૈશ્ચ સંવૃતો ભક્તવત્સલઃ ॥ ૩૩॥

નાનાભૂષણશોભાઢ્યો ગજવક્ત્રો મહોદરઃ ।
(Page ખં. ૧ અ. ૨૧ પાન ૪૯)
એકદન્તસ્ત્રિનેત્રશ્ચ ચતુરાયુધભૂષિતઃ ॥ ૩૪॥

ચિન્તામણિમણિં બિભ્રદ્ હૃદયે દ્યુતિજાલકમ્ ।
મહાભક્તમુવાચેત્થં હર્ષયન્ સર્વભાવતઃ ॥ ૩૫॥

શ્રીગણેશ ઉવાચ ।
વરં વૃણુ મહાભાગ મુદ્ગલ સ્વેપ્સિતં હૃદિ ।
દાસ્યામિ પરમપ્રીત એકાક્ષરવિધાનતઃ ॥ ૩૬॥

સૂત ઉવાચ ।
ગણેશવચનં શ્રુત્વા મુદ્ગલઃ પ્રણનામ તમ્ ।
બદ્ધાઞ્જલિપુટો ભૂત્વા પૂજયામાસ ભક્તિતઃ ॥ ૩૭॥

પૂજયિત્વા યથાન્યાયં પ્રહૃષ્ટહૃદયો મુનિઃ ।
પુલકાઙ્કિતસર્વાઙ્ગઃ સાશ્રુનેત્રો બભૂવ હ ॥ ૩૮॥

સગદ્ગદમુવાચાઽથ તં પ્રણમ્ય પુનઃ પુનઃ ।
મહતા ભક્તિભાવેન તથા ચાઙ્ગિરસો મુનિઃ ॥ ૩૯॥

મુદ્ગલ ઉવાચ ।
ધન્યો વંશો મદીયોઽદ્ય ધન્યં જન્મ વયોઽપિ ચ ।
વિદ્યા જ્ઞાનં તપસ્તીર્થં ધન્યં ત્વદ્દર્શનાત્ પ્રભો ॥ ૪૦॥

ઇયં ધન્યાઽદ્ય પૃથ્વી ચ વૃક્ષાઃ પુષ્પફલાન્વિતાઃ ।
પશુપક્ષિલતાદ્યા યે આગતોઽત્ર મહાપ્રભુઃ ॥ ૪૧॥

ઇત્યુક્ત્વા તં પ્રતુષ્ટાવ ગણેશં સર્વસિદ્ધિદમ્ ।
સ્તોત્રેણ સ્વાત્મનિષ્ઠઃ સન્ ભક્ત્યા પરમયા યુતઃ ॥ ૪૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે ગણેશમુદ્ગલસમાગમો નામ વિંશોઽધ્યાયઃ ॥ ૧.૨૦

## ૧.૨૧ ગણેશસ્તોત્રોત્તમવર્ણને એકવિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શૌનક ઉવાચ ।
કથં સ્તુતિઃ કૃતા તેન ગણેશસ્ય મહાત્મનઃ ।
તાં મે વદ મહાભાગ સર્વજ્ઞોઽસિ મતો બુધૈઃ ॥ ૧॥

સૂત ઉવાચ ।
ભવતે કથયિષ્યામિ ભાવયુક્તેન ચેતસા ।
સ્તુતિં કૃતાં ગણેશસ્ય મુદ્ગલેન ચ તાં મુને ॥ ૨॥

મુદ્ગલ ઉવાચ ।
કિં સ્તૌમિ ત્વાં ગણાધ્યક્ષ વેદૈઃ સ્તોતું ન શક્યતે ।
બ્રહ્માદિભિશ્ચ યોગીન્દ્રૈર્યથામતિ ચ વચ્મિ ભોઃ ॥ ૩॥

ત્વદ્દર્શનપ્રભાવેણ શક્તોઽસ્મિ ન ચ સંશયઃ ।
ત્વદનુગ્રહતઃ સર્વે સ્તોતું શક્તા ભવન્તિ વૈ ॥ ૪॥

નમસ્તે ગણેશાય સર્વાદિભૂમ્ને પરેષાં પરેશાય વેદાતિગાય ।
પરં માયિને માયિનાં મોહદાત્રે હ્યગણ્યાય ગણ્યાય તે વૈ નમસ્તે ॥ ૫॥

પુરાણાદિશાસ્ત્રૈઃ સદા સંસ્તુતાય શિવાદ્યૈઃ સુરેન્દ્રૈર્નમસ્તે સ્તુતાય ।
અનાદ્યન્તમધ્યાદિભેદૈર્વિહીનાય નાનામયાયાસ્તુ સર્વેશ્વરાય ॥ ૬॥

નમો લક્ષવેદાષ્ટયોનિપ્રચારતદાકારરૂપાય યોગેન યોગિન્ ।

નમો હ્યન્નભૂતાય સર્વાકરાય કલાનન્તરૂપાય પુષ્ટિપ્રદાય ॥ ૭॥

નમો ભૂમિરૂપાય નાનાપ્રભેદધરાયાથ ધારાય નિત્યાય તેઽસ્તુ ।
જલાધિસ્વરૂપાય તૃપ્તિપ્રદાય તદાકારહીનાય સારાય ધામ્ને ॥ ૮॥

નમસ્તેજસાં દ્યોતરૂપાય ઢુણ્ઢે પ્રકાશાય ભોક્ત્રે ચ સર્વસ્થિતાય ।
નમો વાયુરૂપાય તે ચાલકાય પ્રચારસ્વરૂપાય ભિન્નાય તસ્માત્ ॥ ૯॥

નમઃ સ્વસ્વરૂપાય દીપ્તાય પૂર્ણપ્રકાશાય ભૂતાદિકબ્રહ્મદાત્રે ।
(Page ખં. ૧ અ. ૨૧ પાન ૫૦)
નમઃ સ્થૂલભોગસ્વરૂપાય જાગ્રન્મયાય પ્રભો રાજસાયાથ તેઽસ્તુ ॥ ૧૦॥

નમઃ સ્વપ્નમાયામયાયાપિ સૂક્ષ્મસ્વરૂપાય સર્વાન્તરે સંસ્થિતાય ।
નમઃ કારણાયોભયબ્રહ્મદાય સમાયાપિ સૌષુપ્તભોગિન્નમસ્તે ॥ ૧૧॥

નમશ્ચેતનાધારરૂપાય તેઽસ્તુ પ્રયત્નપ્રદાય ત્રિભોગપ્રદાય ।
ગુણેશાય ચૈતન્યધારાય તેઽસ્તુ નમો નાદરૂપાય કાલાય ચાત્મન્ ॥ ૧૨॥

નમો બિન્દુરૂપાય વક્રાનનાય નમો દેહમાયાવિહારાય તુભ્યમ્ ।
નમશ્ચિત્સ્વરૂપાય સોઽહં પ્રદાય નિરાકારદેહિસ્વરૂપાય તેઽસ્તુ ॥ ૧૩॥

સદા હ્યેકદન્તાય જન્માતિગાય પરાયાથ શૂન્યાય દૈત્યાન્તકાય ।
મદાદેશ્ચ શત્રો મહાખુધ્વજાય નમોઽનાદિસિદ્ધાય માયાધરાય ॥ ૧૪॥

નમો જ્ઞાનરૂપાય નાનાવિહારપ્રદાયાથ પૂર્ણાય સર્વત્રગાય ।
નમો માયિમાયાદિભેદાકરાય સદા બોધરૂપાય તે વૈ મહાત્મન્ ॥ ૧૫॥

નમઃ સાઙ્ખ્યરૂપાય વૈ દેહિનાં વૈ પરાય સ્વસમ્ભોગહીનાય દેવ ।
સદા કેવલબ્રહ્મભૂતાય તેઽસ્તુ નમો જ્ઞાનહીનાય મેધામયાય ॥ ૧૬॥

નમઃ સ્વસ્વરૂપાય ચાનન્દદાય સમાધિસ્વરૂપાય મૌનાત્મકાય ।
સ્વસંવેદ્યયોગેન લભ્યાય તેઽસ્તુ વિનાત્મપ્રબોધાય સર્વાધિપાય ॥ ૧૭॥

નમઃ પઞ્ચપઞ્ચાદિમાયાકરાય ચતુર્ધા ચતુર્ધા વિભિન્નાય ધર્મિન્ ।
અસદ્રૂપકાયાઽથ શક્ત્યાત્મકાય નમોઽભેદભેદાદિનાનાત્મકાય ॥ ૧૮॥

નમઃ સત્સ્વરૂપાય સૂર્યાત્મકાય સદાત્મપ્રબોધાય માયાધરાય ।
અખણ્ડામૃતાયાદ્વિતીયાય તેઽસ્તુ સદા કાલકાલાય મોક્ષપ્રદાય ॥ ૧૯॥

નમો વિષ્ણુરૂપાય ચાનન્દદાય સમાય સ્વમાયોભયસ્રષ્ટ્ર એવ ।
અનન્તાય ભેદાદિહીનાય ભૂમ્ને સદા ભેદરૂપાય સર્વાત્મકાય ॥ ૨૦॥

નમઃ શમ્ભુરૂપાય નેતિપ્રદાય સદા મોહહીનાય ચ ત્ર્યમ્બકાય ।
ત્રિધા માયયા ભાસિતુર્યસ્વરૂપપરબ્રહ્મરૂપાય તે ધૂમ્રવર્ણ ॥ ૨૧॥

ચતુર્ણામભેદાય સંયોગકારિન્ સ્વસંવેદ્યભાવેન વિઘ્નાધિપાય ।
સ્વભક્તસ્ય પક્ષે સદા સંસ્થિતાય ગણાધીશ હન્ત્રે મહાદૈત્યકાનામ્ ॥ ૨૨॥

નમઃ કર્મરૂપાય કર્માદિકર્ત્રે જનાનાં સ્વકર્માદિના ભોગદાત્રે ।
નમો જ્ઞાનરૂપાય નિઃસઙ્ગદાય સદા કર્મહીનાય તે કેવલાય ॥ ૨૩॥

નમસ્તે સમાનપ્રદાયોભયાય સમાયાઽથ યોગેન ચાનન્દદાય ।
નમઃ સાહજબ્રહ્મભૂયપ્રદાય ત્રિધામ્ને ત્રિહીનાય સન્તોષદાય ॥ ૨૪॥

ચતુર્ધા સ્થિતીનાં સદા પાલકાય નિજાત્મસ્વરૂપાય સંયોગકારિન્ ।
અપારાય નાના ચતુર્ણાં સમૂહેષ્વધીશાય હેરમ્બ તુભ્યં નમસ્તે ॥ ૨૫॥

અયોગાય માયાવિહીનાય તુભ્યં નમસ્તે નિરાનન્દરૂપાય નિત્યમ્ ।
નિવૃત્તિસ્વરૂપાય ભિન્નાય તેઽસ્તુ નમો યોગરૂપાસમાધિસ્થિતાય ॥ ૨૬॥

નમો યોગશાન્તિસ્વરૂપાય શાન્તિપ્રદાત્રે ગણેશાય યોગાય તુભ્યમ્ ।
સદા બ્રહ્મણાં બ્રહ્મદાત્રેઽખિલેશ ગણાનાં પતે જ્યેષ્ઠરાજાય તેઽસ્તુ ॥ ૨૭॥

(Page ખં. ૧ અ. ૨૧ પાન ૫૧)
નમો બ્રહ્મણે સૃષ્ટિકર્ત્રે સદા વૈ રજોધારિણે વેદશાસ્ત્રાદિકર્ત્રે ।
સદા સૃષ્ટિહીનાય સામ્યાય ધામ્ને નમો માયિને મધ્યવૃત્તિસ્થિતાય ॥ ૨૮॥

નમઃ સત્વરૂપાય વિષ્ણુપ્રભેદાજ્જગત્પાલકાયાથ માયાધરાય ।
નમઃ સત્ત્વહીનાય સર્વાતિગાય કવીનાં પતે વિઘ્નહન્ત્રે નમસ્તે ॥ ૨૯॥

નમસ્તામસાયાઽથ સંહારકર્ત્રે ત્રિનેત્રપ્રદીપાય શક્તેર્ધરાય ।
સદા કાલરૂપાય કૈલાસદાય તમોહીનરૂપાય લમ્બોદરાય ॥ ૩૦॥

નમઃ કર્મણાં મૂલબીજાય તેઽસ્તુ નમો ભાનુરૂપાય તેજોમયાય ।
ત્રિકાલાદિબોધાય સૂર્યાય ભૂમ્ને પ્રકાશૈર્વિહીનાય હેરમ્બ તેઽસ્તુ ॥ ૩૧॥

નમઃ શક્તિરૂપાય મોહપ્રદાય ક્રિયાધારભૂતાય નાનાભ્રમાય ।
અનન્તસ્વરૂપાધિલીલાધરાય નમઃ શક્તિહીનાય સિદ્ધીશ તુભ્યમ્ ॥ ૩૨॥

નમશ્ચન્દ્રરૂપાય પુષ્ટિપ્રદાય કલાભિસ્ત્રિલોકસ્થભૂતાદિકેભ્યઃ ।
સુધાધારકાયાઽથ નક્ષત્રકાદિપ્રકાશાય તે હ્યન્નહીનાય ઢુણ્ઢે ॥ ૩૩॥

નમઃ કામરૂપાય કામારયે તે નમસ્તે ગજાકારતુણ્ડાય તુભ્યમ્ ।
હરીન્દ્રાદિદેવૈઃ સદા સંસ્તુતાય શુકાદ્યૈર્મહદ્ભિશ્ચ વન્દ્યાય તેઽસ્તુ ॥ ૩૪॥

અનિત્યાય નિત્યાય દેવેશ દેવ સકામાય નિષ્કામભાવપ્રદાય ।
સદા સર્વપૂજ્યાય સર્વાધિપાય જલેશેન્દ્રશેષાદિભિઃ સંસ્તુતાય ॥ ૩૫॥

નમઃ કાશ્યપાયાઽથ વૈ કાપિલાય વરેણ્યસ્ય પુત્રાય પારાશરાય ।
નમઃ શમ્ભુપુત્રાય પાર્શ્વાત્મજાય નમો ભક્તિભોક્ત્રે ગણાધીશ તેઽસ્તુ ॥ ૩૬॥

નમો માધવસ્ત્રીસુતાયાઽથ તુભ્યં નમઃ સર્વમાત્રે નમઃ સર્વપિત્રે ।
નમઃ સર્વપુત્રાય સર્વાત્મકાય નમઃ સર્વસર્વાય નાનામયાય ॥ ૩૭॥

નમઃ પાશધારિન્ નમો દન્તધારિન્ સૃણિં બિભૃતે વૈ સદાનન્દદાયિન્ ।
નમઃ પુત્રપૌત્રાદિ રાજ્યપ્રદાત્રે નમો ભુક્તિમુક્તિપ્રદાયાઽથ તુભ્યમ્ ॥ ૩૮॥

નમોઽનન્તશક્તે ગુણાનામધીશ મયૂરેશ યોગેશ માયેશ તુભ્યમ્ ।
નમોઽવ્યક્તસુવ્યક્તરૂપાય દન્તિન્ ગજાકારસાકારમોહાય તેઽસ્તુ ॥ ૩૯॥

નમો હ્યેકરૂપાય નાનાપ્રભેદાદયે વિઘ્નપાલાય શુણ્ડાધરાય ।
અનાથાય નાથાય દેવાદિકાનાં નિવાસાય સર્વાત્મનાં તે નમો વૈ ॥ ૪૦॥

નમસ્ત્વમ્પદાકારદેહાય તુભ્યં નમસ્તત્પદાકારતુણ્ડાય તેઽસ્તુ ।
તયોરેકભાવાઽસિરૂપપ્રયુક્તશરીરાય સાક્ષાત્ સુધામ્ને નમસ્તે ॥ ૪૧॥

નમો વામભાગેન સિદ્ધિસ્વરૂપાધૃતામોહમાયાજનાનાં જનિત્રી ।
સદા બુદ્ધિરૂપા ધૃતા દક્ષિણાઙ્ગે ન પુંસ્ત્રીસ્વરૂપાઽસિરૂપાય તેઽસ્તુ ॥ ૪૨॥

નમો ભ્રામરી ત્વમ્પદાધારશક્તિઃ સદા તત્પદા કામદાત્રી હ્યભેદા ।
તયોરેકભાવે સ્વસંવેદ્યનામ્નિ પુરે મસ્તકે વાસકારિંશ્ચ તાસામ્ ॥ ૪૩॥

અખણ્ડામૃતં યત્ર તોયં સુતામ્રં સમુદ્રે સ્થિતં ચેક્ષુસંજ્ઞે નમસ્તે ।
નિરાધારરૂપે ચ પાનેન તસ્ય ન પુંસ્ત્રીપ્રદાયાઽત્ર ખેલંશ્ચ તેઽસ્તુ ॥ ૪૪॥

જનાનાં સદા ત્ર્યક્ષરં શ ૃણ્વતાં ચ ગણેશેતિ ચાનન્દદાયિન્નમસ્તે ।
સકૃજ્જલ્પતાં જન્મમૃત્યૂ ન તેષામપારપ્રધામ્ને ચ ઢુણ્ઢીશ્વરાય ॥ ૪૫॥

(Page ખં. ૧ અ. ૨૨ પાન ૫૨)
તવોપાસકા બ્રહ્મભૂતા ન ચિત્રં જનેભ્યશ્ચ સંસ્પર્શનૈર્બ્રહ્મદા વૈ ।
સુરેન્દ્રાદિપૂજ્યા ગણેશસ્વરૂપા ભવેયુર્નમસ્તે નમસ્તે ગણેશ ॥ ૪૬॥

સૂત ઉવાચ ।

ઇતિ સ્તુત્વા ગણેશાનં મુદ્ગલો મૌનધારકઃ ।
પાદૌ ધૃત્વા ગણેશસ્ય પતિતો દણ્ડવત્ ક્ષિતૌ ॥ ૪૭॥

સમુત્થાપ્ય સ્વભક્તં તં સસ્વજે પરમાદરાત્ ।
ગજાનનઃ પ્રસન્નાત્મા તમુવાચ મહામુનિમ્ ॥ ૪૮॥

ગણેશ ઉવાચ ।
ત્વયા સ્તોત્રં કૃતં યચ્ચ મદીયં મમ સન્નિધૌ ।
સ્તોત્રોત્તમં પ્રવિખ્યાતં ભવિષ્યતિ ન સંશયઃ ॥ ૪૯॥

સ્તોત્રોત્તમેન માં સ્તૌતિ તસ્મૈ મુક્તિં સભુક્તિકામ્ ।
દદામિ દૃઢભક્તિં ચ મદીયાં નાત્ર સંશયઃ ॥ ૫૦॥

ન સઙ્કટં ન રોગં ચ પ્રાપ્નોતિ સ નરોત્તમઃ ।
પુત્રપૌત્રાદિકં સર્વં ધનં ધાન્યં દદામિ વૈ ॥ ૫૧॥

મારણોચ્ચાટનાદીનિ નશ્યન્તિ પઠનેન ચ ।
એકવિંશતિવારં ચ તથા તાવદ્દિનાવધિ ॥ ૫૨॥

કારાગૃહાદિજાઃ પીડા નશ્યન્તિ પઠનેન ચ ।
મનસેપ્સિતમાપ્નોતિ નરો મે પરમપ્રિયઃ ॥ ૫૩॥

ત્વં તુ મત્તો વરાન્ બ્રૂહિ દાસ્યેઽહં ભક્તિયન્ત્રિતઃ ।
ત્વત્સમો નાસ્તિ ભાવજ્ઞો વશે તેઽહં સદા સ્થિતઃ ॥ ૫૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે ગણેશસ્તોત્રોત્તમવર્ણને એકવિંશતિતમોઽધ્યાયઃ ॥ ૧.૨૧

## ૧.૨૨ મુદ્ગલવરપ્રદાનં નામ દ્વાવિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
ગણેશવચનં શ્રુત્વા ભક્તિભાવસમન્વિતઃ ।
મુદ્ગલઃ પ્રણિપત્યૈનમૂચિવાન્ હર્ષપૂરિતઃ ॥ ૧॥

મુદ્ગલ ઉવાચ ।
કિં માં લોભયસે ઢુણ્ઢે વૃણોમિ ચ ન કિઞ્ચન ।
તવ વાક્યાનુરોધેન વૃણોમિ ત્વં દદાસિ ચેત્ ॥ ૨॥

તવ ભક્તિં દૃઢાં દેહિ સદાઽખણ્ડાત્મિકાં પ્રભો ।
સમ્પૂર્ણાં ભક્તિમિચ્છામિ ગાણેશીં યત્રકુત્ર ચ ॥ ૩॥

મુદ્ગલસ્ય વચઃ શ્રુત્વા વિસ્મિતો ગણરાટ્ સ્વયમ્ ।
અહો સમ્પૂર્ણભાવેન ભક્તિમેકાંવૃણોષિ યત્ ॥ ૪॥

ગણેશ ઉવાચ ।
મદીયા ત્વચલા ભક્તિઃ સમ્પૂર્ણા પ્રભવિષ્યતિ ।
ત્રૈલોક્યે તવ ભાગ્યેન સમં ભાગ્યં ન વિદ્યતે ॥ ૫॥

ભક્તિઃ સા નવધા વિપ્ર ચિત્તે તે રસદાયિકા ।
દશમં નાસ્તિ સંસ્થાનં ચિત્તસ્ય રસધારણે ॥ ૬॥

શ્રવણં કીર્તનં ચૈવ સ્મરણં પાદસેવનમ્ ।
અર્ચનં વન્દન દાસ્યં સખ્યં દેહનિવેદનમ્ ॥ ૭॥

નવચિહ્નં પ્રવક્ષ્યામિ ભક્તિમાહાત્મ્યમુત્તમમ્ ।
તેનૈવ પ્રાપ્યતે ભક્તિર્જનૈર્મે નાઽત્ર સંશયઃ ॥ ૮॥

શ્રવણં મદ્ગુણાનાં ચ મનનં તાદૃશં પુનઃ ।
(Page ખં. ૧ અ. ૨૨ પાન ૫૩)
તસ્યાનુકૂલં કર્તવ્યં જાયતેઽનુભવસ્તતઃ ॥ ૯॥

રસોત્પત્તિસ્ત્વનુભવે તત્ર સર્વા પ્રજાયતે ।
શ્રવણં મે તયા કાર્યં ગુણાનાં જન્તુના સદા ॥ ૧૦॥

પ્રિયં ભવતિ નાન્યચ્ચ મદેકરસભાવતઃ ।
તેનાન્યશ્રવણે પ્રીતિર્યદા નોત્પદ્યતે ક્વચિત્ ॥ ૧૧॥

તદા સમ્પૂર્ણતાં પ્રાપ્તા ભક્તિર્મે શ્રવણાત્મિકા ।
અહં વસામિ તત્કર્ણે સદા તદ્ભક્તિલાલસઃ ॥ ૧૨॥

મદ્ગુણાનાં સદા યસ્ય કીર્તનં રસદાયકમ્ ।
નાન્યકીર્તનભાવેષુ તસ્ય વૈ મનસો રસઃ ॥ ૧૩॥

તદા ભક્તિઃ સુસમ્પૂર્ણા મદીયા કીર્તનાત્મિકા ।
પ્રાપ્તા તેન સદા તસ્ય જિહ્વાગ્રે પ્રવસામ્યહમ્ ॥ ૧૪॥

મદીયકાર્યભાવસ્ય વિસ્મૃતિર્નૈવ જાયતે ।
સમયે સાવધાનો યો વ્રતપૂજાદિમાર્ગતઃ ॥ ૧૫॥

તેન સ્મરણરૂપા સા ભક્તિઃ પ્રાપ્તા મહામુને ।
સ્મૃત્યાં વસામિ તસ્યાઽહં ભક્તિભોગાર્થમેવ હિ ॥ ૧૬॥

મદીયપાદપદ્મં યત્સત્યમન્યદસત્યકમ્ ।
જ્ઞાત્વા દેહશ્રમે વૈ યો નાલસ્યેન પ્રવર્તતે ॥ ૧૭॥

મમ પાદાશ્રયઃ પૂર્ણઃ સદા યેન કૃતો મુને ।
અન્યત્રાઽલસ્યભાવેન મિથ્યાભૂતે સ્થિતેન ચ ॥ ૧૮॥

તસ્ય ભક્તિઃ સમુત્પન્ના પાદસેવનરૂપિકા ।
તસ્યાઽલસવિહીનેઽહં દેહે સ્થાસ્યામિ નિશ્ચલઃ ॥ ૧૯॥

સાઙ્ગોપાઙ્ગં પ્રકર્તવ્યં મદીયં કર્મ ભાવતઃ ।
અન્યચ્ચ યાદૃશં જાતં તાદૃશં કિલ તદ્ભવેત્ ॥ ૨૦॥

અર્ચનાત્મકભક્તિઃ સા સદા પ્રાપ્તા નરેણ વૈ ।
સાઙ્ગોપાઙ્ગતયા તત્ર વસેયં ભક્તિભાવિતઃ ॥ ૨૧॥

ન મત્સમં ભવેજ્જાતુ વેદાદિષુ વિચારતઃ ।
મયિ શ્રેષ્ઠત્વમાપન્નં શ્રેષ્ઠં મન્નમનં ભવેત્ ॥ ૨૨॥

યદા વૈ મત્સમં નાસ્તિ ચિત્તે યસ્ય પ્રતિષ્ઠિતમ્ ।
તદા વદનજા ભક્તિઃ પ્રાપ્તા તેન ન સંશયઃ ॥ ૨૩॥

તસ્ય શ્રેષ્ઠત્વભાવેઽહં સદા તિષ્ઠામિ સર્વતઃ ।
ભક્તિભોક્તા સ્વયં ભૂત્વાઽન્યત્ર શ્રેષ્ઠત્વનાશકઃ ॥ ૨૪॥

ગણેશોપાસનામાર્ગો યથા શાસ્ત્રેષુ દૃશ્યતે ।
તં દૃષ્ટ્વા તાદૃશં ભૂત્વા ગાણપત્યોઽભિમાનતઃ ॥ ૨૫॥

માં ભજેત્ યઃ સ્વભાવેન ગાણેશાઽહઙ્કૃતેર્ધરઃ ।
તેન દાસ્યં સમાપન્નં ભક્તિભાવેન ભાવિતમ્ ॥ ૨૬॥

ગાણપત્યસ્વભાવેઽહં તં સ્થાસ્યામિ સ્વભાવતઃ ।
દાસ્યભક્તિવિભોગાર્થમેકનિષ્ઠાપ્રકાશકઃ ॥ ૨૭॥

મિત્રસ્ય સન્નિધાને તુ યથા ગોપ્યં ન વિદ્યતે ।
બાહ્યાન્તરં ચ મિત્રસ્ય મિત્રં જાનાતિ સર્વતઃ ॥ ૨૮॥

તથા બાહ્યાન્તરૈર્હીનો દમ્ભહીનઃ સ્વભાવતઃ ।
ભજતે માં નરો યસ્તુ સખ્યં પ્રાપ્તં મદીયકમ્ ॥ ૨૯॥

યત્ર કુત્ર સ્થિતેનૈવ યદ્યન્ મનમિ સન્ધૃતમ્ ।
ગણેશ્વરણ તજ્જ્ઞાતં સર્વાન્તર્યામિનાઽખિલમ્ ॥ ૩૦॥

એતાદૃશવિચારેણ ભયયુક્તેન ચેતસા ।
સર્વભાવેન માં યસ્તુ ભજતેઽનન્યચેતસા ॥ ૩૧॥

તસ્ય સખ્યે સદાઽહં વૈ તિષ્ઠેયં ભક્તિલોલુપઃ ।
બાહ્યાન્તરૈકભાવેષુ મોહિતસ્તસ્ય ચેષ્ટયા ॥ ૩૨॥

પઞ્ચધા ચિત્તભૂમિર્યા તાં ત્યક્ત્વાઽહં તયા વિના ।
ગણેશોઽહં ન સન્દેહો યેનાત્મેતિ નિવેદિતઃ ॥ ૩૩॥

અહમ્ભાવવિહીનેઽહં ભક્તિભાવેન સંસ્થિતઃ ।
નૈવ ભિન્નો ભવિષ્યામિ તસ્માજ્જાનીહિ ભો મુને ॥ ૩૪॥

(Page  ખં. ૧ અ. ૨૨ પાન ૫૪)
ઇત્યેવં નવધા ભક્તિં રસયુક્તાં કરોતિ યઃ ।
સહતે ક્ષણમાત્રં ન ચિત્તં મદ્રસહીનકમ્ ॥ ૩૫॥

તદા સમ્પૂર્ણભક્તો મે જાતો વૈ નાત્ર સંશયઃ ।
અહં મોહેન સંયુક્તસ્તત્ર તિષ્ઠામિ સર્વદા ॥ ૩૬॥

ન ક્ષણં તં પરિત્યક્તું શક્તોઽહં ભક્તિયન્ત્રિતઃ ।
નવધા ચિત્તભાવેન તં રક્ષિષ્યામિ સર્વદા ॥ ૩૭॥

ન ચ ભક્તિસમો ભાવો મમ પ્રીતિકરઃ કદા ।
તેન બદ્ધો ભવિષ્યામિ હૃદયે તસ્ય ધીમતઃ ॥ ૩૮॥

નવધા માં ભજન્તે યે નરા નાનાવિધાઃ સદા ।
તેષાં યત્રાધિકત્વં ચ ભક્તાવેકસ્વભાવતઃ ॥ ૩૯॥

અધિકા ચ રસોત્પત્તિર્યત્ર ભક્તૌ સમાગતા ।
તસ્યાં મુખ્યત્વમાપન્નં નવધા ભવને સતિ ॥ ૪૦॥

તત્ર મુખ્યસ્વભાવેન ભક્તરાજાશ્ચ યે સ્થિતાઃ ।
તાન્ વદામિ મહાભાગ શ ृણુ તત્ત્વમિદં મહત્ ॥ ૪૧॥

શ્રવણે મદ્ગુણાનાં યદાધિક્યં ખલુ વિદ્યતે ।
તત્ર વૈ કાર્તિકેયશ્ચ ભક્તરાજઃ પ્રકીર્તિતઃ ॥ ૪૨॥

કીર્તને ભક્તરાજસ્તુ સૂર્ય આત્મા શરીરિણામ્ ।
સ્મરણે રામચન્દ્રો વૈ ભક્તરાજઃ સ્મૃતો બુધૈઃ ॥ ૪૩॥

પાર્વતી પાદસેવાયાં ભક્તાધીશા ચ સંસ્મૃતા ।
મહાવિષ્ણુઃ સ્વયં રાજા ભજતામર્ચને મમ ॥ ૪૪॥

વન્દને ભક્તરાજેન્દ્રઃ શઙ્કરઃ સર્વભાવતઃ ।
દાસ્યં ભક્તાધિપઃ પ્રોક્તો રામો વૈ જમદગ્નિજઃ ॥ ૪૫॥

સખ્યે ચતુર્મુખઃ સાક્ષાદ્ભક્તાનામધિપઃ સ્મૃતઃ ।
વૈયાસકિઃ શુકો ભૂપો મયિ ત્વાત્મનિવેદિનામ્ ॥ ૪૬॥

એતે ભક્તાધિપાઃ પ્રોક્તા અન્તરાયવિહીનકાઃ ।
માં ભજન્તે મહાભાગા બ્રહ્મભૂતાસ્તતોઽપ્યહો ॥ ૪૭॥

ત્વં તેષાં ચ સદા રાજા કૃતો મે નાત્ર સંશયઃ ।
પૂર્ણભક્તિસ્વભાવેન માં ભજિષ્યસિ યત્નતઃ ॥ ૪૮॥

નવધા ભક્તિભાવેષુ તવાધિક્યં ભવિષ્યતિ ।
પૂર્ણભક્તો મદીયસ્ત્વં ભક્તેશેશઃ કૃતો મયા ॥ ૪૯॥

મદ્ભક્તો ત્વત્સમો નૈવાભવન્ન પ્રભવિષ્યતિ ।
વર્તતે ન કદા વિપ્ર ત્વદધીનોઽહમઞ્જસા ॥ ૫૦॥

તવાઙ્ગવાયુના સ્પૃષ્ટાઃ પૂતા વૈ દર્શનાદિભિઃ ।
ભવિષ્યતિ ન સન્દેહો બ્રહ્મબુદ્ધિયુતાસ્તથા ॥ ૫૧॥

સૂત ઉવાચ ।
એવમુક્ત્વાન્તર્દધેઽસૌ ગણેશો બ્રહ્મનાયકઃ ।
તદાદિ સ મુનિઃ પ્રોક્તઃ સર્વેષાં વન્દ્યતાં ગતઃ ॥ ૫૨॥

મુદ્ગલસ્ય ચરિત્રં યઃ શ‍ૃણુયાદ્વા પઠેન્નરઃ ।
શ્રાવયેદ્ભાવયુક્તેભ્યઃ સ વૈ સર્વાર્થસિદ્ધિભાક્ ॥ ૫૩॥

ઇહ ભુક્ત્વાઽખિલાન્ ભોગાનન્તે બ્રહ્મમયો ભવેત્ ।
ભક્તરાજેન્દ્રતા તસ્ય વિઘ્નેશસ્ય ભવિષ્યતિ ॥ ૫૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે મુદ્ગલવરપ્રદાનં નામ દ્વાવિંશોઽધ્યાયઃ ॥ ૧.૨૨
(Page ખં. ૧ અ. ૨૩ પાન ૫૫)

# ૧.૨૩ મત્સરાસુરતપોવર્ણનં નામ ત્રયોવિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
ધન્યોઽસિ યોગિરાજોઽસિ ભક્તરાજેન્દ્રતા ચ તે ।
મદીયં ભાગ્યયોગેન સમ્પ્રાપ્તં દર્શનં પ્રભો ॥ ૧॥

અષ્ટૌ યે ગણરાજસ્ય હ્યવતારાઃ પ્રકીર્તિતાઃ ।
તાન્ મે કથય યોગીશ વિસ્તરેણ મહામુને ॥ ૨॥

દૈત્યાઃ સન્નિહિતાસ્તૈસ્તુ તેષાં જન્માદિકં પરમ્ ।
સકલં યુદ્ધભાગં માં કથયસ્વ વિશેષતઃ ॥ ૩॥

એતાદૃશા મહાદૈત્યા ન શ્રુતાઃ કુત્રચિત્પ્રભો ।
વિસ્માપયતિ ચેયં માં કથા પાપાપનોદિની ॥ ૪॥

મુદ્ગલ ઉવાચ ।
પ્રજાપતે કથાં દિવ્યાં તવ ભાવનિયન્ત્રિતઃ ।
કથયામિ સમાસેન ગણનાથપ્રમોદિનીમ્ ॥ ૫॥

પ્રથમં વક્રતુણ્ડસ્ય ચરિત્રં શ‍ૃણુ પુણ્યદમ્ ।
મત્સરાસુરયુદ્ધં ચ ગણેશેન મહાદ્ભુતમ્ ॥ ૬॥

ઇન્દ્રસ્યેન્દ્રપદપ્રાપ્તિર્જાતા યસ્મિન્ દિને પરા ।
તસ્મિન્ દિને મહોત્સાહો વાર્ષિકઃ ક્રિયતે મુને ॥ ૭॥

કદાચિદમરાવત્યાં મહોત્સવપરાયણઃ ।
સુભદ્રાસનગોતિષ્ઠદ્દેવેન્દ્રઃ સર્વપૂજિતઃ ॥ ૮॥

તાવદ્દેવાઃ સગન્ધર્વા અપ્સરાભિઃ સમાગતાઃ ।
નાગા યક્ષા મુનીન્દ્રાશ્ચ રાક્ષસા દેવયોષિતઃ ॥ ૯॥

આગતો ભગવાંસ્તત્ર સર્વભૂતગણૈર્વૃતઃ ।
સ્કન્દનન્દીશ્વરાદ્યૈશ્ચ પાર્વત્યા સહ શઙ્કરઃ ॥ ૧૦॥

લક્ષ્મ્યા સહ સ્વયં વિષ્ણુર્વિષ્વક્સેનાદિભિર્ગણૈઃ ।
વેદાદિભિર્વૃતો બ્રહ્મા પ્રજાપતિભિરાયયૌ ॥ ૧૧॥

સર્વગ્રહૈઃ સમાયુક્તો ભાનુસ્તત્રાગમત્ સ્વયમ્ ।

અગ્નિશ્ચ ધર્મરાજશ્ચ કુબેરો વરુણસ્તથા ॥ ૧૨॥

આદિત્યા મનવશ્ચૈવ વસવો રુદ્રકાસ્તથા ।
સાધ્યા વિદ્યાધરા વિશ્વેદેવાસ્તત્રાયયુઃ પ્રભો ॥ ૧૩॥

અશ્વિનૌ શેષનાગશ્ચ બહવસ્તત્ર ચાગતાઃ ।
ઉપવિષ્ટા મુદા યુક્તા ઉત્સવે વૈ શતક્રતોઃ ॥ ૧૪॥

તત્ર નાના કથાશ્ચક્રુરાનન્દપરિવર્ધિનીઃ ।
મુનયો ભાવસંયુક્તાઃ પુરાતનભવા મુને ॥ ૧૫॥

નૃત્યમપ્સરસશ્ચક્રુર્ગન્ધર્વા લલિતં જગુઃ ।
હાહાહૂહૂમુખા અન્યે તુમ્બરુનારદસ્તથા ॥ ૧૬॥

વાદયન્તિ સ્મ વાદિત્રં તાન્ સ્તુવન્તિ સ્મ ચારણાઃ ।
હૃષ્ટા પુષ્ટા જનાસ્તત્ર સ્ત્રિયઃ પરમહર્ષિતાઃ ॥ ૧૭॥

તત્ર રમ્ભા વિચિત્રાણિ નૃત્યાદીનિ ચકાર હ ।
હાવભાવપ્રયુક્તાનિ ચેષ્ટિતાનિ પ્રજાપતે ॥ ૧૮॥

કન્દુકક્રીડનોદ્યુક્તા સભાયાં યત્ર તત્ર સા ।
બભ્રામ તાં પ્રપશ્યન્ સન્નિન્દ્રોઽભૂત્ કામપીડિતઃ ॥ ૧૯॥

મોહિતો મઞ્જુલરવૈર્નૃત્યાદિકલયા તથા ।
કર્તવ્યં નૈવ સઞ્જજ્ઞૌ તન્મનાઃ સ સુરેશ્વરઃ ॥ ૨૦॥

શીઘ્રમેવ સમાપ્તં તમુત્સવં કૃતવાન્ સ્વયમ્ ।
સર્વે સ્વસ્વસ્થલં જગ્મુર્માનિતા હર્ષિતા વિભો ॥ ૨૧॥

રમ્ભાં નિમન્ત્ર્ય ચેન્દ્રશ્ચ જગામ વનમેકલઃ ।
નાનાપરિમલૈર્યુક્તા યત્ર વૃક્ષાઃ સુપુષ્પિતાઃ ॥ ૨૨॥

નાનાપ્રસ્રવયુક્તાનિ નિર્મલાનિ જલાનિ ચ ।
સુવર્ણપદ્મશોભાનિ ષટ્પદૈઃ શોભિતાનિ ચ ॥ ૨૩॥

ઇત્યાદિકામપુષ્ટાનિ નાનાવસ્તુયુતાનિ ચ ।
વનાનિ તત્ર રેમે સાવિન્દ્રઃ કામવિમોહિતઃ ॥ ૨૪॥

રમ્ભયાસક્તચિત્તસ્ય વજ્રિણઃ ક્રીડતો ભૃશમ્ ।
ન તૃપ્તિરભવત્તત્ર ઘૃતેન દહનસ્ય વા ॥ ૨૫॥

તત્રાજગામ દુર્વાસાઃ સ્વેચ્છયા વિચરન્ મુનિઃ ।
તં દૃષ્ટ્વા લજ્જિતો રાજા દેવાનાં વિનયં શ્રિતઃ ॥ ૨૬॥

(Page ખં. ૧ અ. ૨૩ પાન ૫૬)
ત્યક્ત્વા રમ્ભાં નમસ્કૃત્ય તં મુનિં પ્રાઞ્જલિઃ સ્થિતઃ ।
તાદૃશં તં પરિત્યજ્ય જગામ મુનિસત્તમઃ ॥ ૨૭॥

અતિવિહ્વલગાત્રત્વાચ્ચસ્કન્દ સુરશત્રુહા ।
રેતોઽભૂત્ પતિતં ભૂમૌ તસ્માદ્દૈત્યસમુદ્ભવઃ ॥ ૨૮॥

ઇન્દ્રોઽપિ સ્વગૃહં ગત્વા રમ્ભાં ત્યક્ત્વા ચકાર હ ।
સુરાણામખિલં રાજ્યમાત્માનં નિન્દયન્મુહુઃ ॥ ૨૯॥

અહો ધિક્ બત રાજ્યં મે સુરાણાં સ્ત્રીજિતસ્ય ચ ।
અસુરાણામિવાત્યન્તં મનો મે ચઞ્ચલં ભૃશમ્ ॥ ૩૦॥

પુંશ્ચલ્યા મોહિતં નિત્યં ધિઙ્ માં સાધ્વભિનિન્દિતમ્ ।
કુકુર્મકૃત્યદોષાચ્ચ ભયમગ્રે ભવિષ્યતિ ॥ ૩૧॥

ઇત્યેવમાત્મનાત્માનં નિન્દયામાસ દેવપઃ ।
સ્વધર્મે સંસ્થિતો દક્ષ વૃત્રહા પુનરેવ ચ ॥ ૩૨॥

ઇન્દ્રવીર્યાચ્ચ કાલેન ભૂમ્યાં જાતો મહાસુરઃ ।
તં પૃથ્વી પાલયામાસ સ્તનપાનાદિના ભૃશમ્ ॥ ૩૩॥

સ તુ સંવવૃધે તત્ર હિમાચલ ઇવાપરઃ ।
આજાનુબાહુર્દીર્ઘાક્ષો મહાવક્ષા મહાબલઃ ॥ ૩૪॥

રક્તવર્ણઃ ક્રૂરકર્મા યથાગ્નિર્જ્વલિતો બભૌ ।
નામ તસ્યાઽકરોદ્ભૂમિર્મત્સરેતિ સ્વભાવતઃ ॥ ૩૫॥

પઞ્ચવર્ષવયોગસ્ય ચોપવીતપ્રદાનકમ્ ।
બ્રાહ્મણૈઃ કારયામાસ ધરિત્રી સ્નેહભાવતઃ ॥ ૩૬॥

સ તુ વેદાદિકં સર્વં શિક્ષિતું ગુરુસન્નિધૌ ।
સ્થિત આર્જવસંયુક્તો ગ્રાહકઃ શ્રવણેન વૈ ॥ ૩૭॥

મહાબુદ્ધિઃ સ કાલેનાલ્પેન વેદાદિપારગઃ ।
દુર્બુદ્ધેઃ કન્યકાં રમ્યાં તામુવાહ વિલાસિનીમ્ ॥ ૩૮॥

નામ્ના મદકરાખ્યાતા સર્વાવયવશોભિની ।

ચતુરા સર્વકાર્યેષુ વિષયસ્ય વિવર્ધિની ॥ ૩૯॥

એકસ્મિન્ દિવસે તસ્ય મતિર્જાતા દુરાત્મનઃ ।
વિપુલં સુતપસ્તપ્ત્વા જેયં બ્રહ્માણ્ડમોજસા ॥ ૪૦॥

સ શુક્રમુપસઙ્ગમ્ય વિદ્યાં પઞ્ચાક્ષરીમગાત્ ।
તપસા ચ તયા શમ્ભું તોષયામાસ ભક્તિતઃ ॥ ૪૧॥

નિર્જને વન એકાન્તે પુષ્પપલ્લવશોભિતે ।
કન્દમૂલફલોપેતે સુજલે સંસ્થિતોઽતપત્ ॥ ૪૨॥

દિવ્યવર્ષસહસ્રં સ નિરાહારતયા સ્થિતઃ ।
જપન્ પઞ્ચાક્ષરં મન્ત્રં ધ્યાત્વા હૃદિ સદાશિવમ્ ॥ ૪૩॥

દીક્ષાં પાશુપતીં ધૃત્વા તોષયામાસ શઙ્કરમ્ ।
તસ્ય પ્રતપસા દેવાઃ ક્ષુભિતાશ્ચ સમન્તતઃ ॥ ૪૪॥

ન પ્રકાશો રવેરાસીન્નાગ્નિજ્વાલ ભાસ્વરઃ ।
ભૂતાન્યાકુલતાં તત્ર પ્રાપ્તાનિ તપસો બલાત્ ॥ ૪૫॥

દેવાઃ સર્ષિગણાઃ સર્વે શઙ્કરં શરણં યયુઃ ।
મત્સરસ્ય તપસ્તસ્માન્ રક્ષ નો જગદીશ્વર ॥ ૪૬॥

શઙ્કરસ્તૈઃ સમાયુક્તઃ પાર્વત્યા સ્વગણૈઃ સહ ।
તં દેશમગમદ્ હૃષ્ટો ભક્તં જ્ઞાતું મહાદ્ભુતમ્ ॥ ૪૭॥

અસ્થિત્વચાસમાયુક્તં શ્વાસમાત્રાવશેષિતમ્ ।
હીનાઙ્ગમાવૃતં તત્ર વલ્મીકેન સમન્તતઃ ॥ ૪૮॥

મહોગ્રતપસા યુક્તં દેવાઃ સર્વે વિસિસ્મિરે ।
ઋષયોઽપિ મહાભાગા દૃષ્ટ્વા તં તાપસં પરમ્ ॥ ૪૯॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે મત્સરાસુરતપોવર્ણનં નામ ત્રયોવિંશતિતમોઽધ્યાયઃ ॥ ૧.૨૩
(Page ખં. ૧ અ. ૨૪ પાન ૫૭)

## ૧.૨૪ મત્સરાસુરસમાગમો નામ ચતુર્વિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।

મત્સરાસુરમુગ્રં તં તાપસં શામ્ભવં પ્રભો ।
બોધયામાસ તં શમ્ભુર્દાનવેન્દ્રં મહાબલમ્ ॥ ૧॥

શઙ્કર ઉવાચ ।
ભો ભો મત્સર ચોત્તિષ્ઠ વરાન્ વરય સુવ્રત ।
તવોગ્રતપસા ભક્ત્યા સન્તુષ્ટોઽહં દદામિ તાન્ ॥ ૨॥

અહો ધૈર્યમહો ધૈર્યં ધન્યં તે તાપસોત્તમ ।
દેહભાવમતિક્રમ્ય સ્થિતોઽસિ દૃઢભક્તિતઃ ॥ ૩॥

ક્લેશં ત્યજ તપો જાતં સિદ્ધિં પ્રાપ્તાં તપોભુવમ્ ।
પશ્યેચ્છસિ તથા યં યં તં તં દાસ્યામિ દુર્લભમ્ ॥ ૪॥

શિવસ્ય વચનં શ્રુત્વા પ્રબુદ્ધો મત્સરાસુરઃ ।
ઉન્મીલ્ય લોચનેઽપશ્યચ્છઙ્કરં પુરતઃ સ્થિતમ્ ॥ ૫॥

શિવદર્શનમાત્રેણ સત્તાવાનભવત્કિલ ।
ઉત્થાય તં નમસ્કૃત્ય વિનમ્રઃ પ્રેમવિહ્વલઃ ॥ ૬॥

ઉવાચ તં મહાબુદ્ધિઃ શિવં કલ્યાણકારકમ્ ।
ભક્તાનાં કલ્પવૃક્ષં ચ પાર્વતીસહિતં પ્રભુમ્ ॥ ૭॥

મત્સરાસુર ઉવાચ ।
ધન્યો વંશો મદીયોઽદ્ય જન્મ સમ્પત્તિશાસ્ત્રજમ્ ।
જ્ઞાનં મે જનકો માતા તપો ધન્યં મહત્પ્રભો ॥ ૮॥

મુનયો યં ન જાનન્તિ યોગિનો ધ્યાનશાલિનઃ ।
વેદાઃ સ્મૃતિસમાયુક્તાસ્તં પશ્યામિ સદાશિવમ્ ॥ ૯॥

એવમુક્ત્વા નમસ્કૃત્ય પૂજયામાસ હર્ષતઃ ।
ઋષિદેવયુતં શમ્ભુ ભક્તિભાવસમન્વિતઃ ॥ ૧૦॥

યથાવિધિ સ સમ્પૂજ્ય શઙ્કરં દણ્ડવત્ ક્ષિતૌ ।
પ્રણિપત્ય સમુત્થાય પ્રાઞ્જલિઃ સ્તોત્રમાકરોત્ ॥ ૧૧॥

મત્સરાસુર ઉવાચ ।
નમસ્તે ત્રિદશેશાય શઙ્કરાય શિવાય ચ ।
નિર્ગુણાય ગુણાનાં ચેશાય સર્વગુણાય તે ॥ ૧૨॥

અપારાય મહાદેવ પિનાકધર તે નમઃ ।

નમો નમો મહેશાય સર્વાધિપતયે નમઃ ॥ ૧૩॥

ઉમાકાન્ત નમસ્તુભ્યં ભક્તસંરક્ષકાય ચ ।
ભક્તિપ્રિયાય દેવાય સર્પહારાય તે નમઃ ॥ ૧૪॥

વૃષધ્વજાય નન્દીશવાહનાય ત્રિશૂલિને ।
ભસ્માઙ્ગરાગધારાય વ્યાઘ્રામ્બરધરાય તે ॥ ૧૫॥

ભાલચન્દ્ર નમસ્તુભ્યં પઞ્ચવક્ત્રાય શમ્ભવે ।
દશબાહુધરાયૈવ ત્રિનેત્રાય કપાલિને ॥ ૧૬॥

જટાજૂટધરાયૈવ નમો ગઙ્ગાધરાય તે ।
ગિરિશાય નમસ્તુભ્યં ગજચર્મધરાય તે ॥ ૧૭॥

સદા બ્રહ્મમયાયૈવ નમો બ્રહ્મપ્રદાયિને ।
નિરાધારાય નિત્યાય સુયોગિપતયે નમઃ ॥ ૧૮॥

અપારગુણધારાય રુદ્રાય તુ નમો નમઃ ।
કિં સ્તૌમિ ત્વાં મહાદેવ યત્ર વેદા વિકુણ્ઠિતાઃ ॥ ૧૯॥

ઇતિ સ્તુત્વા મહેશાનં મત્સરઃ પ્રણનામ તમ્ ।
ઉત્થિતં તં શિવઃ પ્રાહ વરં વરય સુવ્રત ॥ ૨૦॥

ઇદં ત્વયા કૃતં સ્તોત્રં મમ પ્રીતિવિવર્ધનમ્ ।
પઠતે શ ૃણ્વતે સર્વકામદં પ્રભવિષ્યતિ ॥ ૨૧॥

વિદ્યામાયુઃ સુખં રાજ્યં પુત્રપૌત્રાદિકં ચ યત્ ।
ભુક્તિં મુક્તિં પ્રદાસ્યામિ સ્તોત્રેણ સ્તુવતેઽસુર ॥ ૨૨॥

શ્રુત્વા શિવવચો રમ્યં પ્રહૃષ્ટો મત્સરોઽબ્રવીત્ ।
વિનયાવનતો ભૂત્વા શિવં ભક્તવરપ્રદમ્ ॥ ૨૩॥

મત્સર ઉવાચ ।
યદિ દેવેશ તુષ્ટોઽસિ યદિ દાસ્યસિ મે વરાન્ ।
તદાઽભયં તે સર્વત્ર ભક્તિં દેહિ સદાશિવ ॥ ૨૪॥

પઞ્ચભૂતાત્મકં સર્વં ત્રિગુણૈઃ સુવિરાજિતમ્ ।
તસ્માન્મે મરણં શમ્ભો ન કદાચિદ્ભવેદિહ ॥ ૨૫॥

(Page ખં. ૧ અ. ૨૪ પાન ૫૮)
આરોગ્યાદિસમાયુક્તમૈશ્વર્યં દેહિ શાશ્વતમ્ ।

બ્રહ્માણ્ડસ્ય ચ રાજ્યં મે દેહિ દેહિ સદાશિવ ॥ ૨૬॥

મુદ્ગલ ઉવાચ ।
તસ્યૈતદ્વચન શ્રુત્વા શિવો વિસ્મિતમાનસઃ ।
દેવાઃ સર્ષિગણાઃ સર્વે વિસ્મિતાઃ પ્રાભવન્ તદા ॥ ૨૭॥

કિમુક્તં મત્સરેણૈવં કા ગતિર્વા ભવિષ્યતિ ।
તપસોગ્રેણ સન્તુષ્ટઃ શિવસ્તં પ્રત્યુવાચ હ ॥ ૨૮॥

શિવ ઉવાચ ।
યત્ત્વયા પ્રાર્થિતં દૈત્ય તત્સર્વં તે ભવિષ્યતિ ।
ઉગ્રેણ તપસા તુભ્યં મયા દત્તં સુદુર્લભમ્ ॥ ૨૯॥

મુદ્ગલ ઉવાચ ।
વરાન્ સુદુર્લભાન્ પ્રાપ્ય મત્સરો ગૃહમાગમત્ ।
હર્ષિતો હર્ષયન્ સર્વાન્ સુહૃદો માતરં સ્ત્રિયમ્ ॥ ૩૦॥

આહ્લાદેન સદા તત્ર સ્થિતો માન્યૈઃ સ માનિતઃ ।
નાનાભોગાન્ પ્રભુઞ્જાનઃ સુહૃદ્ભ્યઃ સુખદાયકઃ ॥ ૩૧॥

પુત્રૌ મદકરાયાં દ્વૌ જનયામાસ મત્સરઃ ।
અતિકાન્તિયુતૌ તુલ્યૌ પિત્રા વીર્યેણ તેજસા ॥ ૩૨॥

સુન્દરપ્રિય ઇત્યેવં નામ જ્યેષ્ઠસ્ય સોઽકરોત્ ।
વિષયપ્રિયનામાભૂત્કનિષ્ઠઃ પ્રીતિદઃ પરઃ ॥ ૩૩॥

એકસ્મિન્ દિવસે દૈત્યઃ શ્વશુરસ્ય ગૃહં ગતઃ ।
તત્ર નાનાવિધા દૈત્યા મિલિતાસ્તમબોધયન્ ॥ ૩૪॥

દૈત્યા ઊચુઃ ।
કિં સ્થિતોઽસિ મહાતેજસ્ત્વદ્દાસ્યવશગા વયમ્ ।
જેષ્યામઃ સર્વદેવાદીંસ્ત્વત્સાહાય્યેન મત્સર ॥ ૩૫॥

ત્વત્સમો નૈવ વીરોઽસ્તિ બ્રહ્માણ્ડે કુત્રચિત્પ્રભો ।
વરદાન બલાઢ્યસ્ત્વં નિર્ભયોઽસિ મહાસુર ॥ ૩૬॥

આજ્ઞાં દહિ ગમિષ્યામો જેતું દેવાન્ન સંશયઃ ।
શસ્ત્રાસ્ત્રૈસ્તાન્વિનિર્ભિદ્ય ભવામ સ્વર્ગભોગિનઃ ॥ ૩૭॥

મુદ્ગલ ઉવાચ ।

દૈત્યાનાં વચનં શ્રુત્વા મત્સરસ્તાનુવાચ હ ।
ભવદ્ભિઃ કથિતં સર્વં હિતકારકમુત્તમમ્ ॥ ૩૮॥

મમાપિ હૃદયે નિત્યમેવં વસતિ દાનવાઃ ।
કિં કરોમિ ચ મે માતા નિવારયતિ માં સદા ॥ ૩૯॥

ઇન્દ્રસ્તે સ પિતા પુત્ર દેવાઃ પૂજ્યાઃ સવાસવાઃ ।
અતો ધર્મેણ વર્તસ્વ યેનેહપરલોકભાક્ ॥ ૪૦॥

મત્સરસ્ય વચઃ શ્રુત્વા દૈત્યાસ્તે ત્વબ્રુવન્ વચઃ ।
અખિલં ધર્મકરણં બાધાદં ભાવપૂર્વકમ્ ॥ ૪૧॥

દૈત્યા ઊચુઃ ।
શ ૃણુ મત્સર વૃત્તાન્તં પુરાભૂતં સ્વધર્મજમ્ ।
અસ્માકમેવ માન્યં યત્તવ સંશયનાશકમ્ ॥ ૪૨॥

જલન્ધરઃ સમુત્પન્નઃ શિવવીર્યાન્મહાબલઃ ।
તેન શમ્ભુર્જિતઃ સઙ્ખ્યે દેવાઃ સર્વે ચ નિર્જિતાઃ ॥ ૪૩॥

પાર્વતીં દારભાવાર્થં ગ્રહીતું તૂદ્યતોઽભવત્ ।
દૈત્યા એતાદૃશા જાતા બહવો મત્સરાસુર ॥ ૪૪॥

યત્ર માન્યાઃ સન્તિ દેવાસ્તત્ર દૈત્યાઃ પ્રદૂષિતાઃ ।
દૈત્યા માન્યાસ્તદા દેવા દૂષિતાઃ પ્રભવન્તિ વૈ ॥ ૪૫॥

દેવેન્દ્રાઃ શત્રવઃ સન્તિ દૈત્યાનાં સતતં પ્રભો ।
અતસ્ત્યક્ત્વા સ્વસન્દેહં જય દેવાન્ મહાબલ ॥ ૪૬॥

ત્યજ તાં માતરં પૃથ્વીં મુનિદેવસહાયિનીમ્ ।
વસાત્ર ત્વં મહાભાગ અસ્માભિઃ સહિતઃ સદા ॥ ૪૭॥

તેષાં વચનમાકર્ણ્ય મત્સરોઽહિતકારકમ્ ।
તથૈવ કૃતવાંસ્તત્ર ત્યક્ત્વા પૃથ્વીમુવાસ હ ॥ ૪૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે મત્સરાસુરસમાગમો નામ ચતુર્વિંશતિતમોઽધ્યાયઃ ॥ ૧.૨૪
(Page ખં. ૧ અ. ૨૫ પાન ૫૯)

## ૧.૨૫ મત્સરાસુરસેનાવર્ણનં નામ પઞ્ચવિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
શ઼ૃણુ દક્ષ મહાભાગ કથાં પાપપ્રણાશિનીમ્ ।
વક્રતુણ્ડાવતારસ્ય પ્રયોજનવિકાશિનીમ્ ॥ ૧॥

દૈત્યાઃ સમ્ભૂય સર્વે તે ગતાઃ શુક્રં મહામુનિમ્ ।
દણ્ડવત્તં પ્રણેમુશ્ચ મત્સરેણ સમન્વિતાઃ ॥ ૨॥

શુક્રસ્તાન્ માનંયામાસ કિમર્થં યૂયમાગતાઃ ।
ભવતા કાર્યસિદ્ધિર્યા તાં કરિષ્યામિ યત્નતઃ ॥ ૩॥

શુક્રસ્ય વચનં શ્રુત્વા સુધારસસમં મુને ।
હર્ષિતાઃ પ્રણિપત્યૈનમૂચુઃ સર્વે હિતાવહમ્ ॥ ૪॥

તવ સ્વામિન્ પ્રસાદેન મત્સરઃ કુલધારકઃ ।
અસ્માકં સર્વભાગસ્ય ફલરૂપસ્તથા કૃતઃ ॥ ૫॥

વરાન્ પ્રાપ્ય મહાબાહુરસ્માકં હિતમાશ્રિતઃ ।
દૈત્યાનાં દાનવાદીનાં રાજાઽયમિતિ નિશ્ચિતમ્ ॥ ૬॥

તસ્ય રાજ્યાભિષેકાર્થં યાહિ ત્વં સર્વમાનદ ।
અસ્માકં ધામસર્વસ્વં ત્વમેવ મુનિસત્તમ ॥ ૭॥

દૈત્યાનાં વચનં શ્રુત્વા શુક્રોઽવાદીત્ તથેતિ ચ ।
અગમત્ રાજ્યલાભાર્થં મત્સરસ્ય દુરાત્મનઃ ॥ ૮॥

મિલિતાસ્તત્ર સર્વે તે દૈત્યદાનવરાક્ષસાઃ ।
હર્ષેણ મહતા યુક્તા મહોત્સવપરાયણાઃ ॥ ૯॥

તેષાં મુખ્યાન્ મહાભાગાંસ્તાન્ છૃણુષ્વ પ્રજાપતે ।
સઙ્ક્ષેપેણ પ્રવક્ષ્યામિ પ્રાધાન્યેન મહત્તમાન્ ॥ ૧૦॥

નમુચિઃ શમ્બરઃ શુમ્ભો નિશુમ્ભઃ કાલભૈરવઃ ।
વિરોચનો વિપ્રચિત્તિઃ પ્રહ્રાદો મહિષાસુરઃ ॥ ૧૧॥

અન્ધકાસુરનામા ચ રુરુદૈત્યઃ પ્રતાપવાન્ ।
ઇત્યાદ્યા બહવો દૈત્યા મિલિતાસ્તસ્ય ચોત્સવે ॥ ૧૨॥

યથાવિધિ તથા તત્ર બ્રાહ્મણૈર્વેદપારગૈઃ ।
ઋગ્યજુઃસામમન્ત્રૈશ્ચાભિષિક્તો મત્સરોઽભવત્ ॥ ૧૩॥

ઉશનાઃ સર્વકર્તાભૂત્તેષાં મધ્યે પ્રતાપવાન્ ।
સાક્ષાદ્યોગી ગણેશસ્ય મહાભક્તો મહામુનિઃ ॥ ૧૪॥

દૈત્યાદીનાં સ રાજાભૂન્ મત્સરઃ પરવીરહા ।
શુશુભેઽતીવ તેજસ્વી મધ્યાહ્નાર્ક ઇવ શ્રિયા ॥ ૧૫॥

સર્વે સ્વસ્વગૃહં જગ્મુઃ સનાથાશ્ચ વયં કૃતાઃ ।
શુક્રેણેતિ વદન્તસ્તે હર્ષયુક્તા પ્રજાપતે ॥ ૧૬॥

ગતે કિયતિ કાલે ચ મત્સરઃ સ મનો દધે ।
બ્રહ્માણ્ડજયને દુષ્ટો જુહાવ સકલાસુરાન્ ॥ ૧૭॥

આગતાસ્તે ત્વરાભાજઃ કિં કાર્યં વદ માનદ ।
તાનુવાચ જયાકાઙ્ક્ષી ત્રૈલોક્યં વશમાનયે ॥ ૧૮॥

તસ્ય તદ્ વચનં શ્રુત્વા હૃષ્ટાઃ સર્વે મહાઽસુરાઃ ।
નદન્તો મેઘસન્નાદૈઃ કાલાનાં કલનાત્મકૈઃ ॥ ૧૯॥

શસ્ત્રાસ્ત્રાણિ હ્યમોઘાનિ ધૃત્વા વાહનગા બભુઃ ।
સન્નદ્ધાઃ સર્વભાવેન ચતુરઙ્ગબલાન્વિતાઃ ॥ ૨૦॥

પદાતયો હ્યસઙ્ખ્યાતા નાનાશસ્ત્રધરાસ્તથા ।
પર્વતદ્રુમપાષાણહસ્તાઃ સન્નિઃસૃતાઃ પ્રભો ॥ ૨૧॥

સિન્દૂરારુણભાલાશ્ચ મુક્તકેશા મહાબલાઃ ।
ઉડ્ડીયોડ્ડીય ધાવન્તઃ શિક્ષાયુદ્ધકરાસ્તતઃ ॥ ૨૨॥

શસ્ત્રયુદ્ધે મલ્લયુદ્ધે ગદાયુદ્ધે વિશારદાઃ ।
અસ્ત્રયુદ્ધવિચારજ્ઞા નિઃસૃતાઃ પ્રાસધારકાઃ ॥ ૨૩॥

ધૂલિવ્રજેન તેષાં તુ ભાસ્કરો નિષ્પ્રભઃ કૃતઃ ।
અગ્રે દૈત્યસ્ય સેનાયા ભૂષણાનિ યથા બભુઃ ॥ ૨૪॥

તથા હસ્તિસહસ્રાણાં સહસ્રાણિ યયુઃ પુરઃ ।
ધાતુભી રઞ્જિતાન્યેવ નાનાચિત્રૈર્મહામુને ॥ ૨૫॥

સિન્દૂરારુણભાલાનિ લસત્કુમ્ભધરાણિ ચ ।
(Page ખં. ૧ અ. ૨૬ પાન ૬૦)

ઘણ્ટાસાન્દ્રનિનાદૈશ્ચ નાદિતાનિ ત્વિતસ્તતઃ ॥ ૨૬॥

મહાવીરાશ્રિતાન્યેવ કુન્તલાદ્યસ્ત્રકૈસ્તથા ।
પૂર્ણાનિ ચઞ્ચલાશ્ચૈવ પર્વતા ઇવ શોભિતાઃ ॥ ૨૭॥

ગિરીણાં ચૈવ દન્તાગ્રૈર્ભેદકાનિ પ્રજાપતે ।
શુણ્ડાભિર્વૃક્ષજાલાનાં છેદકાનિ મહાન્તિ ચ ॥ ૨૮॥

મદેનાસિક્તભાલાનિ ભ્રમરૈર્ગુઞ્જિતાનિ ચ ।
રણે શત્રુસહસ્રાણાં નાશકારાણિ સર્વશઃ ॥ ૨૯॥

નિઃસૃતાનિ પુરેભ્યશ્ચ સેનાશોભાકરાણિ ચ ।
દૈત્યૈઃ સુદારુણૈસ્તાનિ સ્વાશ્રિતાનિ સમન્તતઃ ॥ ૩૦॥

તતોઽશ્વાનાં મહાસેના નિઃસૃતા બલવત્તરાઃ ।
ચઞ્ચલા વાયુવેગાશ્ચ તત્રાઽશ્વાઃ પૂર્ણભૂષિતાઃ ॥ ૩૧॥

ચામરૈર્વીજિતાશ્ચૈવ મનોવેગા મહાબલાઃ ।
ઉડ્ડીયોડ્ડીય ધાવન્ત આકાશે વાયવો યથા ॥ ૩૨॥

ખુરાઘાતૈર્વિસ્ફુલિઙ્ગાન્ પ્રસ્રંવત ઇતસ્તતઃ ।
નાનાશસ્ત્રધરાસ્તત્ર દૈત્યા રેજુર્યથા ઘનાઃ ॥ ૩૩॥

કાલસ્ય ભયદાઃ સર્વે નાનાયુદ્ધવિશારદાઃ ।
અપારાશ્ચ સમારૂઢા દારુણાઃ પાપનિશ્ચયાઃ ॥ ૩૪॥

તત્ર કેચિન્મહાદૈત્યાઃ ખરારોહા વિનિઃસૃતાઃ ।
અજયાનાધિરૂઢાશ્ચ ગોવાહનવિરાજિતાઃ ॥ ૩૫॥

મહિષારૂઢકાશ્ચાન્યે વ્યાઘ્રારૂઢા મહાબલાઃ ।
સિંહશાર્દૂલવાહાશ્ચ ખગવાહાસ્તથાપરે ॥ ૩૬॥

ઇત્યાદિચિત્રરૂપેષુ વાહનેષુ વિરાજિતાઃ ।
નિઃસૃતા અસુરાઃ સર્વે યમમત્તુમિવોદ્યતાઃ ॥ ૩૭॥

તતો રથસમારૂઢા રથિનો નિઃસૃતાઃ પ્રભો ।
અપારાશ્ચ મહાક્રોધારુણનેત્રા ભયઙ્કરાઃ ॥ ૩૮॥

રથાશ્ચાલઙ્કૃતાસ્તત્ર મણિમુક્તાદિભિઃ પરૈઃ ।
નાનાશસ્ત્રાસ્ત્રભારૈશ્ચ પૂરિતા મેઘઘોષિણઃ ॥ ૩૯॥

ધ્વજૈરલઙ્કૃતાઃ પૂર્ણા અશ્વૈર્જવનશાલિભિઃ ।
સંયુતાશ્ચતુરૈઃ સૂતૈર્મહાવીરૈઃ સમાશ્રિતાઃ ॥ ૪૦॥

રથાઃ ખરયુતાઃ કેચિદ્ વૃકૈર્વૈ વાહિતાઃ પરે ।
સિંહૈર્ગોભિર્ગજૈરૃક્ષૈર્નાનાપશુભિરાબભુઃ ॥ ૪૧॥

તત્ર વજ્રસમાઙ્ગૈશ્ચ ખરૈઃ શતમિતૈર્યુતમ્ ।
અલઙ્કૃતં રથં દૈત્યો મત્સરઃ સ સમારુહત્ ॥ ૪૨॥

તસ્યાઽગ્રે તત્સુતૌ શૂરાવશ્વારૂઢૌ પ્રજગ્મતુઃ ।
વિરોચનાદયો દૈત્યાઃ સમન્તાજ્જગ્મુરાજિષુ ॥ ૪૩॥

પૃથિવ્યાં તસ્ય સૈન્યં તત્ સમુદ્ર ઇવ સમ્બભૌ ।
મહારથમહાવીરયુદ્ધભૂષણભૂષિતમ્ ॥ ૪૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે મત્સરાસુરસેનાવર્ણનં નામ પઞ્ચવિંશોઽધ્યાયઃ ॥ ૧.૨૫

## ૧.૨૬ પાતાલવિજયો નામ ષડ્વિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
તતો દક્ષ મહત્સૈન્યં પૃથિવીજયનોદ્યતમ્ ।
હનને ક્ષત્રિયાણાં તત્પ્રવૃત્તં કાલચક્રવત્ ॥ ૧॥

વિરોચનાદયો દૈત્યાઃ સ્થિતા યત્ર યમોપમાઃ ।
યુદ્ધં તૈઃ સહ કુર્વાણઃ કઃ સ્થાસ્યતિ પુમાન્ ભુવિ ॥ ૨॥

દૈત્યાઃ પાદપ્રહારેણ ચૂર્ણયન્તોઽદ્રિસઞ્ચયાન્ ।
(Page ખં. ૧ અ. ૨૬ પાન ૬૧)
શેષમસ્તકમાનમ્ય ભારેણૈવ પ્રચક્રિરે ॥ ૩॥

તાન્ મેઘસદૃશાન્ દૃષ્ટ્વા પર્વતાકારસંસ્થિતાન્ ।
અભવન્ યમરૂપાન્ તે ક્ષત્રિયા ગતજીવિનઃ ॥ ૪॥

કેચિત્પલાયિતાસ્તત્ર કેચિચ્ચ શરણં યયુઃ ।
મહાવીરાસ્તુ તે યુદ્ધં કૃત્વા સ્વર્ગં યયુર્મતાઃ ॥ ૫॥

યે મૃતાસ્તત્સુતાસ્તૈસ્તુ સ્થાપિતાઃ કરદાયિનઃ ।

શરણાગતરાજાનઃ સ્થાપિતાઃ સ્વપદે તથા ॥ ૬॥

યચ્ચ રાજવિહીનં તુ દૈત્યાસ્તત્રાધિપાઃ કૃતાઃ ।
રાજાનઃ સર્વવિષયે બભૂવુર્ભાગસંયુતાઃ ॥ ૭॥

દેશે દેશે તથા દૈત્યાઃ ક્ષત્રિયાણાં ચ સન્નિધૌ ।
સ્થાપિતા ભાવબોધાર્થમેવં સર્વત્ર કારિતમ્ ॥ ૮॥

સદ્વીપાં વસુધાં સર્વાં જિત્વા દૈત્યો નનન્દ હ ।
મત્સરોઽતિવશાં પૃથ્વીં તત્ર દૃષ્ટ્વા પ્રજાપતે ॥ ૯॥

પાતાલમગમદ્દૈત્યો દૈત્યવૃન્દસમન્વિતઃ ।
મત્સરો નાગસર્પાણાં જયાર્થં બલવાંસ્તતઃ ॥ ૧૦॥

નાગોદ્યાનાનિ ગત્વા તે બભઞ્જુર્દિતિનન્દનાઃ ।
તાન્ દૃષ્ટ્વા નાગરાજા વૈ યુદ્ધાર્થં સમુપાયયુઃ ॥ ૧૧॥

વાસુકિસ્તક્ષકશ્ચૈવ કમ્બલાશ્વતરૌ તથા ।
ઇત્યાદ્યા બહવો નાગા નાગરાજાઃ સમાયયુઃ ॥ ૧૨॥

સન્નદ્ધાઃ ક્રોધયુક્તાસ્તે મહાભોગા મહાબલાઃ ।
રથાદિષુ સમારૂઢા નાનાવાહનગા બભુઃ ॥ ૧૩॥

શસ્ત્રાસ્ત્રનિચયૈર્બાણૈર્દૈત્યાન્ જઘ્નુર્મહાબલાન્ ।
દૈત્યાસ્તાન્ શસ્ત્રસઙ્ઘાતૈઃ પાતયામાસુરોજસા ॥ ૧૪॥

નાગૈર્મહાબૈલસ્તત્ર નિહતા દૈત્યસઞ્ચયાઃ ।
ભગ્નદર્પાઃ પલાયન્ત દશદિક્ષુ સુવિહ્વલાઃ ॥ ૧૫॥

દૈત્યાનાં કદનં દૃષ્ટ્વા વિરોચનમુખાઽઽયયુઃ ।
અસુરાઃ ક્રોધસંયુક્તા નાગાંશ્ચામર્દયંસ્તુ તે ॥ ૧૬॥

શસ્ત્રાસ્ત્રૈર્વિવિધૈર્દૈત્યા મારયામાસુરોજસા ।
કેષાઞ્ચિન્ મસ્તકા ભગ્નાઃ પાદહસ્તોદરં તથા ॥ ૧૭॥

શોણિતાનાં મહાનદ્યઃ પ્રાસ્રવન્ વૈ દિશો દશ ।
ભગ્નદર્પા ભયાન્નાગાઃ પલાયનમકુર્વત ॥ ૧૮॥

કેચિત્તાન્ શરણં જગ્મુર્દૈત્યાન્ પરમદારુણાન્ ।
હાહાકારરવૈર્યુક્તા નાગાસ્ત્રાસસમન્વિતાઃ ॥ ૧૯॥

દૈત્યાનાં પૌરુષં દૃષ્ટ્વા વાસુકિપ્રમુખાઽઽયયુઃ ।
ક્રોધેન પરિતપ્તાંસ્તાન્ વારયામાસુરોજસા ॥ ૨૦॥

તક્ષકાદિમહાનાગા વિષં ક્ષુબ્ધાશ્ચ તત્યજુઃ ।
વિવરં તદ્વિષૈઃ સર્વં વ્યાપ્તં તત્ર પ્રજાપતે ॥ ૨૧॥

મહાવિષભવા જ્વાલા દદાહાસુરપુઙ્ગવાન્ ।
મૃતા દૈત્યા અનેકે ચ ગરલેન પ્રપીડિતાઃ ॥ ૨૨॥

ન સ્થાતું શક્યતે તત્ર દૈત્યૈઃ સઙ્ગ્રામમણ્ડલે ।
શસ્ત્રાણિ તેષાં સર્વાણિ દગ્ધાનિ ચ તદા કિલ ॥ ૨૩॥

ગજાશ્વરથપાદાતં મૃતં દગ્ધં ચ સર્વશઃ ।
મૂર્છિતાઃ પતિતા ભૂમૌ વિરોચનમુખાસ્તતઃ ॥ ૨૪॥

નાગા મોદં પ્રચક્રુસ્તે નાદયન્તો દિશો દશ ।
હર્ષેણ મહતા યુક્તા નૃત્યન્તિ સ્મ સ્થિતાઃ પરે ॥ ૨૫॥

એતસ્મિન્નન્તરે તત્ર પ્રતાપી ચ વિરોચનઃ ।
ઉત્થિતઃ સમરશ્લાઘી ગતપીડો મહાબલઃ ॥ ૨૬॥

શુક્રેણ તત્ર દૈતેયા વિદ્યયા નિર્વિષાઃ કૃતાઃ ।
ઉત્થિતાઃ સર્વતઃ સર્વે અન્ધકપ્રમુખા બભુઃ ॥ ૨૭॥

અસુરાઃ ક્રોધસંયુક્તા ગરુડાસ્ત્રં ચ તત્યજુઃ ।
તસ્માત્તુ ગરુડા જાતા નાગાન્ સર્વાનભુઞ્જત ॥ ૨૮॥

તત્ર વાસુકિના તેન વિષજ્વાલા પ્રવર્તિતા ।
(Page ખં. ૧ અ. ૨૭ પાન ૬૨)
ગરુડાશ્ચ તયા દગ્ધા ગરુડાસ્ત્રં તથાઽભવત્ ॥ ૨૯॥

એતત્ દૃષ્ટ્વા મહાશ્ચર્યં વાસુકેઃ પૌરુષં મહત્ ।
વિરોચનાદયઃ સર્વે ગરુડા માયયાઽભવન્ ॥ ૩૦॥

તૈઃ સર્વૈર્ભક્ષિતં સૈન્યં નાગાનાં તદ્દિશો દશ ।
પલાયન્ત ભયોદ્વિગ્ના મહાનાગાશ્ચ ભીરવઃ ॥ ૩૧॥

સર્પરાટ્ તક્ષકાદ્યા યે ગરુડૈઃ પીડિતા ભૃશમ્ ।
મૂર્છિતાશ્ચ મૃતપ્રાયા જાતા યુદ્ધે ચ દારુણે ॥ ૩૨॥

શેષેણ સર્વવૃત્તાન્તો જ્ઞાતો જ્ઞાતિભયઙ્કરઃ ।

આયયૌ સામભાવેન શરણં દૈત્યસન્નિધૌ ॥ ૩૩॥

કિમર્થં ક્રોધસંયુક્તા દૈત્યા બ્રૂત મહાબલાઃ ।
ભ્રાતરસ્ત્વસુરા યૂયં મદીયા નાત્ર સંશયઃ ॥ ૩૪॥

કિમર્થં યુદ્ધમારબ્ધં વક્તવ્યં દિતિનન્દનાઃ ।
પાતાલવાસિનઃ સર્વે ભવન્તો વયમેવ ચ ॥ ૩૫॥

મુદ્ગલ ઉવાચ ।
શેષસ્ય વચનં શ્રુત્વા પ્રતાપી ચ વિરોચનઃ ।
ઉવાચ તં વચો રમ્યં તેજોયુક્તં સ્વભાવતઃ ॥ ૩૬॥

વિરોચન ઉવાચ ।
શેષ શેષ મહાભાગ માન્યોઽસિ ચ મહામતે ।
સ્નેહેન વદસિ પ્રાજ્ઞ સત્યં શ‌ૃણુ ચ મદ્વચઃ ॥ ૩૭॥

અસ્માકં મત્સરો રાજા બ્રહ્માણ્ડં વશમાત્મનઃ ।
ઇચ્છત્યાશાસનં તસ્ય ગ્રાહ્યં યુષ્માભિરાદૃતૈઃ ॥ ૩૮॥

નોચેન્નાગાસુરાણાં ચ વિનાશઃ પ્રભવિષ્યતિ ।
ત્વં શ્રેષ્ઠઃ સર્વભાવેન સર્વેષાં હિતમાચર ॥ ૩૯॥

વિરોચનવચઃ શ્રુત્વા શેષઃ સર્વાર્થકોવિદઃ ।
પ્રહસંસ્તમુવાચેદં સામયુક્તં મહામતિઃ ॥ ૪૦॥

યદિચ્છતિ મહાભાગો મત્સરસ્તત્ કરોમ્યહમ્ ।
ઇત્યુક્ત્વા દાતુમુદ્યુક્તઃ કરભારં ચ વાર્ષિકમ્ ॥ ૪૧॥

નાનારત્નાનિ દત્ત્વા વૈ સામ ચક્રેઽસુરૈઃ સહ ।
નાગાન્ વાસુકિમુખ્યાન્ સ ગૃહીત્વા સ્વસ્થલં યયૌ ॥ ૪૨॥

અસુરા હર્ષિતાઃ સર્વે જિતનાગા મહાબલાઃ ।
પાતાલજયિનો ભૂત્વા વરુણં જેતુમાયયુઃ ॥ ૪૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે પાતાલવિજયો નામ ષડ્વિંશોઽધ્યાયઃ ॥ ૧.૨૬

# ૧.૨૭ મત્સરાસુરવિજય ઇન્દ્રપરાજયો નામ સપ્તવિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
અસુરા જયશોભાઢ્યા વરુણાલયમાગતાઃ ।
દૂતં સમ્પ્રેષયામાસુર્વરુણસ્ય સભાં પ્રતિ ॥ ૧॥

વરુણસ્ય સભાં ગત્વા દૂતો વચનમબ્રવીત્ ।
શ‍ૃણુ તોયેન્દ્ર વાક્યં મે પ્રેષિતો મત્સરેણ યત્ ॥ ૨॥

મમ વૈ વશગો ભૂત્વા તિષ્ઠ સ્થાને મહાબલ ।
નોચેત્સઙ્ગ્રામભૂમૌ ત્વાં વધિષ્યામિ સુરાંસ્તથા ॥ ૩॥

દૂતસ્ય વચનં શ્રુત્વા વરુણઃ ક્રોધમૂર્છિતઃ ।
સઙ્ગ્રામાય ચ સન્નદ્ધો બભૂવાતિભયાનકઃ ॥ ૪॥

મકરારૂઢ એવાઽસૌ પાશાદ્યસ્ત્રપ્રધારકઃ ।
યાદાંસિ દેવરૂપાણિ ગૃહીત્વા બહિરાયયૌ ॥ ૫॥

દૂતેન કથિતઃ સર્વો વૃત્તાન્તો વરુણસ્ય તમ્ ।
શ્રુત્વા મત્સરદૈતેયો દૈત્યૈર્યુદ્ધોદ્યતોઽભવત્ ॥ ૬॥

દેવાનામસુરાણાં ચ સૈન્યે પરમદારુણે ।
(Page ખં. ૧ અ. ૨૭ પાન ૬૩)
પરસ્પરં સુસન્નદ્ધે રણભૂમૌ પ્રજગ્મતુઃ ॥ ૭॥

દેવાનાં સૈન્યમત્યુગ્રં દૃષ્ટ્વા ખલુ વિરોચનઃ ।
મહિષાસુરનામા ચ શુમ્ભશ્ચૈવાન્ધકાસુરઃ ॥ ૮॥

અન્યે તે બહવસ્તત્ર ધાવન્તો રણમૂર્ધનિ ।
નાદયન્તો દિશઃ સર્વે જઘ્નુર્દેવાંશ્ચ સાહસાત્ ॥ ૯॥

મિલિતા દેવદૈત્યાસ્તે પરસ્પરજયેપ્સવઃ ।
શસ્ત્રાસ્ત્રૈર્વૃક્ષપાષાણૈર્જઘ્નુર્વીરાનનેકશઃ ॥ ૧૦॥

અભવત્તુમુલં યુદ્ધં દૈત્યદેવવિનાશનમ્ ।
દિનત્રયં મહાઘોરં દૈત્યા ભગ્નાસ્તતોઽભવન્ ॥ ૧૧॥

જલશાયિન એવં સ્મ દેવા ગર્જન્તિ ભૈરવમ્ ।
મૂર્છિતા દૈત્યભૂપાશ્ચ વિરોચનમુખાસ્તથા ॥ ૧૨॥

તાન્ કાવ્યઃ સાવધાનાંશ્ચ ચકાર સ્વેન તેજસા ।
ઉત્થિતાઃ સર્વવીરાસ્તે યુયુધુસ્ત્વસુરાઃ પુનઃ ॥ ૧૩॥

ક્રોધેન મહતા યુક્તા જઘ્નુર્દેવાન્ મહાબલાન્ ।
પુનશ્ચ તુમુલં યુદ્ધં બભૂવાતિભયાનકમ્ ॥ ૧૪॥

યુદ્ધં ચક્રુરહોરાત્રં સુરાઃ સર્વે જલૌકસઃ ।
યાદસાં ચ ગણાઃ સર્વે મૃતા ભગ્નાઃ પ્રચૂર્ણિતાઃ ॥ ૧૫॥

સર્વ દેવગણાસ્તત્ર વવ્રજુઃ સર્વતોદિશમ્ ।
વરુણં ચ દધારાઽપિ બલવાન્ સ વિરોચનઃ ॥ ૧૬॥

ધૃતં વરુણમાશ્રુત્ય દુદ્રુવુશ્ચ જલૌકસઃ ।
મૃતાઃ કેચિત્ ક્ષતાઃ કેચિચ્છરણં કે ચ તાન્ યયુઃ ॥ ૧૭॥

હર્ષિતા નાદસંયુક્તા દૈતેયા જગ્મુરાદૃતાઃ ।
ઉત્તરે ધનનાથં તે જલમાર્ગત એવ ચ ॥ ૧૮॥

કુબેરેણ સ વૃત્તાન્તઃ શ્રુતો વરુણલોકતઃ ।
પલાયનં સમાલમ્બ્ય કૈલાસે શઙ્કરં યયૌ ॥ ૧૯॥

તં તથાગતમાશ્રુત્ય દૈત્યા પરમદારુણાઃ ।
અલકાયાં પ્રવેશં તે ચક્રુશ્ચ જયશાલિનઃ ॥ ૨૦॥

એવં જિત્વા કુબેરં તં વરુણેન સમન્વિતાઃ ।
ધર્મરાજં યયુઃ સર્વે દૈતેયા મૃત્યુરૂપકમ્ ॥ ૨૧॥

યમરાજસ્તુ સન્નદ્ધઃ શ્રુત્વા દૂતમુખાત્ કથામ્ ।
યમો રાગૈશ્ચ રક્ષોભિર્વિવિધૈઃ પરિવારિતઃ ॥ ૨૨॥

મહિષારૂઢ એવાઽસૌ દણ્ડહસ્તો મહાબલઃ ।
આયયૌ રણભૂમિં ચ મહામૃત્યુસમન્વિતઃ ॥ ૨૩॥

યમં સમાગતં દૃષ્ટ્વા મૃત્યુરોગાદિભિર્યુતમ્ ।
દૈતેયાઃ ક્રોધસંયુક્તા યુયુધુઃ સહસા બલાત્ ॥ ૨૪॥

દેવાનાં ચૈવ દૈત્યાનાં વીરાશ્ચ યુયુધુર્ભૃશમ્ ।
પરસ્પરં બોધયન્તો જઘ્નુર્નાનાપ્રહારતઃ ॥ ૨૫॥

મહાદ્ભુતં પઞ્ચદિનં યુદ્ધં દારુણરૂપકમ્ ।

નાશકં દેવદૈત્યાનાં બભૂવૈવં પ્રજાપતે ॥ ૨૬॥

યામ્યૈશ્ચ મર્દિતા દૈત્યા મૃતાઃ કેચિત્ ક્ષતાઃ પરે ।
વવ્રજુઃ સર્વશસ્તત્ર મૃત્યુસન્ત્રાસતાપિતાઃ ॥ ૨૭॥

એતસ્મિન્નન્તરે તત્ર વિષયપ્રિય આગતઃ ।
મત્સરાસુરપુત્રસ્તુ યુયુધે મૃત્યુના સહ ॥ ૨૮॥

મત્સરપ્રેરણાત્ શીઘ્રં નરાણાં હૃદ્યતાડયત્ ।
તેનાસ્ત્રેણ ચ શસ્ત્રેણ રોગાઃ પરમપીડિતાઃ ॥ ૨૯॥

યામ્યાસ્તે મૃત્યુરૂપા વૈ પલાયનમકુર્વત ।
યમેન બહુધા શસ્ત્રૈર્યોધયામાસ દારુણમ્ ।
મહિષં મૂર્છિતં કૃત્વા પાતયામાસ વૈ યમમ્ ॥ ૩૦॥

ઉત્થિતો ધર્મરાજશ્ચ કાલદણ્ડેન વેગતઃ ।
અતાડયદ્દૈત્યપુત્રં તં ગર્જન્વિષયપ્રિયમ્ ॥ ૩૧॥

કાલદણ્ડસ્તુ તં દૃષ્ટ્વા પતિતો ધરણીતલે ।
આગત્ય સહસા તેન પ્રતાપેન ધૃતો યમઃ ॥ ૩૨॥

તસ્યૈતચ્ચ મહત્કર્મ દૈત્યપુત્રસ્ય દૈત્યપાઃ ।
તુષ્ટુવુઃ પરમપ્રીતા ધન્યં ધન્યં તમબ્રુવન્ ॥ ૩૩॥

(Page ખં. ૧ અ. ૨૭ પાન ૬૪)
યમં ધૃત્વા ચ દૈતેયા આયયુશ્ચામરાવતીમ્ ।
ઇન્દ્રોઽપિ દેવસઙ્ઘૈશ્ચ સન્નદ્ધો વૈરભાવતઃ ॥ ૩૪॥

અગ્નિર્વાયુઃ પ્રસન્નદ્ધાવાગતૌ બલસંયુતૌ ।
દેવાઃ સર્વે મહાભાગાઃ સ્વસ્વલોકાત્ સમાયયુઃ ॥ ૩૫॥

વિશ્વેદેવાશ્ચ સાધ્યાશ્ચ રુદ્રા વસવ એવ ચ ।
ગન્ધર્વાશ્ચૈવ યક્ષાશ્ચ વિદ્યાધરસમાયુતાઃ ॥ ૩૬॥

ગ્રહાશ્ચન્દ્રશ્ચ સૂર્યશ્ચ આદિત્યા બલવત્તરાઃ ।
સન્નદ્ધાઃ સર્વદેવાસ્તે વજ્રિણં જગ્મુરાદૃતાઃ ॥ ૩૭॥

સર્વદેવગણૈરિન્દ્રો રણભૂમિં સમાયયૌ ।
ઐરાવતસમારૂઢો વજ્રપાણિર્મહાબલઃ ॥ ૩૮॥

દેવસૈન્યં સુસન્નદ્ધમાગતં સ્વબલાન્વિતમ્ ।

દૃષ્ટ્વા દૈત્યગણાઃ સર્વે જઘ્નુઃ શસ્ત્રપ્રહારતઃ ॥ ૩૯॥

દેવા જઘ્નુશ્ચ તાન્ શસ્ત્રૈર્મહાક્રોધસમન્વિતાઃ ।
એવં પરસ્પરં તત્ર તુમુલં યુદ્ધમપ્યઽભૂત્ ॥ ૪૦॥

મૃતા દૈત્યાસ્તથા દેવસ્તાડિતાઃ શસ્ત્રઘાતતઃ ।
દૈત્યૈર્હતાશ્ચ દેવાસ્તે છિન્ના ભિન્નાઃ સુમૂર્છિતાઃ ॥ ૪૧॥

એવં પરસ્પરં યુદ્ધં દેવદૈત્યવિનાશનમ્ ।
સપ્તરાત્રમભૂત્તીવ્રં તતો દૈત્યાઃ પલાયિતાઃ ॥ ૪૨॥

વિરોચનાદયઃ સર્વે મૂર્છિતા ધરણીતલે ।
જયવન્તઃ સુરેન્દ્રાસ્તે વદન્તઃ સ્મ પ્રહર્ષિતાઃ ॥ ૪૩॥

એતદ્ દૃષ્ટ્વા મહાશ્ચર્યં સુન્દરપ્રિય આગતઃ ।
જ્યેષ્ઠપુત્રો મત્સરસ્ય યુયુધે સર્વદૈવતૈઃ ॥ ૪૪॥

શસ્ત્રાસ્ત્રૈર્મલ્લયુદ્ધૈસ્તન્ મર્દિતં તેન સર્વશઃ ।
દેવસૈન્યં દિક્ષુ તત્ર પલાયત ભયાતુરમ્ ॥ ૪૫॥

શોણિતપ્રસ્રવાસ્તત્ર નદ્યો જાતાઃ પ્રજાપતે ।
ઇન્દ્રોઽપિ યુયુધે તેન દૈત્યપુત્રેણ ધીમતા ॥ ૪૬॥

વજ્રેણ નિહતસ્તત્રેન્દ્રેણ દૈત્યો મહાબલઃ ।
ન ચચાલ તદાશ્ચાર્યમિન્દ્રચેતસિ સઙ્ગતમ્ ॥ ૪૭॥

દૈત્યપુત્રઃ સમાગત્ય સ્વઙ્ગેનૈરાવતં ગજમ્ ।
મૂર્છિતં કારયામાસ વજ્રિણં ચ પદાગ્રહીત્ ॥ ૪૮॥

મર્દયિત્વા સુરેશાનં સ્વવશં ચ ચકાર હ ।
ધૃત્વા પુરન્દરં સોઽપિ સ્વસ્થાનમગમન્મુદા ॥ ૪૯॥

દૈત્યૈઃ સમ્પૂજિતસ્તત્ર મહાબલપરાક્રમઃ ।
સુન્દરપ્રિયપુત્રોઽભૂન્ મત્સરસ્ય પ્રહર્ષિતઃ ॥ ૫૦॥

દેવાઃ કેચિદ્ ધૃતાસ્તત્ર કેચિદ્વૈ મૂર્છિતાઃ કુતાઃ ।
કેચિત્ પલાયિતા દક્ષ ભગ્નાઃ કેઽપિ વિચૂર્ણિતાઃ ॥ ૫૧॥

એવં સ સકલાન્ દેવાન્ વશાંશ્ચક્રે મહાબલઃ ।
મત્સરાસુર એવાઽયં સ્વર્ગાધીશો બભૂવ હ ॥ ૫૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે મત્સરાસુરવિજય ઇન્દ્રપરાજયો નામ સપ્તવિંશતિતમોઽધ્યાયઃ ॥ ૧.૨૭
(Page ખં. ૧ અ. ૨૮ પાન ૬૫)

## ૧.૨૮ મત્સરાસુરચેષ્ટિતકથનં નામ અષ્ટાવિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
દેવાશ્ચ શરણં કેચિત્ કશ્યપાદીન્ સમાયયુઃ ।
વિહ્વલા ભયભીતાસ્તે શશંસુર્દૈત્યચેષ્ટિતમ્ ॥ ૧॥

દેવા ઊચુઃ ।
મત્સરેણ પ્રદુષ્ટેન જિતા દેવાઃ સવાસવાઃ ।
ઇન્દ્રો ધૃતો મહાભાગ વયં શરણમાગતાઃ ॥ ૨॥

રક્ષ ત્વં મુનિશાર્દૂલ ત્વં પિતા ભયવિહ્વલાન્ ।
જીવનાશસમાદ્ દુઃખાદિન્દ્રં મોચય મત્સરાત્ ॥ ૩॥

દેવાનાં વચનં શ્રુત્વા વસિષ્ઠાદિસમન્વિતઃ ।
બ્રહ્માણં પ્રયયૌ દેવૈઃ કશ્યપો વંશવૃદ્ધયે ॥ ૪॥

સત્યલોકે સમાસીનં ગત્વા દૃષ્ટ્વા નનામ ચ ।
સ્તુત્વા તં વિવિધૈર્વાક્યૈઃ પ્રાઞ્જલિઃ પ્રત્યુવાચ હ ॥ ૫॥

કશ્યપ ઉવાચ ।
મત્સરેણ ધૃતઃ સ્વામિન્નિન્દ્રો દેવવરૈઃ સહ ।
દેવસ્થાનપતિર્જાતો દૈત્યઃ પરમદારુણઃ ॥ ૬॥

દેવા દૈત્યાઃ પદે સ્વે સ્વે યથાયોગ્યે વસન્તિ વૈ ।
તથા કુરુ જગન્નાથ ત્વં ધાતા ચ ગતિર્હિ નઃ ॥ ૭॥

કશ્યપસ્ય વચઃ શ્રુત્વા દેવાંશ્ચર્ષીનથાઽબ્રવીત્ ।
પિતામહઃ પ્રજાનાથ હૃદયેન વિદૂયતા ॥ ૮॥

બ્રહ્મોવાચ ।
શ‍ૃણુધ્વં મુનયો દેવાઃ શિવપ્રાપ્તવરોઽસુરઃ ।
અજેયઃ સર્વભૂતાનાં દેવાદીનાં વિશેષતઃ ॥ ૯॥

ન શક્તોઽહં કદા કર્તું યથાયોગ્યં સ્વભાવતઃ ।
ગચ્છામિ શરણં વિષ્ણું ભવદ્ભિઃ સહ પાલકમ્ ॥ ૧૦॥

વૈકુણ્ઠમગમદ્ બ્રહ્મા દેવૈશ્ચ મુનિભિઃ સહ ।
ગત્વા વિષ્ણું નમસ્કૃત્ય સ્તુત્વોવાચ પ્રજાપતિઃ ॥ ૧૧॥

મત્સરેણ ધૃતો યુદ્ધે ઇન્દ્રો દેવવરઃ પ્રભો ।
કિં સ્થિતોઽસિ મહાવિષ્ણો ત્વં પાલક ઇતિ શ્રુતઃ ॥ ૧૨॥

બ્રહ્મણો વચનં શ્રુત્વા વિષ્ણુસ્તં પ્રત્યુવાચ હ ।
ન શક્યતે મયા ધાતર્વશં કર્તું મહાસુરમ્ ॥ ૧૩॥

શિવસ્ય વરદાનેન મત્તોઽસૌ દૈત્યપુઙ્ગવઃ ।
તસ્માચ્ચ શરણં યામઃ શઙ્કરં નાત્ર સંશયઃ ॥ ૧૪॥

બ્રહ્માદિભિઃ સ્વયં વિષ્ણુઃ કૈલાસમગમત્કિલ ।
શઙ્કરં પ્રણિપત્યાઽહ સર્વૈર્મુનિગણૈઃ સહ ॥ ૧૫॥

વિષ્ણુરુવાચ ।
નમસ્તે ભગવન્ શમ્ભો નમસ્તે શૂલપાણયે ।
નમસ્તે જગતાં નાથ સર્વસાક્ષિન્નમોસ્તુ તે ॥ ૧૬॥

નમો નમો મહાદેવ સ્રષ્ટ્રે રાજસરૂપિણે ।
પાત્રે વિષ્ણુસ્વરૂપાય હન્ત્રે રુદ્રસ્વરૂપિણે ॥ ૧૭॥

પઞ્ચવક્ત્રધરાયૈવ યોગિને યોગદાયિને ।
નિર્ગુણાય નિરૂપાય બ્રહ્મભૂતાય તે નમઃ ॥ ૧૮॥

મત્સરેણ મહાદેવ પીડિતાસ્તે સુરર્ષયઃ ।
ધૃત ઇન્દ્રઃ સુરાધીશો મર્દયિત્વા સુરાન્ પરમ્ ॥ ૧૯॥

ભયભીતા વયં તેન શરણં ત્વામુપાગતાઃ ।
રક્ષ નો દેવદેવેશ ત્વં શ્રેષ્ઠો દેવપાલક ॥ ૨૦॥

વિષ્ણોર્વચનમાકર્ણ્ય શિવશ્ચિન્તાતુરઃ સ્વયમ્ ।
ઉવાચ તાન્ દેવમુનીન્ વિષ્ણુમુખ્યાન્ મહેશ્વરઃ ॥ ૨૧॥

શિવ ઉવાચ ।
તપસોગ્રેણ દેવેશ મયા દૈત્યો વિવર્ધિતઃ ।
વરૈર્મહાદુર્લભૈશ્ચ કિં કરોમિ જનાર્દન ॥ ૨૨॥

દૈત્યો નાશયિતું વિષ્ણો ન શક્યઃ સ કદાચન ।
વિચારં કુરુ દેવેશ ત્વં બુદ્ધિયુત એવ હિ ॥ ૨૩॥

શિવસ્ય વચનં શ્રુત્વા વિષ્ણુઃ પરમકમ્પિતઃ ।
ઉવાચ દુઃખયુક્તેન હૃદયેન સુરેશ્વરમ્ ॥ ૨૪॥

વિષ્ણુરુવાચ ।
કર્તા ત્વમન્યથા કર્તા હ્યકર્તા નાત્ર સંશયઃ ।
વિપરીતં ત્વયોક્તં ચેદ્વયં કિં કરવામહે ॥ ૨૫॥

તવ વૈ સન્નિધૌ દેવ વસામશ્ચ સદાશિવ ।
(Page ખં. ૧ અ. ૨૯ પાન ૬૬)
વયં દૈત્યવશા નૈવ ચરામ ઇતિ મે મતિઃ ॥ ૨૬॥

વૈકુણ્ઠાદિપદં ત્યક્ત્વા તવ સન્નિધિમાગતાઃ ।
અધુના મત્સરો દૈત્ય આગમિષ્યતિ તત્ર સઃ ॥ ૨૭॥

વૈકુણ્ઠં સત્યલોકં ચ ગૃહીત્વા સુખમેષ્યતિ ।
તવ સ્થાનં ન કૈલાસં ભક્તત્વાદ્વૈ ગ્રહીષ્યતિ ॥ ૨૮॥

વિષ્ણોશ્ચ વચનં શ્રુત્વા શિવો નિઃશ્વાસસંયુતઃ ।
સ્થિતસ્તત્રૈવ દક્ષ ત્વં શ ૃણુ મત્સરચેષ્ટિતમ્ ॥ ૨૯॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે મત્સરાસુરચેષ્ટિતકથનં નામ અષ્ટાવિંશોઽધ્યાયઃ ॥ ૧.૨૮

## ૧.૨૯ શિવમત્સરાસુરસમાગમો નામ એકોનત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
ઇન્દ્રં ધૃત્વા મહાદૈત્યો મત્સરો હર્ષસંયુતઃ ।
ઐરાવતસમારૂઢો યયૌ તામમરાવતીમ્ ॥ ૧॥

વિરોચનમુખૈર્વીરૈઃ સંવૃતો દૈત્યપુઙ્ગવઃ ।
શુશુભે તત્ર તેજસ્વી પ્રભાવેણ બલેન ચ ॥ ૨॥

ઇન્દ્રાસને સમાસીનં તં યયુશ્ચાપ્સરોગણાઃ ।
ગંર્ધવાશ્ચારણાશ્ચૈવ ભયભીતાઃ સમન્તતઃ ॥ ૩॥

સિષેવિરે મહાભાગં મત્સરં ત્વમિતૌજસમ્ ।
સર્વભાવેન તં હૃષ્ટં ચક્રુઃ સર્વે સ્વવિદ્યયા ॥ ૪॥

દેવોદ્યાનેષુ સર્વેષુ વિચચાર મહાસુરઃ ।
કુશલો દેવભોગેષુ ભોગાંશ્ચ બુભુજે પરાન્ ॥ ૫॥

દેવસ્થાનાનિ સર્વાણિ વિભજ્ય પ્રદદૌ સ્વયમ્ ।
દૈત્યેભ્યો મુખ્યમુખ્યેભ્યો બલેન સહિતો મુને ॥ ૬॥

દત્તાનિ યાનિ સ્થાનાનિ સ્થિતાસ્તેષુ મહાસુરાઃ ।
નાનારૂપાન્ દેવભોગાન્ બુભુજુસ્તત્ર સંસ્થિતાઃ ॥ ૭॥

મત્સરં સેવમાનાસ્તે હ્યતિદર્પેણ સંવૃતાઃ ।
એકસ્મિન્ દિવસે ભૌમ ઇન્દ્રાસનસમાશ્રિતઃ ।
મત્સરો હર્ષયુક્તઃ સન્ દૈત્યાન્ પ્રોવાચ ગર્વિતઃ ॥ ૮॥

મત્સરાસુર ઉવાચ ।
ભો ભો વિરોચનાદ્યાશ્ચ શ ૃણુધ્વં ચ વચોઽસુરાઃ ।
બ્રહ્માદયો મહાભાગાઃ કથમત્રૈવ નાગતાઃ ॥ ૯॥

નમસ્યન્તિ ન દેવેશા માં યદા મત્સરાન્વિતાઃ ।
સર્વં મદં તદા તેષાં હરિષ્યામિ ન સંશયઃ ॥ ૧૦॥

મત્સરસ્ય વચઃ સર્વે તુષ્ટુવુર્દૈત્યદાનવાઃ ।
દૂતં સમ્પ્રેષયામાસ મત્સરઃ ક્રોધસંયુતઃ ॥ ૧૧॥

ગચ્છ દૂત ત્રયાણાં ત્વં બ્રહ્માદીનાં પદેષુ વૈ ।
દેવેશાન્ વદ વાક્યં મે સાવધાનેન ચેતસા ॥ ૧૨॥

દર્શનાર્થં મત્સરસ્ય યાન્તુ દેવા મયા સહ ।
નોચેન્મત્સરદૈતેયસ્તાડયિષ્યતિ નિશ્ચિતમ્ ॥ ૧૩॥

મત્સરસ્ય વચઃ શ્રુત્વા ગતો દૂતો બલાન્વિતઃ ।
અન્ધકો નામ દૈત્યેન્દ્રો મહાવેગસમન્વિતઃ ॥ ૧૪॥

સત્યલોકે સ ધાતારં ન દદર્શ મહાબલઃ ।
શૂન્યાં તાં નગરીં વીક્ષ્ય ગતો વૈકુણ્ઠમાદરાત્ ॥ ૧૫॥

તત્રાપિ તાદૃશં દૃષ્ટ્વા ગતઃ કૈલાસમેવ સઃ ।
તત્રાનન્દયુતાન્ સર્વાન્ દેવાંશ્ચર્ષીન્ દદર્શ ચ ॥ ૧૬॥

સભામધ્યગતો દૈત્યઃ શિવચારૈઃ પ્રવેશિતઃ ।
આસનસ્થેન શર્વેણ આસને વિનિવેશિતઃ ॥ ૧૭॥

કૈલાસવિભવં દૃષ્ટ્વા વિસ્મિતો માનસેઽભવત્ ।
સદાનન્દમયં ધન્યં મન્યમાનઃ સ્વચેતસિ ॥ ૧૮॥

પૃચ્છન્તં શઙ્કરં દૈત્ય ઉવાચ બલગર્વિતઃ ।
(Page ખં. ૧ અ. ૨૯ પાન ૬૭)
તૃણીકૃત્ય મહેશાનં સર્વાન્ દેવાંસ્તદાન્ધકઃ ॥ ૧૯॥

અન્ધક ઉવાચ ।
મત્સરાસુરવાક્યં ચ શ‍ૃણુધ્વં સુરસત્તમાઃ ।
જિત્વેન્દ્ર દેવનાથં ચ જાતોઽહં જગદીશ્વરઃ ॥ ૨૦॥

અતો મદ્દર્શનાર્થં ચ ભવન્તોઽપિ સહાનુગાઃ ।
બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ આગચ્છન્તુ મદન્તિકમ્ ॥ ૨૧॥

તસ્માદ્ભવદ્ભિરદ્યૈવ મયા સહ સુરેશ્વરાઃ ।
આગન્તવ્યં મત્સરસ્ય દર્શનાર્થં તુ સત્વરમ્ ॥ ૨૨॥

અન્ધકસ્ય વચઃ શ્રુત્વા શિવઃ ક્રોધસમન્વિતઃ ।
ઉવાચ તં મહાદૈત્યં મુખાદગ્નિં સમુદ્ગિરન્ ॥ ૨૩॥

શિવ ઉવાચ ।
કિં માં વદસિ પાપિષ્ઠ તૃણીકૃત્ય ચ યત્ વચઃ ।
મદ્વરસ્ય પ્રભાવેણ મત્સરો વિજયી ધ્રુવમ્ ॥ ૨૪॥

યદાઽહં ક્રોધસંયુક્તસ્તદા ભસ્મમયં ખલમ્ ।
કરિષ્યામિ ન સન્દેહઃ સાસુરં મત્સરં ખલુ ॥ ૨૫॥

મત્સરાજ્ઞાવશોઽહં રે કિં પ્રજાતોઽસુરાધમ ।
મત્વા ત્વાં મૂઢ દૂતેતિ મોચયામિ ન સંશયઃ ॥ ૨૬॥

ગચ્છ તં મત્સરં દૈત્યં વદ વાણીં મયેરિતામ્ ।
નોચેત્ત્વાં ભસ્મસાત્ કુર્યાં કુપિતોઽહં ખલોત્તમ ॥ ૨૭॥

શિવસ્ય વચનં શ્રુત્વા મત્સરં ત્વન્ધકો યયૌ ।
કથયામાસ વૃત્તાન્તં સર્વદૈત્યયુતાય ચ ॥ ૨૮॥

વિભવં વર્ણયામાસ કૈલાસસ્ય યથાયથમ્ ।

બ્રહ્માણ્ડે ન સમં કિઞ્ચિત્ કૈલાસસ્ય મહાસુરાઃ ॥ ૨૯॥

અન્ધકસ્ય વચઃ ક્રૂરં શ્રુત્વા દૈત્યાઃ મહાબલાઃ ।
વિરોચનમુખાઃ સર્વે મત્સરં ક્રૂરમબ્રુવન્ ॥ ૩૦॥

કિં સ્થિતોઽસિ મહાબાહો જેષ્યામસ્ત્વત્પ્રસાદતઃ ।
દેવત્રયં ન સન્દેહ આજ્ઞાં દેહ્યસુરેશ્વર ॥ ૩૧॥

દૈત્યાનાં વચનંશ્રુત્વા તેજોયુક્તં સ મત્સરઃ ।
ઉવાચ ક્રોધસંયુક્તસ્તાન્ દૈત્યાન્ હર્ષયન્નિવ ॥ ૩૨॥

મત્સર ઉવાચ ।
મયા તપઃપ્રભાવેણ પ્રાપ્તં તેજો મહાદ્ભુતમ્ ।
તત્ર શમ્ભુર્વૃથા માની સ્વાત્માનં મન્યતેઽર્થદમ્ ॥ ૩૩॥

તપોહીનાય રાજ્યં વૈ બ્રહ્માણ્ડસ્ય દદાતિ ચેત્ ।
તદાયં જગદીશો વૈ મન્યતે નાન્યથા મયા ॥ ૩૪॥

અતઃ શમ્ભું વિજેષ્યામસ્તપસ્તેજઃ સમન્વિતઃ ।
દર્પં તસ્ય હરિષ્યામિ વૃથા બ્રહ્મેતિ માનિનમ્ ॥ ૩૫॥

વેદાન્તે બ્રહ્મવેદેષુ કથિતં નિર્વિકપલ્કમ્ ।
તદેવ સર્વમાન્યં વૈ જગદીશતયા બભૌ ॥ ૩૬॥

સકામકર્મણા સર્વં પ્રાપ્યતે મનુજસ્તથા ।
બ્રહ્માર્પણતયા કર્મ કૃતં ચેન્મુક્તિરાપ્યતે ॥ ૩૭॥

અખિલં કર્મણા સૃષ્ટં પાલિતં ચ પ્રહીયતે ।
તત્ર કિં તૈસ્ત્રિભિર્દેવૈઃ ક્રિયતે કર્મજૈઃ ખલુ ॥ ૩૮॥

કર્મણાઽહં સૃજામ્યેવ પાલયામિ હરામિ ચ ।
કર્માધીનં જગત્સર્વં સદેવાસુરમાનુષમ્ ॥ ૩૯॥

એવમુક્ત્વા મહાદૈત્યો વિરોચનમુખૈર્વૃતઃ ।
આયયૌ શઙ્કરસ્થાનમાવેશેન સમન્વિતઃ ॥ ૪૦॥

નાનાશસ્ત્રાસ્ત્રધારાભિર્હતાસ્તત્ર બહિઃ સ્થિતાઃ ।
શિવચારાશ્ચ તૈઃ સર્વે પલાયન્ત ચ પીડિતાઃ ॥ ૪૧॥

છિન્નભિન્નાઙ્ગદેહાશ્ચ યયુઃ શઙ્કરસન્નિધૌ ।
ઊચુઃ સમાગતો દૈત્યૈઃ સર્વૈઃ સાકં સ મત્સરઃ ॥ ૪૨॥

॥ ॐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે શિવમત્સરાસુરસમાગમો નામ એકોનત્રિંશોઽધ્યાયઃ ॥ ૧.૨૯
(Page ખં. ૧ અ. ૩૦ પાન ૬૮)

## ૧.૩૦ શિવાદિપરાજયો નામ ત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
ગણાનાં ચ પિશાચાનાં વચનં દારુણં મહત્ ।
શ્રુત્વા શિવઃ સ્વયં તત્ર યુદ્ધાર્થં દંશિતોઽભવત્ ॥ ૧॥

બ્રહ્મા વિષ્ણુશ્ચ કામશ્ચ વસવો ધનદોઽભવત્ ।
ચન્દ્રઃ સૂર્યસ્તથા વહ્નિસમીરાદ્યાશ્ચ દંશિતાઃ ॥ ૨॥

કાલાગ્નિરુદ્રમુખ્યા યે ભૈરવો ભૂતનાયકઃ ।
કૃત્વા યુદ્ધક્ષમં વેષં સ્થિતાઃ શઙ્કરસન્નિધૌ ॥ ૩॥

અષ્ટભૈરવમુખ્યાશ્ચ વીરભદ્રાદયોઽભવન્ ।
નન્દી ભૃઙ્ગી પુષ્પદન્તમહાકાલરવાઃ સ્થિતાઃ ॥ ૪॥

મહાકાલીમુખાસ્તત્ર દેવ્યઃ શસ્ત્રધરાઽઽયયુઃ ।
એવં નાનાવિધૈઃ સૈન્યૈર્વૃતઃ શમ્ભુર્મહેશ્વરઃ ॥ ૫॥

વૃષારૂઢો મહાતેજા આયયૌ યુદ્ધલાલસઃ ।
યત્ર દૈત્યાઃ સ્થિતાસ્તત્ર કાર્તિકેયાદિભિર્યુતઃ ॥ ૬॥

શઙ્કરં સૈન્યસંયુક્તં નાનાયુદ્ધવિશારદમ્ ।
નાનાશસ્ત્રધરં દૃષ્ટ્વા દૈત્યેશાશ્ચિક્ષિપુઃ શરાન્ ॥ ૭॥

તદ્ દૃષ્ટ્વા કુપિતા દેવાઃ શસ્ત્રાસ્ત્રૈસ્તાનતાડયન્ ।
એવં પરસ્પરં યુદ્ધમભવદ્દારુણં મહત્ ॥ ૮॥

દેવાનાં ચૈવ દૈત્યાનામન્યોન્યજયકાઙ્ક્ષિણામ્ ।
શસ્ત્રાસ્ત્રનિચયૈર્બાણૈરન્ધકારઃ પ્રવર્તિતઃ ॥ ૯॥

સૈન્યાનાં રજસા વ્યાપ્તમાકાશં સર્વતો બભૌ ।
ન પ્રાજ્ઞાયત તત્રૈવ સ્વીયો વાઽપર એવ ચ ॥ ૧૦॥

ઘણ્ટાનાં શઙ્ખતૂર્યાણાં વીરાણાં રથિનાં તથા ।
બૃંહિતાનાં હેષિતાનાં શબ્દૈસ્તદ્બધિરીકૃતમ્ ॥ ૧૧॥

દેવાન્ દૃષ્ટ્વા સુરા જઘ્નુર્દૈત્યાન્ દેવાસ્તથાપરે ।
અસમ્બન્ધં મહાયુદ્ધં ચક્રિરે સુરદાનવાઃ ॥ ૧૨॥

શસ્ત્રૈઃ શસ્ત્રાણિ સંવાર્ય તથાસ્ત્રૈરસ્ત્રસઞ્ચયમ્ ।
મલ્લયુદ્ધં મહાવીરાશ્ચક્રુસ્તત્ર મદાન્વિતાઃ ॥ ૧૩॥

સઙ્ગ્રામે તુમુલે તત્ર પ્રવૃત્તે ઘોરરૂપિણિ ।
મૃતા મુમૂર્ષવઃ કેચિચ્છિન્નભિન્નાસ્તથાઽભવન્ ॥ ૧૪॥

નાનાજન્તુશરીરેભ્યઃ પ્રવૃત્તા રક્તસમ્ભવા ।
નદી બભૌ મહાઘોરા માંસકર્દમશાલિની ॥ ૧૫॥

રક્તા ચાસ્થિબલાકા ચ કેશશૈવાલશોભિતા ।
ચાપસર્પાશિરઃપદ્માકબન્ધદ્રુમવાહિની ॥ ૧૬॥

ભલ્લકાષ્ઠા મહાઘોરા ચામરૈસ્તૃણકૈર્યુતા ।
છત્રાવર્તા દુર્ગમા ચ ચર્મપટ્ટિશદર્દુરા ॥ ૧૭॥

ભીરુભીતિકરા ચૈવ વીરહર્ષપ્રવર્ધિની ।
તાં દૃષ્ટ્વા દૈત્યરાજાસ્તે ક્રોધયુક્તાઃ સમાયયુઃ ॥ ૧૮॥

તૈઃ સમન્તાદ્બલં ભગ્નં દેવાનાં સર્વમઞ્જસા ।
બાણજાલૈર્દિશો વ્યાપ્તા ગન્તું માર્ગો ન વિદ્યતે ॥ ૧૯॥

પલાયનપરા દેવાઃ સર્વે દશદિશોઽગમન્ ।
તદ્ દૃષ્ટ્વા દેવરાજાસ્તાન્ વારયામાસુરોજસા ॥ ૨૦॥

દ્વન્દ્વયુદ્ધં ચ તત્રાસીત્પરસ્પરવિનાશનમ્ ।
દેવાનાં મુખ્યદૈત્યાનાં કિઞ્ચિત્તેષાં વદામિ તે ॥ ૨૧॥

નમુચિઃ કામદેવેન યુયુધે બલસંયુતઃ ।
શમ્બરો વાયુના સાર્દ્ધં શુમ્ભો દેવ્યા મહાબલઃ ॥ ૨૨॥

ચન્દ્રેણાઽપિ નિશુમ્ભશ્ચ ગુહેન ચ વિરોચનઃ ।
કાલભૈરવદેવેન કાલભૈરવદાનવઃ ॥ ૨૩॥

મહિષાસુરદૈતેયઃ કાલાગ્ન્યારૂપહરેણ ચ ।
પ્રહ્લાદો વિષ્ણુના સાર્ધં વિપ્રચિત્તિશ્ચ ભાનુના ॥ ૨૪॥

અન્ધકાસુરનામા ચ વીરભદ્રેણ સંયુતઃ ।
અગ્નિના ચૈવ દુર્બુદ્ધિર્યુયુધે બલસંયુતઃ ॥ ૨૫॥

વિષયપ્રિય એવાઽસૌ બ્રહ્મણા યુયુધે ભૃશમ્ ।
શમ્ભુના યુયુધે તત્ર સુન્દરપ્રિય એવ સઃ ॥ ૨૬॥

(Page ખં. ૧ અ. ૩૦ પાન ૬૯)
મત્સરાસુરદૈત્યેશો યુદ્ધં દ્રષ્ટું સ્થિતોઽભવત્ ।
એવં નાનાદ્વન્દ્વયુદ્ધં શતશોથ સહસ્રશઃ ॥ ૨૭॥

સઙ્ખ્યાતું નૈવ શક્યં તદપારત્વાત્ પ્રજાપતે ।
શસ્ત્રાસ્ત્રૈરસુરા જઘ્નુઃ સુરાંસ્તાનપિ તે સુરાઃ ॥ ૨૮॥

અગ્નિવાય્વાદિકાસ્ત્રાણિ તત્યજુઃ ક્રોધસંયુતાઃ ।
ચકમ્પે ચ ત્રિભુવનં દારુણે સંયુગે તદા ॥ ૨૯॥

દેવાસુરપ્રણાશશ્ચ મહાંસ્તત્ર પ્રવર્તિતઃ ।
શોણિતૌઘૈઃ પ્રવૃત્તાસ્તુ નદ્યઃ પરમદારુણાઃ ॥ ૩૦॥

એવં સપ્ત દિવાનક્તં ગતં તેષાં પ્રયુધ્યતામ્ ।
નાસુરા ન ચ દેવાસ્તે વિરામં ચક્રુરઞ્જસા ॥ ૩૧॥

તતશ્ચ કુપિતા દેવા અત્યન્તં શઙ્કરાદયઃ ।
દૈત્યાનામસ્ત્રસઙ્ઘાતાનસ્ત્રૈઃ સંવાર્ય તાન્ પુનઃ ॥ ૩૨॥

તાડયામાસુરવ્યગ્રા અસ્ત્રૈર્નાનાવિધૈઃ પરમ્ ।
મૂર્છિતાન્ પતિતાંશ્ચક્રુર્મૃતાન્ સઞ્ચૂર્ણિતાન્ પરાન્ ॥ ૩૩॥

તતો દશ દિશો દૈત્યા વવ્રજુર્ભયસઙ્કુલાઃ ।
ત્રિશૂલાદિ મહાશસ્ત્રૈસ્તત્રાપિ તુ સુરા બભુઃ ॥ ૩૪॥

સુન્દરપ્રિયકાદ્યાશ્ચ મૂર્ચ્છિતા ધરણીં ગતાઃ ।
મૃતપ્રાયાઃ કૃતાસ્તૈસ્તે વિષ્ણ્વાદિભિરથો મુને ॥ ૩૫॥

તદ્ દૃષ્ટ્વા ક્રોધસંયુક્તો મત્સરઃ સ્વયમાયયૌ ।
કૃત્વા નાદં મહાઘોરં બ્રહ્માણ્ડ કમ્પયન્નિવ ॥ ૩૬॥

ધનુશ્ચક્રે સનાદં વૈ તેન સંશયિતાઃ સુરાઃ ।
બાણવૃષ્ટિં સસર્જાસૌ દારુણાં શત્રુનાશિનીમ્ ॥ ૩૭॥

તસ્ય બાણૈઃ સુરાઃ સર્વે મર્દિતા બલવત્તરમ્ ।
મૃતાઃ કેચિત્ ક્ષતાઃ કેચિન્ મૂર્ચ્છિતા પતિતા મૃધે ॥ ૩૮॥

પઞ્ચબાણૈશ્ચ સેનાન્યં તાડયામાસ વક્ષસિ ।
પતિતઃ સ ધરાપૃષ્ઠે મૂર્ચ્છિતો ભૃશવિહ્વલઃ ॥ ૩૯॥

અગ્નિં ચ સપ્તભિર્બાણૈર્નન્દિનં દશભિસ્તથા ।
તાડયામાસ દૈત્યેન્દ્રઃ પતિતં રણમૂર્ધનિ ॥ ૪૦॥

દશભિર્વીરભદ્રં સ સવિતારં તતોઽષ્ટભિઃ ।
ચન્દ્રં ચ સપ્તભિર્બાણૈઃ પાતયામાસ દૈત્યપઃ ॥ ૪૧॥

અનિલં નવભિશ્ચૈવ કાલાગ્નિં રુદ્રમષ્ટભિઃ ।
દશભિશ્ચ મહાકાલીં તાડયામાસ મત્સરઃ ॥ ૪૨॥

પઞ્ચભિઃ પઞ્ચભિશ્ચૈવ ગણપાન્ ભૃઙ્ગિમુખ્યકાન્ ।
બાણૈઃ સ પાતયામાસ પ્રલયાગ્નિસમદ્યુતિઃ ॥ ૪૩॥

કુબેરં દશભિશ્ચૈવ તાડયામાસ વક્ષસિ ।
બ્રહ્માણં શતબાણૈશ્ચ પાતયામાસ ભૂતલે ॥ ૪૪॥

એવં તસ્યાદ્ભુતં કર્મ દૃષ્ટ્વા વિષ્ણુઃ સમાયયૌ ।
બાણૈઃ સહસ્રસઙ્ખ્યાકૈર્વવર્ષે ઘનવદ્ ભૃશમ્ ॥ ૪૫॥

દૈત્યો બાણાન્નિવાર્યૈવ તૈઃ શરૈઃ ક્રોધસંયુતઃ ।
શતેન તાડયામાસ પતિતઃ સ ધરાતલે ॥ ૪૬॥

તતશ્ચ શઙ્કરઃ ક્રુદ્ધસ્ત્રિશૂલેનાહનદ્ ભૃશમ્ ।
ત્રિશૂલં નિષ્ફલં તત્ર પતિતં ધરણીતલે ॥ ૪૭॥

પાશં દૈત્યપતિઃ ક્ષિપ્ત્વા સહસા શઙ્કરં તતઃ ।
ગૃહીત્વા પશુવત્ કણ્ઠે આનયામાસ સન્નિધૌ ॥ ૪૮॥

ધૃત્વા શમ્ભું મહાબાહુર્વદતિ સ્મ ચ તં મુને ।
અતુલં કિં ત્વયા મેઽદ્ય દત્તં વદ સદાશિવ ॥ ૪૯॥

કર્મણા ત્વં સમર્થશ્ચ તથાહં કર્મણા કિલ ।
જગદીશ્વરતાં પ્રાપ્તો વૃથાહઙ્કારવાનસિ ॥ ૫૦॥

(Page ખં. ૧ અ. ૩૧ પાન ૭૦)
ક્રમેણ વિષ્ણુમુખ્યાશ્ચ દેવાન્ ધૃત્વા મહાબલઃ ।

કૈલાસશિખરે રમ્યે રેમે દૈત્યસમન્વિતઃ ॥ ૫૧॥

સર્વપૂજ્યતમો ભૂત્વા દૈત્યઃ પરમહર્ષિતઃ ।
નાનાકૌતુકયુક્તશ્ચ ભોગાંશ્ચ બુભુજે પરાન્ ॥ ૫૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે શિવાદિપરાજયો નામ ત્રિંશોઽધ્યાયઃ ॥ ૧.૩૦

## ૧.૩૧ દત્તાત્રેયસઙ્ગમો નામૈકત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
શ‍ૃણુ દક્ષ મહાશ્ચર્યં દૈત્યસ્ય ચ વિચેષ્ટિતમ્ ।
બ્રહ્માણ્ડાધિપતિર્જાતો મત્સરઃ કર્મણા સ્વયમ્ ॥ ૧॥

સુન્દરપ્રિયપુત્રં ચ કૈલાસાધિપતિં તતઃ ।
ચક્રે વૈકુણ્ઠનાથં તં પુત્રં સ્વં વિજયપ્રિયમ્ ॥ ૨॥

પ્રહ્લાદં સત્યલોકેશં માહેન્દ્રેશં વિરોચનમ્ ।
એવં ચક્રે ચ રાજેશઃ સ્વર્ગાધીશાન્ સ દૈત્યપાન્ ॥ ૩॥

સ્વયં ભૂમિં સમાગમ્ય નગરં નિર્મમે તતઃ ।
મત્સરાવાસકં નામ તત્રૈવ ન્યવસન્મુદા ॥ ૪॥

ત્રૈલોક્યં વશગં સર્વં ચકાર સ્વેન તેજસા ।
શિવાદયશ્ચ દેવેન્દ્રા ગૃહે તસ્ય સમાસ્થિતાઃ ॥ ૫॥

તાન્ સમાનાય્ય દૈત્યેશો હર્ષયુક્તેન ચેતસા ।
ઉવાચ મધુરં વાક્યં સામયુક્તં મહાસુરઃ ॥ ૬॥

શ‍ૃણુ શમ્ભો મહાભાગ દેવેન્દ્રૈઃ સહ દેવપ ।
યત્રેચ્છા ગચ્છ તત્ર ત્વં મદાજ્ઞાં પાલયન્ સદા ॥ ૭॥

એવમુક્ત્વા સ દૈત્યેન્દ્રો મોચયામાસ શઙ્કરમ્ ।
દેવૈઃ સહ મહાભાગો મત્સરો હર્ષસંયુતઃ ॥ ૮॥

શિવોઽપિ દેવસઙ્ઘાતૈઃ પર્વતદ્રોણિમાશ્રિતઃ ।
ચિન્તાવિષ્ટો મહાદેવઃ કાલં પશ્યંશ્ચ સંસ્થિતઃ ॥ ૯॥

યત્ર તત્ર ગુહાયાં તે દેવા વિષ્ણુપુરોગમાઃ ।

સંસ્થિતા ભયભીતાશ્ચ દિવસાનતિચક્રમુઃ ॥ ૧૦॥

પૃથિવ્યાં દૈત્યરાજેન તતો ધર્મસ્ય ખણ્ડનમ્ ।
કૃતં સર્વત્ર તેનૈવ હાહાકારોઽભવન્ મહાન્ ॥ ૧૧॥

દેવાનાં પ્રતિમા યત્ર તાં ભઙ્ક્ત્વા ચિક્ષિપુર્જલે ।
દૈત્યાસ્તદાજ્ઞયા દક્ષ ધર્મલોપં પ્રચક્રિરે ॥ ૧૨॥

મત્સરસ્ય ચ દૈતેયાઃ પ્રતિમાઃ સર્વભાવતઃ ।
દેશે દેશે પુરે ગ્રામે સ્થાપયામાસુરઞ્જસા ॥ ૧૩॥

ગૃહે ગૃહે ચ દેવાનાં પ્રતિમાં સંસ્થિતાં પરામ્ ।
તાં ભઙ્ક્ત્વા જલમધ્યે તે ચિક્ષિપુશ્ચ પ્રજાપતે ॥ ૧૪॥

મત્સરપ્રતિમાં કૃત્વા પ્રતિગેહં દદુસ્તતઃ ।
દૈત્યાઃ સુદારુણા વિશ્વં ત્રાસયામાસુરેવ ચ ॥ ૧૫॥

બ્રાહ્મણાંશ્ચ સમાનીય તાડયામાસ મત્સરઃ ।
મમૈવ મન્ત્રસૂક્તેન યજ્ઞાદિ ક્રિયતાં દ્વિજાઃ ॥ ૧૬॥

મમ નામ્ના ચ ગાયત્રીં યુક્તાં જપત મા ચિરમ્ ।
અગ્નિહોત્રાદિકં કર્મ કુરુધ્વં મન્મતં તથા ॥ ૧૭॥

અહમેવેશ્વરો દેવો બ્રાહ્મણાદિ જનસ્ય ચ ।
ભજતાં મમ પાદૌ ચ દુર્લભં કિં ભવિષ્યતિ ॥ ૧૮॥

ધનધાન્યાદિકં સર્વં સ્વર્ગભોગાદિસંયુતમ્ ।
દાસ્યામિ નાત્ર સન્દેહો મદધીનં જગત્સદા ॥ ૧૯॥

(Page ખં. ૧ અ. ૩૧ પાન ૭૧)
મમ પ્રીતિકરા યેન દૈત્યા ભોજ્યૈઃ પ્રપૂજિતાઃ ।
તેન સન્તર્પિતો નૂનં વાઞ્છિતં પૂરયામ્યહમ્ ॥ ૨૦॥

એવમાદિ સ સર્વત્ર નાનાધર્મનિકૃન્તનમ્ ।
કારયામાસ દુર્બુદ્ધિર્મત્સરો મત્સરાન્વિતઃ ॥ ૨૧॥

કેચિદૃષિગણા દક્ષ વનં વ્યાઘ્રાદિસંયુતમ્ ।
જગ્મુસ્તત્ર ક્રિયાઃ સર્વાશ્ચક્રુર્ધર્મપરાયણાઃ ॥ ૨૨॥

દેહરક્ષણસક્તાશ્ચ મુનયો ભ્રંશમાગતાઃ ।
સર્વવર્ણપરિભ્રષ્ટા જના જાતાઃ પ્રજાપતે ॥ ૨૩॥

યજનં યાજનં તત્ર સ્વધર્માદિસ્વભાવજમ્ ।
કર્મ સર્વં ન ચક્રુસ્તે જનાસ્તદ્ભયભાવિતાઃ ॥ ૨૪॥

ન સ્વાહા ન સ્વધા કુત્ર ન વષટ્કાર આભવત્ ।
વર્ણસઙ્કરકૃલ્લોકાઃ સ્થિતા ભયસમન્વિતાઃ ॥ ૨૫॥

એવં પાપસ્ય વૃદ્ધિશ્ચ સઞ્જાતા ભયદાયિની ।
તતો દેવગણાઃ સર્વે ઉપોષણનિપીડિતાઃ ॥ ૨૬॥

વિચારં તત્ર ચક્રુસ્તે મત્સરસ્ય વિનાશને ।
ન ચ કિઞ્ચિદ્ભયોદ્વિગ્ના નાશાર્થં શેકુરોજસા ॥ ૨૭॥

એતસ્મિન્નન્તરે તત્ર દત્તાત્રેયઃ સમાયયૌ ।
સાક્ષાદ્ બ્રહ્મમયો યોગી ન્યસ્તસ્વપરવિભ્રમઃ ॥ ૨૮॥

મલિનો જડવલ્લોકે ભ્રમતિ સ્મ પિશાચવત્ ।
ચેષ્ટિતૈશ્ચેષ્ટતે નગ્નો બાલવદ્ દ્વન્દ્વકારકઃ ॥ ૨૯॥

ઉન્મત્તવન્મહાભાગો ભયં નૈવ પ્રવિન્દતિ ।
આત્રેયો ગણરાજસ્ય ભક્તઃ પરમશોભનઃ ॥ ૩૦॥

તં દૃષ્ટ્વા દેવસઙ્ઘાસ્તે સમુત્તસ્થુઃ સુસાદરાઃ ।
પ્રણેમુઃ કાર્યસિધ્યર્થં પૂજયામાસુરઞ્જસા ॥ ૩૧॥

પાદસંવાહનં તસ્ય ચક્રુઃ કેચન ભાવતઃ ।
ફલાદિના ચ નૈવેદ્યમર્પયામાસુરાદરાત્ ॥ ૩૨॥

પપ્રચ્છુર્ભુક્તવન્તં તં વિનયેન સમન્વિતાઃ ।
શમ્ભુવિષ્ણુમુખાઃ સર્વે ભયભીતા મહામુનિમ્ ॥ ૩૩॥

શિવ ઉવાચ ।
સ્વામિંસ્ત્વં દ્વન્દ્વહીનશ્ચ નિત્યમાનન્દભાક્ પરઃ ।
ન્યસ્તસ્વપરભાવશ્ચ તથાઽપિ જનવત્સલઃ ॥ ૩૪॥

ગણેશસ્ય વરો ભક્તઃ સાક્ષાદ્ગણપતિઃ સ્વયમ્ ।
યોગભાવેન સમ્પન્નો યોગી યોગવિદાં વરઃ ॥ ૩૫॥

તથાપિ દુઃખિતાન્ દૃષ્ટ્વા મનસ્તે કલિલં ભવેત્ ।
ઉપાધિહીનભાવેન દુઃખનાશં કરોષિ વૈ ॥ ૩૬॥

અતો વયં મહાભાગ પીડિતા મત્સરેણ વૈ ।
ભ્રષ્ટસ્થાના વને સર્વે ચરામઃ શ્વાપદા ઇવ ॥ ૩૭॥

અત્રાઽપિ ધર્મલોપેન પીડિતા વયમુત્કટમ્ ।
ઉપોષણપરાઃ સ્વામિન્ મરિષ્યામો મહામતે ॥ ૩૮॥

અત્ર તે દર્શનં પ્રાપ્તં પૂર્વપુણ્યબલેન ભોઃ ।
તેન દુઃખવિહીનાશ્ચ ભવિષ્યામો ન સંશયઃ ॥ ૩૯॥

અતો મત્સરદૈત્યસ્ય નાશોપાયં વદ પ્રભો ।
યેન સર્વં જગત્ક્લિષ્ટં તત્ સુખં કુરુ માનદ ॥ ૪૦॥

એકસ્ય દોષયોગેન બહવઃ પીડિતા યદિ ।
અનુપાધિતયા યોગી તં દોષં નાશયિષ્યતિ ॥ ૪૧॥

શક્તશ્ચેત્ સ્વસ્વભાવેન સર્વેભ્યઃ સુખદાયકઃ ।
અતસ્ત્વં રક્ષ યોગીશ જગત્ કૃત્સ્નં વિશેષતઃ ॥ ૪૨॥

મુદ્ગલ ઉવાચ ।
શિવસ્ય વચનં શ્રુત્વા દેવાન્ દીનતમાન્ પરાન્ ।
દૃષ્ટ્વા સ કરુણાયુક્તઃ પ્રત્યુવાચ ચ હર્ષયન્ ॥ ૪૩॥

દત્તાત્રેય ઉવાચ ।
(Page ખં. ૧ અ. ૩૨ પાન ૭૨)
શ૱ૃણુ શમ્ભો જગન્નાથ ત્વં સાક્ષાદીશ્વરઃ શિવઃ ।
તવાધીનમિદં સર્વં ત્વાં બ્રુવે કિં મહામતે ॥ ૪૪॥

તથાપિ વચ્મિ દેવેશ ત્વદાજ્ઞાસમ્પ્રચોદિતઃ ।
યેન ત્વં દેવસંયુક્તઃ સુખં વિન્દસિ શાશ્વતમ્ ॥ ૪૫॥

ત્વદીયે હૃદયે શમ્ભો મત્સરઃ સંસ્થિતોઽધુના ।
ઈશ્વરોઽહમિદં સર્વં મદધીનં પ્રવર્તતે ॥ ૪૬॥

ન મત્સમસ્ત્રિભુવને ઇતિ યન્ મત્સરઃ સ ચ ।
જહિ તં યોગમાર્ગેણ હૃદયસ્થં મહાસુરમ્ ॥ ૪૭॥

શ્રેષ્ઠં દૃષ્ટ્વા મહેર્ષ્યા તે જાયતે યા મહામતે ।
જહિ તાં તપસા શમ્ભો ગણેશસ્ય પ્રસેવયા ॥ ૪૮॥

એકાક્ષરવિધાનેન મયાઽસૌ સેવિતઃ પુરા ।

તેનાઽહં ચ ગણાધીશો ન ભિન્નૌ મયિ તિષ્ઠતઃ ॥ ૪૯॥

અતસ્ત્વં યોગમાર્ગેણ ગણેશં સર્વસિદ્ધિદમ્ ।
એકાક્ષરવિધાનેન તમારાધય યત્નતઃ ॥ ૫૦॥

હૃદિસ્થં મત્સરં હત્વા પશ્ચાત્તં જહિ દાનવમ્ ।
યોગેન ત્વં સમર્થો હિ ભવિતાઽસિ ન સંશયઃ ॥ ૫૧॥

એવમુક્ત્વા મહાદેવં ગતોઽસૌ મુનિસત્તમઃ ।
યદૃચ્છયા ચરન્ સન્ વૈ સેવતે ગણનાયકમ્ ॥ ૫૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે દત્તાત્રેયસઙ્ગમો નામૈકત્રિંશોઽધ્યાયઃ ॥ ૧.૩૧

## ૧.૩૨ વક્રતુણ્ડપ્રાદુર્ભાવો નામ દ્વાત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
શ ृણુ દક્ષ મહાપ્રાજ્ઞ ચેષ્ટિતં પરમં મહત્ ।
યત્કૃતં સર્વદેવૈસ્તત્ કથયામિ સમાસતઃ ॥ ૧॥

ગતે મુનૌ મહાભાગે શિવો હર્ષસમન્વિતઃ ।
ગણેશં હૃદિ સઞ્ચિન્ત્ય બ્રહ્માદીંશ્ચ વચોઽબ્રવીત્ ॥ ૨॥

શ ृણુ વિષ્ણો વિધે દેવાઃ શ ृણુધ્વં સર્વતાપસાઃ ।
ઋષયઃ સંસ્થિતા અત્ર વચનં હિતકારકમ્ ॥ ૩॥

આત્રેયેણ ચ દત્તેનં કથિતં દુઃખનાશનમ્ ।
અત એકાક્ષરેણૈવ પ્રસાદયત વિઘ્નપમ્ ॥ ૪॥

શમ્ભોર્વચનમાકર્ણ્ય મુનયો દેવનાયકાઃ ।
સાધુસાધ્વબ્રુવન્ સર્વે પ્રસન્નાશ્ચ તથાઽભવન્ ॥ ૫॥

તત એકાક્ષરેણૈવ મન્ત્રેણ ગણપં મુને ।
દેવાશ્ચ મુનયઃ સર્વે સેવયામાસુરાદરાત્ ॥ ૬॥

મહોગ્રતપસા યુક્તાઃ સ્થિતાસ્તત્ર શિવાદયઃ ।
આરાધયંસ્તુ દેવેશં ગણેશં સર્વનાયકમ્ ॥ ૭॥

પદ્માસનગતાઃ કેચિદ્વીરાસનગતાઃ પરે ।

સ્વસ્તિકાસન આસીના એવં નાનાસને સ્થિતાઃ ॥ ૮॥

નિરાહારતયા કેચિત્ સ્થિતાસ્તત્ર પ્રજાપતે ।
પત્રવાયુભુજશ્ચાન્યે પ્રાણાયામપરાયણાઃ ॥ ૯॥

જલભક્ષ્યાઃ સ્વપાદાગ્રસ્થિતાઃ કેચિદ્ દૃઢાસનાઃ ।
કેચિન્માનસપૂજાભિઃ પૂજયામાસુરઞ્જસા ॥ ૧૦॥

(Page ખં. ૧ અ. ૩૨ પાન ૭૩)
કેચિત્ પુષ્પોપહારાદ્યૈર્યત્નતઃ સમપૂજયન્ ।
પ્રદક્ષિણાપરાઃ કેચિદેવં નાનાવિધાનતઃ ॥ ૧૧॥

તપન્તો ગણપં ચૈવ મન્ત્રેણ વિધિપૂર્વકમ્ ।
એકચિત્તેન સર્વે તે તોષયામાસુરઞ્જસા ॥ ૧૨॥

એવં વર્ષસહસ્રેણ દિવ્યેન તપસા સ્વયમ્ ।
પ્રસન્નોઽભૂન્ મહાતેજા વક્રતુણ્ડઃ પ્રતાપવાન્ ॥ ૧૩॥

દેવાનાં ચ ઋષીણાં ચ યયૌ ચાગ્રે ગણાધિપમ્ ।
તેજસા પુઞ્જ એવાઽસૌ સાક્ષાદ્ બ્રહ્મમયો બભૌ ॥ ૧૪॥

સિંહગો ગજવક્ત્રશ્ચ શૂર્પકર્ણો મહોદરઃ ।
ચતુર્બાહુશ્ચ પાશેનાઙ્કુશેન વરદેન ચ ॥ ૧૫॥

અભયેન સમાયુક્તો વામાઙ્ગે સિદ્ધિધારકઃ ।
દક્ષિણાઙ્ગે ચ બુદ્ધિં વૈ દધાનો ભગવાન્ પરઃ ॥ ૧૬॥

નાભિશેષો મુકુટવાન્ કુણ્ડલી કટકાન્વિતઃ ।
ચિન્તામણિલસદ્વક્ષા વ્યાલયજ્ઞોપવીતવાન્ ॥ ૧૭॥

નાનાભૂષણશોભાઢ્યસ્તેજસા જ્વલદદ્ભુતઃ ।
પુષ્કરં પુષ્કરે ધૃત્વા ભ્રામયન્ સમુપાયયૌ ॥ ૧૮॥

તં દૃષ્ટ્વા દેવવિપ્રાસ્તે ભયભીતાઃ સમન્તતઃ ।
ઉદિતં કિમિદં તેજઃ પ્રલયાનલસન્નિભમ્ ॥ ૧૯॥

અથવા ગણરાજોઽયં કિં વા સ્વામી સમાગતઃ ।
અથવા પ્રલયો ભાવી અકાલે દૈવનિર્મિતઃ ॥ ૨૦॥

ઇતિ તર્કસમાયુક્તાન્ દેવાન્ મુનિસમન્વિતાન્ ।
ઉવાચ વક્રતુણ્ડસ્તાન્ મેઘગમ્ભીરનિસ્વનઃ ॥ ૨૧॥

વક્રતુણ્ડ ઉવાચ ।
ભો ભો મુનિગણા દેવાઃ સ એવાઽહં સમાગતઃ ।
યં ધ્યાયથ મહાભાગાસ્તં જાનીત ગણેશ્વરમ્ ॥ ૨૨॥

તપસા મન્ત્રરાજેન મમ ધ્યાનેન સર્વશઃ ।
પરિતુષ્ટો વરં દાતુમાગતોઽહં ન સંશયઃ ॥ ૨૩॥

મુદ્ગલ ઉવાચ ।
વક્રતુણ્ડવચઃ શ્રુત્વા હર્ષિતા અમરર્ષયઃ ।
પ્રણેમુઃ પ્રાર્થયામાસુઃ સૌમ્યભાવં પ્રવિહ્વલાઃ ॥ ૨૪॥

તેષાં પ્રાર્થિતમાકર્ણ્ય સૌમ્યતેજા અભૂત્ પ્રભુઃ ।
યથા તં મુનયો દેવા અપશ્યન્ સ્વેન ચક્ષુષા ॥ ૨૫॥

સૌમ્યભાવેન સંયુક્તં વક્રતુણ્ડં સુરેશ્વરાઃ ।
મુનયસ્તં પ્રણમ્યોચુર્ધન્યા ધન્યા વયં પ્રભો ॥ ૨૬॥

અપૂજયન્ પ્રયત્નેન ભાવેન સ્નેહતસ્તથા ।
ઉપચારૈઃ ષડ્દશભિર્યથાવિધિ મહેશ્વરાઃ ॥ ૨૭॥

યથાવિધિ પ્રણમ્યૈવ તુષ્ટુવુઃ કૃતમઙ્ગલાઃ ।
બદ્ધાઞ્જલિપુટાઃ સર્વે ભક્તિનમ્રાત્મકન્ધરાઃ ॥ ૨૮॥

સાશ્રુનેત્રાઃ સરોમાઞ્ચાસ્તદ્દર્શનમહોત્સવાઃ ।
યથાજ્ઞાનં યથાન્યાયં વક્રતુણ્ડં મહૌજસમ્ ॥ ૨૯॥

દેવર્ષય ઊચુઃ ।
નમસ્તે વક્રતુણ્ડાય ગજવક્ત્રાય તે નમઃ ।
એકદન્તાય દેવાય સર્વાધિપતયે નમઃ ॥ ૩૦॥

નિર્ગુણાય નિરૂપાય ચતુર્બાહુધરાય તે ।
સિંહવાહાય નાગાનાં પત્યુર્નાભૌ ધરાય ચ ॥ ૩૧॥

અનન્તાય હ્યપારાય દુર્લક્ષ્યાય નમો નમઃ ।
પાશાઙ્કુશધરાયૈવ નાગયજ્ઞોપવીતિને ॥ ૩૨॥

વરદાભયહસ્તાય સિદ્ધિબુદ્ધિવરાય ચ ।
બ્રહ્મભૂતાય ભક્તાનાં બ્રહ્મભૂયકરાય તે ॥ ૩૩॥

નમસ્તે શમ્ભુરૂપાય વિષ્ણુરૂપાય તે નમઃ ।
સૂર્યરૂપાય ધાત્રે ચ નમઃ શક્તિમયાય ચ ॥ ૩૪॥

દૈત્યદાનવરૂપાય દેવરૂપધરાય ચ ।
નમઃ પક્ષિસ્વરૂપાય શુકરૂપાય તે નમઃ ॥ ૩૫॥

ગ્રહનક્ષત્રરૂપાય લતાવૃક્ષસ્વરૂપિણે ।
(Page ખં. ૧ અ. ૩૨ પાન ૭૪)
પર્વતાય નમસ્તુભ્યં સરિત્સાગરરૂપિણે ॥ ૩૬॥

જલજન્તુસ્વરૂપાય સર્પરૂપાય તે નમઃ ।
વેદાધિકાશીતિલક્ષયોનિસંસ્થાય તે નમઃ ॥ ૩૭॥

ચરાચરમયાયૈવ નમો નાનાપ્રભેદિને ।
કર્માકર્મસ્વરૂપાય નમઃ ખલુ વિકર્મણે ॥ ૩૮॥

જ્ઞાનયોગાય દેવાય સ્વાત્મરૂપધરાય તે ।
સ્વસંવેદ્યસ્વરૂપાય સદા યોગમયાય તે ॥ ૩૯॥

નાનાધારપ્રધારાય શબ્દબ્રહ્મમયાય તે ।
માયારૂપાય માયાયૈ માયાહીનાય તે નમઃ ॥ ૪૦॥

માયિભ્યો મોહદાત્રે ચ સર્વકારાય તે નમઃ ।
સ્થૂલસૂક્ષ્માદિભેદાય ભેદહીનાય તે નમઃ ॥ ૪૧॥

ભેદાભેદમયાયૈવાનન્તપારાય તે નમઃ ।
ભક્તેભ્યો વરદાત્રે ચ ભક્તસંરક્ષકાય તે ॥ ૪૨॥

નમો નમઃ પરેશાયાવ્યયાય ચ નમો નમઃ ।
ગણેશાય નમસ્તુભ્યં યોગાધીશાય તે નમઃ ॥ ૪૩॥

યં સ્તોતું ન સમર્થાશ્ચ વેદાઃ સાઙ્ગાશ્ચ યોગિનઃ ।
તં કિં સ્તુમો ગણેશાનં વક્રતુણ્ડસ્વરૂપિણમ્ ॥ ૪૪॥

માયાદુઃખં ચ સર્વેષાં મનસિ જ્ઞાનકારકમ્ ।
બ્રહ્મ તસ્માત્તથા વક્રં જ્ઞાનહીનં બુધૈઃ સ્મૃતમ્ ॥ ૪૫॥

માયા ચ બ્રહ્મતુણ્ડં યદ્ દ્વયોર્યોગે ભવેત્પરમ્ ।
યોગશાન્તિશ્ચ સર્વેષાં યોગિનાં હૃદિ સંસ્થિતા ॥ ૪૬॥

માયાદેહસ્વરૂપા તે બ્રહ્મ વક્રં સ્મૃતં મુખમ્ ।

ઉભયોર્યોગભાવે ત્વં વક્રતુણ્ડઃ પ્રકથ્યતે ॥ ૪૭॥

તં વક્રતુણ્ડં પશ્યામઃ સાક્ષાદ્ યોગમયં પરમ્ ।
ધન્યા વયં ગણાધ્યક્ષં સ્તુત્વા તં પ્રણતાઃ સ્તવૈઃ ॥ ૪૮॥

ધન્યં જન્મ ત્વક્ષિ ધન્યં ધન્યાઃ સમ્પદ એવ ચ ।
જ્ઞાનં ધન્યં તપશ્ચૈવ યેન દૃષ્ટો ગજાનનઃ ॥ ૪૯॥

પ્રસન્નો યદિ દેવેશ યદિ દેયો વરઃ શુભઃ ।
તદા ત્વદીયપાદાબ્જે ભક્તિરસ્તુ સદા ચ નઃ ॥ ૫૦॥

પ્રાર્થયામો વરં ચૈતં યતસ્ત્વં ચિન્તિતાર્થદઃ ।
મત્સરાસુરનાશં ચ વક્રતુણ્ડ કુરુ પ્રભો ॥ ૫૧॥

જગત્સર્વં વયં ચૈવ પીડિતાસ્તેન વિઘ્નપ ।
સર્વેષામુપકારાર્થં જહિ દૈત્યં મહાબલમ્ ॥ ૫૨॥

સ્તુત્વૈવં પ્રાર્થયિત્વા તં પ્રણતાસ્તે સુરર્ષયઃ ।
તાનુત્થાપ્ય સ્વયં સાક્ષાદ્વક્રતુણ્ડ ઉવાચ હ ॥ ૫૩॥

વક્રતુણ્ડ ઉવાચ ।
ભવત્કૃતમિદં સ્તોત્રં સર્વસિદ્ધિપ્રદં પરમ્ ।
ભવિષ્યતિ મહાભાગા ઈપ્સિતાર્થપ્રદં મહત્ ॥ ૫૪॥

મત્સરાસુરનાશં ચ કરિષ્યામિ સુરર્ષયઃ ।
ભવતાં ભક્તિયોગેન પ્રસન્નઃ પૂર્ણતાં ગતઃ ॥ ૫૫॥

પઞ્ચભૂતમયં સર્વં ત્રિગુણં જગદુચ્યતે ।
અષ્ટાવરણસંયુક્તં બ્રહ્માણ્ડં હિ સુરર્ષયઃ ॥ ૫૬॥

અષ્ટાવરણસંયુક્તા દેવાઃ સર્વે ચ માનવાઃ ।
નાગાશ્ચરાચરં સર્વં તસ્ય તેભ્યો ભયં નહિ ॥ ૫૭॥

અતો મત્સરદૈત્યસ્ય નાશશ્ચ કઠિનો મહાન્ ।
તથાપિ ભવતાં દેવાઃ કરિષ્યામિ પ્રિયં દ્વિજાઃ ॥ ૫૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે વક્રતુણ્ડપ્રાદુર્ભાવો નામ દ્વાત્રિંશોઽધ્યાયઃ ॥ ૧.૩૨
(Page ખં. ૧ અ. ૩૩ પાન ૭૫)

# ૧.૩૩ મત્સરાસુરવિચારણં નામ ત્રયસ્ત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
એવમુક્ત્વા સુરાન્ વિપ્રાન્ સસ્માર બલમુત્કટમ્ ।
તસ્ય સ્મરણમાત્રેણ પ્રાદુર્ભૂતા ગણાઃ પ્રભોઃ ॥ ૧॥

પ્રમોદામોદકાદ્યાશ્ચ વક્રતુણ્ડા ગજાનનાઃ ।
ચતુર્બાહુધરાઃ સર્વે નાનાશસ્ત્રાસ્ત્રપાણયઃ ॥ ૨॥

કેચિત્ સિંહસમારૂઢાઃ કેચિન્મૂષકવાહનાઃ ।
કેચિન્મયૂરમારૂઢાઃ શેષારૂઢાસ્તથાપરે ॥ ૩॥

અશ્વારૂઢાસ્તથાન્યે ચ મુકુટૈઃ સુવિરાજિતાઃ ।
કટકૈઃ કુણ્ડલૈશ્ચૈવ નાનાભૂષણરાજિતાઃ ॥ ૪॥

ભયઙ્કરાશ્ચ શત્રૂણાં ભક્તેભ્યઃ સુખદાયકાઃ ।
મહાત્માનો મહાશબ્દા બ્રહ્માણ્ડસ્ફોટકારકાઃ ॥ ૫॥

નાનાક્રીડાસમાયુક્તાઃ સદા સ્વાનન્દભાવિતાઃ ।
ગણેશનામમાહાત્મ્યં કથયન્તઃ પરસ્પરમ્ ॥ ૬॥

વક્રતુણ્ડં નમસ્કૃત્ય સ્થિતાઃ પ્રાઞ્જલયોઽભવન્ ।
આજ્ઞાં કુરુ ગણાધ્યક્ષ કરવામસ્તવેપ્સિતમ્ ॥ ૭॥

અસ્માકં સ્મરણં દેવ કિમર્થં કૃતમાદરાત્ ।
દાસાન્ ત્વદીયપાદસ્ય કરિષ્યામોઽખિલાન્ જનાન્ ॥ ૮॥

તેષાં વચનમાકર્ણ્ય વક્રતુણ્ડઃ પ્રતાપવાન્ ।
ઉવાચ તાન્ મહાભાગાન્ મેઘગમ્ભીરનિસ્વનઃ ॥ ૯॥

વક્રતુણ્ડ ઉવાચ ।
શ઼ૃણુધ્વં મોદકાદ્યાશ્ચ મત્સરાસુરદૈત્યપમ્ ।
હનિષ્યામિ મહાવીર્યં તેન યુદ્ધં ભવિષ્યતિ ॥ ૧૦॥

અધુના દારુણં તત્ર મયા સહ મહાબલાઃ ।
એતદર્થં વિશેષેણ સ્મરણં ભવતાં કૃતમ્ ॥ ૧૧॥

વક્રતુણ્ડવચઃ શ્રુત્વા સર્વે હર્ષસમન્વિતાઃ ।
ગણા ઊચુઃ પ્રણમ્યૈનં નિબદ્ધકરસમ્પુટાઃ ॥ ૧૨॥

ગણા ઊચુઃ ।
સ્વામિન્ વદસિ યત્સર્વં તદાશ્ચર્યમયં બહુ ।
મત્સરાસુરનાશશ્ચ એકેન ક્રિયતેઽધુના ॥ ૧૩॥

ત્વત્પ્રસાદાત્ સદા સર્વં સુલભં નો ગણાધિપ ।
આજ્ઞાં કુરુ મહાભાગ પશ્ય ચૈકસ્ય પૌરુષમ્ ॥ ૧૪॥

ગણાનાં તદ્વચો રમ્યં શ્રુત્વા પ્રાહ ગણાધિપઃ ।
વક્રતુણ્ડઃ પ્રસન્નાત્મા હર્ષયન્ સકલાનિવ ॥ ૧૫॥

વક્રતુણ્ડ ઉવાચ ।
ભવદ્ભિઃ કથિતં સર્વં તત્તથા ન તદન્યથા ।
ક્રીડાર્થં નિર્મિતો દૈત્યો મયા માયાપ્રભાવતઃ ॥ ૧૬॥

યદિ ક્ષણેન તં દૈત્યં નાશયામિ પ્રભાવતઃ ।
તદા ક્રીડા કથં દેવા મયા પ્રક્રિયતે પરા ॥ ૧૭॥

અતસ્તેન મહાભાગા યુધ્યધ્વં મમ સન્નિધૌ ।
અષ્ટાવરણહીનેન હન્મિ રૂપેણ તં ક્ષણાત્ ॥ ૧૮॥

ઇતિ તસ્ય વચઃ શ્રુત્વા ગણા હર્ષસમન્વિતાઃ ।
જગર્જુર્નાદયન્તસ્તે દિશો વિદિશ એવ ચ ॥ ૧૯॥

તદ્ દૃષ્ટ્વા પરમાશ્ચર્યં વિસ્મિતાસ્તે સુરર્ષયઃ ।
હર્ષેણ મહતા યુક્તા મેનિરે મત્સરં હતમ્ ॥ ૨૦॥

તતઃ સર્વાન્ સમાદાય ગણાન્ દેવાન્ મુનીનપિ ।
વક્રતુણ્ડો યયૌ તાં ચ પુરીમીર્ષ્યાહ્વયાં પરામ્ ॥ ૨૧॥

યત્ર રાજ્યં ચ કુરુતે મત્સરઃ સ પ્રતાપવાન્ ।
બ્રહ્માણ્ડસ્ય મહાવીરો નાનાભોગસમન્વિતઃ ॥ ૨૨॥

દેવાઙ્ગનાપરિવૃતઃ સદા તિષ્ઠતિ દૈત્યપઃ ।
મદ્યાદિપાનસંયુક્તો નાનાવીરપાલિતઃ ॥ ૨૩॥

યદ્યન્મનસિ તેનાપિ ચિન્તિતં સફલં સદા ।
તત્તદ્ભવતિ સર્વં સ્મ તપસા વરદાનતઃ ॥ ૨૪॥

(Page ખં. ૧ અ. ૩૩ પાન ૭૬)

ન બુબોધ ગતં કાલં કાલેનેવ ચ વઞ્ચિતઃ ।
ધન્યોઽહમ્મન્યમાનો ન મત્સમો માનસેઽપરઃ ॥ ૨૫॥

એકસ્મિન્ દિવસે તત્ર સભાયાં સંસ્થિતોઽભવત્ ।
વીરૈઃ પરિવૃતો નાના નૃત્યં પશ્યન્ વિનોદતઃ ॥ ૨૬॥

તત્રાકાશાત્તદા વાણી બભૂવ ભયદાયિકા ।
આગતો મત્સરં હન્તું વક્રતુણ્ડો મહાબલઃ ॥ ૨૭॥

શ્રુત્વાઽઽકાશભવાં વાણીં મૂર્ચ્છિતો મત્સરાસુરઃ ।
પતિતઃ શુષ્કકણ્ઠશ્ચ કમ્પમાનાઙ્ગવિહ્વલઃ ॥ ૨૮॥

તં તથા પતિતં દૃષ્ટ્વાઽસુરાઃ સર્વે ભયાતુરાઃ ।
કેનોક્તં પરુષં વાક્યં હન્મસ્તં ત્વદ્ય નિશ્ચિતમ્ ॥ ૨૯॥

તતઃ કેચિન્નભોમાર્ગે બભ્રમુર્યત્ર તત્ર તે ।
દદૃશુસ્તં ન તત્રાપિ સભાયાં પુનરાયયુઃ ॥ ૩૦॥

સર્વૈઃ કૃતઃ સ દૈત્યેશઃ સાવધાનો યથા પુરા ।
ઉપવિષ્ટઃ સભામધ્યે હૃદયેન વિદૂયતા ॥ ૩૧॥

ઉવાચ હિ સ્વતો વાચં મત્સરો ભયવિહ્વલઃ ।
વચનં કિમિદં સત્યમનૃતં વા ભવિષ્યતિ ॥ ૩૨॥

કાલસ્ય કાલરૂપોઽહં મમ મૃત્યુઃ કથં ભવેત્ ।
અસત્યા નભસો વાણી ન જ્ઞાતા ન શ્રુતાઽપિ ચ ॥ ૩૩॥

અષ્ટાવરણસંયુક્તં બ્રહ્માણ્ડં સર્વમઞ્જસા ।
અષ્ટાવરણયુક્તેભ્યો મમ મૃત્યુર્ન જાયતે ॥ ૩૪॥

કોઽસૌ વક્રાનનો જન્તુઃ કથિતઃ કુત્ર વર્તતે ।
તં હનિષ્યામિ દૃશ્યશ્ચેત્ ક્ષણમાત્રાન્ન સંશયઃ ॥ ૩૫॥

ઇતિ શ્રુત્વા વચસ્તસ્ય મત્સરસ્ય દુરાત્મનઃ ।
ઊચુઃ પ્રહ્લાદમુખ્યાસ્તં વિનયેન સમન્વિતાઃ ॥ ૩૬॥

પ્રલ્હાદાદય ઊચુઃ ।
મા કુરુષ્વ મહાભાગ ચિન્તાં શત્રુનિષૂદન ।
તવ મૃત્યુઃ કથં ભાવી પશ્ચાત્ સૂર્યોદયઃ કથમ્ ॥ ૩૭॥

અસ્માકં શત્રુભાવેન સ્થિતા દેવાઃ સહેશ્વરાઃ ।

જિતાસ્તદપિ સર્વે તે છિદ્રદર્શિન એવ ચ ॥ ૩૮॥

તૈશ્ચ માયા કૃતા ચ સ્યાદીદૃશી વાઽસુરોત્તમ ।
અન્યથા તે મહામૃત્યુઃ કથં ભવતિ માનદ ॥ ૩૯॥

નેયમાકાશવાણી ભોસ્તસ્માદ્દેવાન્ સહેશ્વરાન્ ।
હનિષ્યામોઽદ્ય દૈત્યેશ શત્રુહીનાસ્તદા વયમ્ ॥ ૪૦॥

તેષાં વચનમાકર્ણ્ય મત્સરશ્ચૈવ હર્ષિતઃ ।
સત્યમુક્તં ભવદ્ભિર્યદ્ધન્તવ્યં વિદ્વિષાં વધે ॥ ૪૧॥

મત્સરાજ્ઞાં સમાદાય નિઃસૃતા દૈત્યપુઙ્ગવાઃ ।
વિચિન્વન્તિ સ્મ સર્વત્ર દેવાન્ સર્વાન્ પ્રયત્નતઃ ॥ ૪૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે મત્સરાસુરવિચારણં નામ ત્રયસ્ત્રિંશોઽધ્યાયઃ ॥ ૧.૩૩
(Page ખં. ૧ અ. ૩૪ પાન ૭૭)

## ૧.૩૪ દેવાસુરયુદ્ધપ્રસઙ્ગો નામ ચતુસ્ત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
દૈત્યા ભ્રમણયુક્તાસ્તે આયયુર્ઢુણ્ઢિસન્નિધૌ ।
યત્ર દેવગણૈર્યુક્તો વક્રતુણ્ડઃ પ્રતાપવાન્ ॥ ૧॥

દૃષ્ટ્વા તં વક્રતુણ્ડં તે ભયભીતાસ્તદાઽભવન્ ।
મહાકાયં મહાવીર્યં નરનાગસ્વરૂપિણમ્ ॥ ૨॥

નાનાવીરૈઃ પરિવૃતં પ્રલયાગ્નિસમૈઃ પરૈઃ ।
દેવૈર્હર્ષસમાયુક્તૈઃ સંસ્તુતં ભક્તિભાવિતૈઃ ॥ ૩॥

મનસા દૈત્યપાઃ સર્વે મેનિરે મૃત્યુમાત્મનઃ ।
સત્યાકાશભવા વાણી સોઽયં વક્રાનનો ભવેત્ ॥ ૪॥

વક્રતુણ્ડ જય ત્વં વૈ જય ત્વં જય સર્વદા ।
દેવૈઃ પ્રકથ્યતે તસ્માદ્વક્રતુણ્ડોઽયમાગતઃ ॥ ૫॥

યદિ યુદ્ધં કરિષ્યામોઽનેન સાર્ધં મહાદ્ભુતમ્ ।
યુદ્ધે વયં મૃતાશ્ચેદ્વા વૃત્તાન્તં કો નિવેદયેત્ ॥ ૬॥

અતો મત્સરદૈત્યેશં ગમિષ્યામો જવાન્વિતાઃ ।
એવં નિશ્ચયયુક્તાસ્તે મત્સરં જગ્મુરાદરાત્ ॥ ૭॥

સ દેવો વક્રતુણ્ડસ્તુ દૂરતઃ પઞ્ચયોજનમ્ ।
ઈર્ષ્યાપૂરં પરિત્યજ્ય સ્થિતઃ કૃત્વા સભાં પ્રભુઃ ॥ ૮॥

દૈત્યાસ્તે મત્સરં ગત્વા વૃત્તાન્તં તં ન્યવેદયન્ ।
ભોરાજન્ સત્યમેવેદં વચનં ખસમુદ્ભવમ્ ॥ ૯॥

નરકુઞ્જરરૂપેણ દૃષ્ટો વક્રાનનઃ પ્રભુઃ ।
દેવૈઃ સમાવૃતો ભૂપ વિચારં કુરુ સર્વથા ॥ ૧૦॥

તેષાં વચનમાકર્ણ્ય મત્સરશ્ચિન્તયાન્વિતઃ ।
બભૂવ મ્લાનતુણ્ડશ્ચ જ્ઞાત્વા શત્રું મહાબલમ્ ॥ ૧૧॥

તતઃ ક્રોધસમાવિષ્ટસ્તં હન્તું કૃતવાન્ મનઃ ।
આજ્ઞાપયત્ સ દૈત્યેન્દ્રાન્ સજ્જિતા ભો ભવન્ત્વિતિ ॥ ૧૨॥

ગમિષ્યામિ રિપું હન્તું વક્રતુણ્ડં મહાબલમ્ ।
સદેવં સપરીવારં તતો હૃદિ સુખં ભવેત્ ॥ ૧૩॥

આજ્ઞામાત્રેણ દૈત્યેશાઃ સન્નદ્ધાઃ સમુપાયયુઃ ।
હર્ષેણ મહતા યુક્તા દેવમર્દનલાલસાઃ ॥ ૧૪॥

ચતુરઙ્ગં મહત્સૈન્યં નિઃસૃતં નગરાદ્બહિઃ ।
તન્મધ્યે મત્સરો વીરઃ શુશુભે રથસઙ્ગતઃ ॥ ૧૫॥

આગતાસ્તે ત્વરાભાજો વક્રતુણ્ડઃ સ્થિતો યતઃ ।
તાન્ દૃષ્ટ્વા દેવસઙ્ઘાસ્તં શશંસુર્ગણનાયકમ્ ॥ ૧૬॥

સ્વામિન્ સમાગતો દૈત્યઃ સ્વયમેવ મહાપ્રભો ।
યત્કરિષ્યસિ દેવસ્ત્વં ત્વરયા તત્ કુરુ પ્રભો ॥ ૧૭॥

અસ્માન્નોચેચ્ચ દૈતેયા હનિષ્યન્તિ મહાબલાઃ ।
મરણં પ્રાપ્તમસ્માભિઃ કુત્ર સ્થાતું ન શક્યતે ॥ ૧૮॥

દેવાનાં વક્રતુણ્ડશ્ચ શ્રુત્વા વચનમાદરાત્ ।
ઉવાચ વિસ્મિતો ભૂત્વા મા ભયં કુરુત પ્રિયાઃ ॥ ૧૯॥

સ દૈત્યં મત્સરં દેવા હનિષ્યામિ ન સંશયઃ ।
પશ્યન્તુ કૌતુકં યુદ્ધે મદીયં પરમાદ્ભુતમ્ ॥ ૨૦॥

ઇત્યુક્ત્વા વક્રતુણ્ડઃ સ સિંહારૂઢોઽભવત્પ્રભુઃ ।
પાશાઙ્કુશકરો ગર્જન્મેઘનાદસમસ્વનઃ ॥ ૨૧॥

તસ્ય શબ્દેન સન્ત્રસ્તં ત્રૈલોક્યં સચરાચરમ્ ।
ભયભીતા દૈત્યગણા બભૂવુશ્ચ પ્રજાપતે ॥ ૨૨॥

મત્સરો હૃદિ સન્ત્રસ્તો વચનં ચેદમબ્રવીત્ ।
દૃશ્યતે પ્રબલા સેના કિં ભવિષ્યતિ દૈત્યપાઃ ॥ ૨૩॥

ભયયુક્તં વચસ્તસ્ય શ્રુત્વા તં દૈત્યપા જગુઃ ।
વયં યોત્સ્યામહે સ્વામિન્ પશ્ય ત્વં યુદ્ધજં મહઃ ॥ ૨૪॥

ઇત્યુક્ત્વા મત્સરં સર્વે પ્રહ્લાદપ્રમુખાઃ સુરાઃ ।
વક્રતુણ્ડં યયુર્વીરા નાદયન્તસ્ત્રિવિષ્ટપમ્ ॥ ૨૫॥

(Page ખં. ૧ અ. ૩૪ પાન ૭૮)
બાણવૃષ્ટિં મહોગ્રાં તે ચક્રુઃ ક્રોધસમન્વિતાઃ ।
વવર્ષુરસ્ત્રશસ્ત્રાણિ વર્ષાકાલે ઘના ઇવ ॥ ૨૬॥

તૈરસ્ત્રૈર્દૈત્યરાજૈશ્ચ હતા સેના દિવૌકસામ્ ।
દેવા વિષ્ણુમુખાસ્તત્ર યુયુધુસ્તાન સમાગતાન્ ॥ ૨૭॥

ઘોરયુદ્ધં તતસ્તેષાં દેવાસુરવિનાશનમ્ ।
અભવદ્દારુણં ક્રૂરં દ્રષ્ટું નૈવ પ્રશક્યતે ॥ ૨૮॥

દેવાશ્ચ દાનવાશ્ચૈવ યુયુધુઃ શસ્ત્રપાણયઃ ।
મરણે નિશ્ચયં કૃત્વા પરસ્પરજયેપ્સવઃ ॥ ૨૯॥

કેચિદ્બાણમયીં વૃષ્ટિં ચક્રુઃ શક્તીસ્તુ કેચન ।
ચિક્ષિપુર્ભિન્દિપાલાંશ્ચ ખડ્ગૈર્વે ચિચ્છિદુઃ પરે ॥ ૩૦॥

બબન્ધુરપરે પાશૈર્ભલ્લૈર્વા વિવ્યધુઃ પરે ।
ગદાયુદ્ધં મહાઘોરં ચક્રિરે વીરસત્તમાઃ ॥ ૩૧॥

મુદ્ગરૈશ્ચ મહાવીરા મારયામાસુરોજસા ।
મલ્લયુદ્ધં પરે ચક્રુર્નાદયન્તો દિશો દશ ॥ ૩૨॥

સૈન્યસ્ય રજસા સર્વં વ્યાપ્તમાસીદ્ દિગન્તરમ્ ।
નાભૂત્ સ્વપરબોધોઽપિ પુરોગાન્ જઘ્નિરે તદા ॥ ૩૩॥

શસ્ત્રૈઃ શસ્ત્રાણિ સંવાર્ય તથાસ્ત્રૈરસ્ત્રસઞ્ચયમ્ ।
બાણૈર્બાણાન્ સમારુષ્ટાશ્ચિચ્છિદુસ્તે પરસ્પરમ્ ॥ ૩૪॥

શસ્ત્રે ભગ્ને ચ તે વીરા મલ્લયુદ્ધં સુદારુણમ્ ।
ચક્રિરે ક્રોધસંયુક્તા મણ્ડલાનિ પ્રબભ્રમુઃ ॥ ૩૫॥

હસ્તેન હસ્તમાપીડ્ય પાદૈઃ પાદાન્ પ્રગૃહ્ય ચ ।
કૂર્પરં કૂપરેણૈવ મર્દયામાસુરોજસા ॥ ૩૬॥

મસ્તકં મસ્તકેનૈવ જાનુભ્યાં જાનુની તથા ।
લલાટેન લલાટં ચ સ્ફાલયામાસુરઞ્જસા ॥ ૩૭॥

એવં યુદ્ધે પ્રવૃત્તે વૈ મૃતાઃ કૈચિત્તુ મૂર્ચ્છિતાઃ ।
ભગ્નાઃ કેઽપિ ક્ષતા અન્યે નાનાશસ્ત્રપ્રહારતઃ ॥ ૩૮॥

શોણિતૌઘવહા ઘોરા નદી જાતા દુરત્યયા ।
રક્તેન સર્વતસ્તત્ર રેણવો મજ્જિતાસ્તતઃ ॥ ૩૯॥

તેન પ્રકાશિતાસ્તત્ર દિશઃ સ્વપરબોધિકાઃ ।
તતોઽભૂત્તુમુલં યુદ્ધં યથાયોગ્યં પ્રજાપતે ॥ ૪૦॥

રથિનો રથિભિઃ સાર્ધં ગજિનો ગજિભિસ્તથા ।
અશ્વારૂઢા હયારૂઢૈઃ પદાતાશ્ચ પદાતિભિઃ ॥ ૪૧॥

શ્રેષ્ઠા યુયુધિરે શ્રેષ્ઠૈર્મહાબલસમન્વિતૈઃ ।
પ્રબોધ્ય જઘ્નિરે કેચિદ્વીરાઃ સમરશાલિનઃ ॥ ૪૨॥

પરસ્પરમભિન્દંસ્તે શસ્ત્રાસ્ત્રૈર્મર્મભેદિભિઃ ।
સર્વે શુશુભિરે ચૈવ પુષ્પિતાઃ કિંશુકા ઇવ ॥ ૪૩॥

કદાચિજ્જયિનો દેવાઃ કદાચિદ્દાનવાસ્તથા ।
ન રાત્રૌ વિશ્રમં ચક્રુઃ ક્રોધયુક્તાઃ પરસ્પરમ્ ॥ ૪૪॥

એવં પઞ્ચદિનં યુદ્ધમભવત્તત્ર દારુણમ્ ।
ન જયં પ્રાપ્નુયુર્દેવા દૈત્યાચાઽપિ પ્રજાપતે ॥ ૪૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે દેવાસુરયુદ્ધપ્રસઙ્ગો નામ ચતુસ્ત્રિંશોઽધ્યાયઃ ॥ ૧.૩૪
(Page ખં. ૧ અ. ૩૫ પાન ૭૯)

## ૧.૩૫ શિવવિજયો નામ પઞ્ચત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
એવં પરસ્પરં ઘોરં યુદ્ધં કૃત્વા મહાબલાઃ ।
ન જયં પ્રાપ્નુવન્તિ સ્મ કર્મ ચૈવ યથાસુરમ્ ॥ ૧॥

તં દૃષ્ટ્વા પરમાશ્ચર્યં પ્રહ્લાદઃ કુપિતોઽભવત્ ।
ધનુઃ સજ્જં મહાઘોરં કૃત્વા બાણાન્ સમાદદે ॥ ૨॥

મન્ત્રયન્નનલાસ્ત્રેણ ચિક્ષેપ સ શરાન્ બહૂન્ ।
તેભ્યો જાતો મહાનગ્નિઃ પ્રલયાનલસન્નિભઃ ॥ ૩॥

દદાહ દેવસેનાં સ પ્રહ્લાદોઽસુરસત્તમઃ ।
ભયભીતાઃ સુરાઃ સર્વે જજ્વલુશ્ચ સમન્તતઃ ॥ ૪॥

હાહાકારં પ્રકુર્વન્તો દગ્ધાસ્તે જાતવેદસા ।
મર્યાદાં રણભૂમિં ચ તથા ત્યક્ત્વા પલાયિતાઃ ॥ ૫॥

મહાગ્નિઃ સર્વતસ્તાન્ વૈ સુરાન્ વાહનસંયુતાન્ ।
પ્રબલો દાહયામાસ પ્રહ્લાદેન પ્રચોદિતઃ ॥ ૬॥

તેન દૈત્યગણાઃ સર્વે હર્ષયુક્તા બભૂવિરે ।
પ્રહ્લાદં પૂજયન્તસ્તે સાધુ સાધુ કૃતં ત્વયા ॥ ૭॥

સર્વાન્ પલાયમાનાન્ સ સુરાન્ દૃષ્ટ્વા પુરન્દરઃ ।
મેઘાસ્ત્રં યોજયામાસ ધનુષિ ક્રોધસંયુતઃ ॥ ૮॥

એતસ્મિન્નન્તરે તત્ર પ્રહ્લાદઃ સમુપાગતઃ ।
ખડ્ગેન સહસેન્દ્રસ્ય ધનુશ્ચિચ્છેદ લાઘવાત્ ॥ ૯॥

તત ઇન્દ્રઃ પ્રકોપેન વજ્રં તત્યાજ તં પ્રતિ ।
વજ્રેણ નિહતો ભૂમૌ પ્રહ્લાદઃ સ પપાત હ ॥ ૧૦॥

પતિતં તં તથા દૃષ્ટ્વા મહિષાસુર આગતઃ ।
ગદયા દેવરાજં તં જઘાન ખલુ મસ્તકે ॥ ૧૧॥

ગદયા નિહતઃ સોઽપિ પપાત રણમૂર્ધનિ ।
મઘવા મૂર્ચ્છિતોઽત્યન્તં મુખાદ્રક્તં સમુદ્ગમન્ ॥ ૧૨॥

તતોઽગ્નિઃ પરમક્રુદ્ધો જજ્વાલ જ્વાલયાસુરમ્ ।
મહિષો જલરૂપોઽભૂત્ પ્લાવયામાસ તં ક્ષણાત્ ॥ ૧૩॥

નિસ્તેજાશ્ચિન્તયા યુક્તાઃ શક્તિં ચિક્ષેપ પાવકઃ ।
તાં ખડ્ગેન મહાદૈત્યઃ પાતયામાસ ભૂતલે ॥ ૧૪॥

તતો મહિષરૂપેણ શ‍ृઙ્ગાભ્યાં દહનં પુનઃ ।
ચકાર મૂર્ચ્છિતં ક્રુદ્ધઃ પપાત મહસાં નિધિઃ ॥ ૧૫॥

તતો યયૌ યમસ્તં વૈ દણ્ડઘાતેન સોઽહનત્ ।
જક્રે સમ્મૂર્ચ્છિતં દૈત્યં મહિષં ભયદાયકમ્ ॥ ૧૬॥

એતસ્મિન્નન્તરે તત્ર પ્રતાપી ચ વિરોચનઃ ।
ખડ્ગેન તં જઘાનાશુ યમં સર્વભયઙ્કરમ્ ॥ ૧૭॥

પપાત ખડ્ગાઘાતેન યમો યમવતાં પ્રભુઃ ।
વરુણસ્તં બબન્ધાપિ પાશેન ચ વિરોચનમ્ ॥ ૧૮॥

તતસ્તં મોચયામાસ પાશં છિત્વા મહાબલઃ ।
અન્ધકઃ ખડ્ગાઘાતેન ગદયા વરુણં તથા ॥ ૧૯॥

મૂર્ચ્છિતં ચ ચકારાઽભૂદુત્થિતઃ સ વિરોચનઃ ।
તતો વાયુઃ કુબેરશ્ચ તાવુભૌ ક્રોધમૂચ્છિતૌ ॥ ૨૦॥

વાયુના ખડ્ગઘાતેન મૂર્ચ્છિતસ્ત્વમિતૌજસા ।
અન્ધકાસુરનામાઽસૌ પપાત ધરણીતલે ॥ ૨૧॥

શમ્બરેણ હતો વાયુર્મુસલેન મહાબલઃ ।
સ પપાત તદા ભૂમૌ દેવઃ સર્વધરોઽપિ સન્ ॥ ૨૨॥

વિરોચનેને બાણૌઘૈસ્તાડિતો ધનરક્ષકઃ ।
મર્મભેદિભિરત્યુગ્રૈઃ પપાતાઽસૌ મહાબલઃ ॥ ૨૩॥

એતસ્મિન્નન્તરે તત્ર વિષ્ણુઃ સ્વયમુપાગતઃ ।
ગદયા તં જઘાનૈવ વિરોચનમથો રિપુમ્ ॥ ૨૪॥

ભિન્નોરસં ચ દૈત્યેશં મૃતતુલ્યં ચકાર હ ।
અન્ધકં ચક્રઘાતેન પાતયામાસ કેશવઃ ॥ ૨૫॥

(Page ખં. ૧ અ. ૩૫ પાન ૮૦)
શમ્બરં બાણજાલૈઃ સમ્પાતયામાસ ભૂતલે ।

કુપિતો માધવસ્તત્ર ચક્રં તત્યાજ દારુણમ્ ॥ ૨૬॥

ચક્રેણ ક્ષુરધારેણ હતા દૈત્યાઃ સહસ્રશઃ ।
ગદયા મૂર્ચ્છિતાઃ કેચિન્ મુખ્યા યે તત્ર સંસ્થિતાઃ ॥ ૨૭॥

એતસ્મિન્ સમરે વીરઃ પ્રહ્લાદઃ સમ્બભૂવ હ ।
સાવધાનો મહાભાગસ્તં યયૌ ક્રોધદીપિતઃ ॥ ૨૮॥

બાણવૃષ્ટિં ચકારાઽસૌ મહોગ્રાં દેવનાશિનીમ્ ।
તયા તાંશ્છિન્નભિન્નાઙ્ગાન્ દેવાંશ્ચક્રે ધરાતલે ॥ ૨૯॥

ગદયા દેવદેવેશં કેશવં યુયુધે ભૃશમ્ ।
ખડ્ગેન મૂર્ચ્છિતં ચક્રે ગરુડં દૈત્યનાયકઃ ॥ ૩૦॥

તતશ્ચ કુપિતો વિષ્ણુસ્તં હન્તું ચક્રમાદદે ।
બહુધા ભ્રામયામાસ તત્ત્યાજ હ્યસ્ત્રમુત્તમમ્ ॥ ૩૧॥

તન્મસ્તકાનિ દૈત્યાનાં ચક્રં ચિચ્છેદ સર્વતઃ ।
બાહૂદરભુજાંશ્ચૈવ ચકાર શકલીકૃતાન્ ॥ ૩૨॥

સહસાઽસુરરાજં ચ પ્રહ્લાદં હન્તુમાયયૌ ।
ચક્રં તેજોમયં દિવ્યં સમીપે જ્વલનપ્રભમ્ ॥ ૩૩॥

પ્રહ્લાદસ્ત્વરયાસ્ત્રં ચ મહાધનુષિ સન્દધે ।
નારાયણાત્મકં ચૈવ હૃદિ સ્મૃત્વા જનાર્દનમ્ ॥ ૩૪॥

મુમોચ તન્ મહાસ્ત્રં વૈ તેજોરૂપમમોઘકમ્ ।
અનિવાર્યં જગદ્ભસ્મકારકં કુપિતઃ પરઃ ॥ ૩૫॥

નારાયણાસ્ત્રવેગેન ચક્રં પ્રતિહતં તતઃ ।
દેવાન્ સર્વાન્ દદાહાપિ મહાસ્ત્રં સર્વતઃ પરમ્ ॥ ૩૬॥

હૃદયે સહસાગત્ય પતિતં કેશવસ્ય તત્ ।
મૂર્ચ્છિતં મૃતતુલ્યં તં ચકાર ચ જનાર્દનમ્ ॥ ૩૭॥

તતો મદયુતા દૈત્યા જગર્જુર્હર્ષસંયુતાઃ ।
પ્રશશંસુર્મહાભાગં પ્રહ્લાદં તેજસાન્વિતમ્ ॥ ૩૮॥

નારાયણાસ્ત્રસન્દગ્ધાન્ દેવર્ષીન્ વીક્ષ્ય શઙ્કરઃ ।
ક્ષુભિતો દેવરક્ષાર્થં પિનાકં સ્વકરે દધૌ ॥ ૩૯॥

મહાસ્ત્રં તત્ પાશુપતં સન્દધે ક્રોધસંયુતઃ ।
બલેન મોચયામાસ ત્વરાવાન્ શઙ્કરોઽભવન્ ॥ ૪૦॥

મહાસ્ત્રં વૈ પાશુપતં તથા નારાયણાત્મકમ્ ।
ઉભે અસ્ત્રે સંયુગે તે યુયુધાતે વિહાયસિ ॥ ૪૧॥

દેવા મુનિગણાસ્તત્ર હર્ષયુક્તા બભૂવિરે ।
પ્રશશંસુર્મહાદેવં દેવદેવં ચ શઙ્કરમ્ ॥ ૪૨॥

તતઃ પશુપતિઃ ક્રુદ્ધસ્ત્રિશૂલં સન્દધે મુને ।
તત્યાજ દૈત્યસેનાયાં કુર્વાણં પ્રલયં પરમ્ ॥ ૪૩॥

ત્રિશૂલં ચ કરોતિ સ્મ મૃતાન્ દૈત્યાન્ સહસ્રશઃ ।
પ્રહ્લાદહૃદયેકસ્માત્ પપાત યમસન્નિભમ્ ॥ ૪૪॥

તેનાઽસૌ પતિતો ભૂમૌ વાતાહત ઇવ દ્રુમઃ ।
દૈત્યસૈન્યે મહાનાસીત્તદા કોલાહલઃ પરઃ ॥ ૪૫॥

તતસ્ત્રિશૂલવેગેન શિતેન સહસાઽસુરાઃ ।
મૂર્ચ્છિતાશ્ચ કૃતાઃ કેચિત્ કેચિદ્વૈ મારિતા મુને ॥ ૪૬॥

સર્વેઽસુરગણાસ્તત્ર પતિતા રણમૂર્ધનિ ।
તતો મત્સરપુત્રૌ દ્વૌ શઙ્કરં જગ્મતુઃ પ્રભો ॥ ૪૭॥

સુન્દરપ્રિયનામા ચ વિષયપ્રિય એવ યઃ ।
ઊચતુઃ શઙ્કરં તત્ર ક્રોધયુક્તૌ મહાસુરૌ ॥ ૪૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે શિવવિજયો નામ પઞ્ચત્રિંશોઽધ્યાયઃ ॥ ૧.૩૫
(Page ખં. ૧ અ. ૩૬ પાન ૮૧)

## ૧.૩૬ સુન્દરપ્રિયવિષયપ્રિયવધો નામ ષટ્ત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
વદ બ્રહ્મન્વિશેષેણ મમ હર્ષકરીં કથામ્ ।
વિસ્તરેણ મહાભાગ વક્રતુણ્ડપ્રભાવજામ્ ॥ ૧॥

મુદ્ગલ ઉવાચ ।

ન શક્યતેઽગ્નિપુત્રેણ વિસ્તરેણ પિનાકિના ।
શેષેણ વિધિના વક્તું સઙ્ક્ષેપેણ બ્રવીમ્યતઃ ॥ ૨॥

દક્ષ ઉવાચ ।
કિમુક્તં દૈત્યપુત્રાભ્યાં શઙ્કરેણ શ્રુતં વદ ।
શ્રુત્વા તત્ કિં કૃતં તેન મહાદેવેન માનદ ॥ ૩॥

દૈત્યાભ્યાં કિં કૃતં તત્ર તદ્વદ ત્વં વિશેષતઃ ।
શ્રુત્વા ત્વદ્વદનામ્ભોજાત્ કથાં તૃપ્યામ્યહં ન ચ ॥ ૪॥

સૂત ઉવાચ ।
એવમાદરમાજ્ઞાય દક્ષસ્ય પ્રયતાત્મનઃ ।
મુદ્ગલસ્તમુવાચાથ હર્ષયુક્તઃ સ શૌનક ॥ ૫॥

મુદ્ગલ ઉવાચ ।
દૈત્યપુત્રૌ મહાવીર્યૌ શઙ્કરં ક્રોધસંયુતૌ ।
યદૂચતુશ્ચ તત્સર્વં શ◌ૃણુ દક્ષ પ્રજાપતે ॥ ૬॥

મત્સરપુત્રાવૂચતુઃ ।
તિષ્ઠ તિષ્ઠ મહાદેવ પશ્ય પૌરુષમાવયોઃ ।
જ્ઞાતં ત્વદીયં સામર્થ્યં ન ચ ગન્તું ત્વમર્હસિ ॥ ૭॥

અસ્મદીયા મહાસેના હતા સર્વા સદાશિવ ।
દૈત્યેન્દ્રાઃ પાતિતાઃ સર્વે ત્વયા શઙ્કર તેજસા ॥ ૮॥

પૌરુષં દર્શિતં પૂર્ણં સર્વદેવાતિગં મહત્ ।
અધુના ત્વાં હનિષ્યાવો વક્રતુણ્ડસ્ય પશ્યતઃ ॥ ૯॥

ત્વાં હત્વા વક્રતુણ્ડં ચ હનિષ્યાવો ન સંશયઃ ।
પશ્ચાત્ સર્વાન્ સુરેન્દ્રાંશ્ચ તતો મુનિગણાન્ સુરાન્ ॥ ૧૦॥

એવમુક્ત્વા મહાદેવં ધનુઃ સજ્જં પ્રચક્રતુઃ ।
તાવુવાચ મહાદેવઃ સ્મયમાન ઇદં વચઃ ॥ ૧૧॥

શિવ ઉવાચ ।
ભવદ્ભ્યાં ગદિતં ક્રૂરં તત્સર્વં તથ્યમેવ ચ ।
અધુનાઽયં સમુત્પન્નો વક્રતુણ્ડો મહાબલઃ ॥ ૧૨॥

ભૂભારહરણાર્થં વૈ ભવતાં નાશનાય ચ ।

અધુના સ ગતઃ કાલો વિપરીતેન કર્મણા ॥ ૧૩॥

વક્રતુણ્ડપ્રસાદેન હનિષ્યામિ સમત્સરમ્ ।
અસુરં બલમત્યર્થં પાપરૂપં ન સંશયઃ ॥ ૧૪॥

ઇત્યુક્ત્વા બાણવૃષ્ટિં સ ચક્રે વૈ શઙ્કરઃ પ્રભુઃ ।
મહોગ્રાં કાલરૂપાં વૈ પ્રલયસ્ય પ્રકાશિનીમ્ ॥ ૧૫॥

તાં ચ ચિચ્છિદતુર્દૈત્યો સ્વશરૈરતિવગિતૈઃ ।
તૌ મણ્ડપં ક્ષણેનૈવ ચક્રતુઃ શરસમ્ભવમ્ ॥ ૧૬॥

તદ્બાણૈરપિ તે દેવાશ્છિન્ના ભિન્નાઃ કૃતા મુને ।
શઙ્કરો વિસ્મિતો ભૂત્વા શૂલમુગ્રં મુમોચ હ ॥ ૧૭॥

આગતં કાલરૂપં ચ શૂલં દૃષ્ટ્વા મહાસુરૌ ।
મહાસ્ત્રં તૌ પાશુપતં મોચયામાસતુસ્તદા ॥ ૧૮॥

અનિવાર્યં મહોગ્રં વૈ સર્વભસ્મકરં પરમ્ ।
જજ્વાલ તેજસા સર્વં બ્રહ્માણ્ડં વ્યાકુલં તતઃ ॥ ૧૯॥

ત્રિશૂલં નિષ્ફલં તેન મહાસ્ત્રેણ કૃતં ક્ષણાત્ ।
શિવસ્ય હૃદયે ગત્વા પપાત ભયદાયકમ્ ॥ ૨૦॥

મૂર્ચ્છિતઃ શઙ્કરસ્તેન પતિતો ધરણીતલે ।
હાહાકારશ્ચ સર્વત્ર દેવસૈન્યે તતોઽભવત્ ॥ ૨૧॥

પતિતં શઙ્કરં દૃષ્ટ્વા વક્રતુણ્ડો મહાબલઃ ।
સ્વાં સેનાં પ્રેરયામાસ દૈત્યમર્દનલાલસઃ ॥ ૨૨॥

ગણેશદૂતમુખ્યાસ્તેષ્વષ્ટૌ તત્રાયયુઃ પરે ।
સ્વાં સ્વાં સેનાં સમાદાય મહાકાયા મહાબલાઃ ॥ ૨૩॥

પ્રમોદશ્ચૈષ આમોદસ્તથા બ્રહ્મપ્રિયો મુને ।
યોગપ્રિયશ્ચ સ્વાનન્દભોક્તા જ્ઞાનમયશ્ચ હિ ॥ ૨૪॥

સર્વગઃ સર્વવિચ્ચૈવ ક્રોધયુક્તાઃ સમાયયુઃ ।
તૈઃ પ્રેક્ષિતાઃ સુરાઃ સર્વે ગતમૂર્ચ્છાસ્તદાઽભવન્ ॥ ૨૫॥

(Page ખં. ૧ અ. ૩૬ પાન ૮૨)
શ્રમહીનાઃ ક્ષતાદિભ્યો હીના જાતાઃ પ્રભાવતઃ ।
તેજસા દ્વિગુણાશ્ચૈવ હૃષ્ટપુષ્ટા યથા મુને ॥ ૨૬॥

એતસ્મિન્નન્તરે તત્ર કવિના જીવિતાસ્તથા ।
દૈત્યાઃ સમુત્થિતાઃ સર્વે નીરુજશ્ચ મહાબલાઃ ॥ ૨૭॥

પ્રહ્લાદપ્રમુખા વીરાશ્ચક્રુર્નાદં સમન્તતઃ ।
બ્રહ્માણ્ડમખિલં તેન સનાદમભવત્ પરમ્ ॥ ૨૮॥

તતો દેવગણાઃ સર્વે શઙ્ખનાદં પ્રચક્રિરે ।
તેન દૈત્યગણા ભીતા બધિરા ઇવ તે સ્થિતાઃ ॥ ૨૯॥

શઙ્ખાનાં ચૈવ ભેરીણાં દુન્દુભીનાં સ્વરૈઃ પરૈઃ ।
વીરાણાં ક્ષ્વેડિતેનૈવ હેષિતૈર્બૃંહિતસ્વનૈઃ ॥ ૩૦॥

રથનેમિસ્વનૈઃ સર્વં વ્યાપ્તમાસીન્નભો મુને ।
પરસ્પરં સમ્પદં ચ વીક્ષ્ય વીક્ષ્ય ચ વિસ્મિતાઃ ॥ ૩૧॥

એતસ્મિન્નેવ કાલે તે પ્રમોદાદ્યા ગણા યયુઃ ।
કુપિતાઃ શસ્ત્રસંવૃષ્ટિં ચક્રિરે દૈત્યમોહિનીમ્ ॥ ૩૨॥

તેષાં શસ્ત્રાણિ સર્વાણિ હ્યમોઘાનિ મહામુને ।
ચિચ્છિદુર્દૈત્યરાજાનાં મસ્તકાનિ ભુજાદિકાન્ ॥ ૩૩॥

બ્રહ્મપ્રિયો મહાબાહુઃ શુક્રં ધૃત્વા પ્રપશ્યતામ્ ।
અસુરાણાં ગતો દૂરં ગુહાયાં ચાક્ષિપન્ મુનિમ્ ॥ ૩૪॥

ગતં શુક્રં તદા દૃષ્ટ્વા દૈત્યાઃ સર્વે ભયાતુરાઃ ।
હાહાકારં પ્રચક્રુસ્તે કિં ભવિષ્યતિ વિહ્વલાઃ ॥ ૩૫॥

રક્ષિતા ગુરુરત્યુગ્રઃ પશ્યતાં નો મહાસુરાઃ ।
નીતશ્ચ મરણં તસ્માચ્છ્રેષ્ઠ કિં ન મૃતા વયમ્ ॥ ૩૬॥

અધુના ક્વ ગમિષ્યામસ્તસ્માદ્યુદ્ધ્યામહે વયમ્ ।
મરિષ્યામોઽથ વા મોચયિષ્યામસ્તં સ્વતેજસા ॥ ૩૭॥

પરસ્પરં ચેતિ દૈત્યા ઉક્ત્વા મરણનિશ્ચયાઃ ।
ઉદાયુધાશ્ચ સર્વે તે યુયુધુર્દેવસૈનિકૈઃ ॥ ૩૮॥

વ્યઙ્ગા દેવાઃ કૃતાસ્તૈસ્તે પતિતા રણમૂર્ધનિ ।
હાહાકારશ્ચ સર્વત્ર દેવસૈન્યે પ્રવર્તિતઃ ॥ ૩૯॥

તતો બ્રહ્મપ્રિયાદ્યા યે કુપિતાઃ શસ્ત્રધારિણઃ ।

પરશુપ્રમુખૈઃ શસ્ત્રૈસ્ત્રિશૂલાઙ્કુશપાશકૈઃ ॥ ૪૦॥

શસ્ત્રૈર્દૈત્યાન્નિજઘ્નુસ્તાન્ કાલરુદ્રા ઇવ પ્રજાઃ ।
તૈરસ્ત્રૈર્દૈત્યસેનાયાઃ કદનં કૃતમઞ્જસા ॥ ૪૧॥

બહવશ્ચ મૃતા દૈત્યા મૂર્ચ્છિતાશ્ચાપરેઽવનૌ ।
પેતુસ્તે સર્વશો વીરા પ્રહ્લાદપ્રમુખા મુને ॥ ૪૨॥

તતો દૈત્યકુમારૌ તાવાગતૌ રણમૂર્ધનિ ।
ઊચતુસ્તાન્ ગણાંસ્તત્ર પ્રમોદાદ્યાન્ મહાસુરૌ ॥ ૪૩॥

દૈત્યપુત્રાવૂચતુઃ ।
પ્રમોદામોદકાદ્યાશ્ચ ભવદ્ભિર્બલમઞ્જસા ।
હતં સર્વં ચ દૈત્યાનાં દૈત્યશ્રેષ્ઠાઃ પ્રમૂર્ચ્છિતાઃ ॥ ૪૪॥

અધુના મરણં પ્રાપ્તં સમીપે વઃ પ્રદૃશ્યતામ્ ।
શસ્ત્રૈસ્તીક્ષ્ણૈર્હનિષ્યાવો વક્રતુણ્ડયુતાન્ ખલાન્ ॥ ૪૫॥

એવમુક્ત્વા સ્વબાણાંસ્તૌ વવર્ષતુરથાસુરૌ ।
તતસ્તયોર્બલં વીક્ષ્ય દ્વૌ વીરૌ સમુપસ્થિતૌ ॥ ૪૬॥

સર્વગઃ સર્વવિચ્ચૈવ સબલૌ ધૃતકાર્મુકૌ ।
બાણવૃષ્ટિં તુ સંવાર્ય બાણાંશ્ચિક્ષિપતુઃ પરાન્ ॥ ૪૭॥

અમોઘાઃ સર્વબાણાસ્તે જગ્મુઃ કાલયમોપમાઃ ।
દૈત્યાન્ સર્વાન્ પ્રચકુસ્તે છિન્નભિન્નાત્મકાન્ મુને ॥ ૪૮॥

મૃતા મુમૂર્ષવઃ કેચિત્પતિતા ધરણીતલે ।
અકસ્માદ્રક્તસમ્ભૂતા નદી તત્ર પ્રવર્તિતા ॥ ૪૯॥

તયોર્બલં નિરીક્ષ્યૈવ કમ્પિતૌ દૈત્યપુઙ્ગવૌ ।
અઞ્ચસ્ત્રં ધનુષિ શ્રેષ્ઠં દધતુઃ ક્રોધસંયુતૌ ॥ ૫૦॥

યાવન્ મુમુચતુસ્તાવત્ પરશૂ યમસન્નિભૌ ।
(Page ખં. ૧ અ. ૩૭ પાન ૮૩)
આગતૌ ચ શિરશ્છેદં દૈત્યયોશ્ચક્રતુઃ ક્ષણાત્ ॥ ૫૧॥

મત્સરસ્ય સુતૌ વીક્ષ્ય મૃતૌ સર્વે ભયાતુરાઃ ।
મત્સરં શરણં જગ્મુરૂચુર્વૃત્તાન્તમઞ્જસા ॥ ૫૨॥

દૈત્યા ઊચુઃ ।

શ્ૃણુ દૈત્યેશ વૃત્તાન્તં રણભૂમિસમુદ્ભવમ્ ।
મહાભયઙ્કરં ઘોરં કથિતું શક્યતે ન ચ ॥ ૫૩॥

પ્રહ્લાદપ્રમુખાઃ સર્વે ઘાતિતા રણમૂર્ધનિ ।
મૃતતુલ્યા મૃતા વા કિમસ્માભિર્જ્ઞાયતે ન ચ ॥ ૫૪॥

તવ પુત્રૌ મહાવીર્યૌ મૃતૌ સઙ્ગ્રામમણ્ડલે ।
કૃત્વા યુદ્ધં મહાઘોરં પરશુભ્યાં મહામતે ॥ ૫૫॥

અકસ્માદ્વક્રતુણ્ડસ્ય ગણૌ દ્વૌ સમુપસ્થિતૌ ।
તાભ્યાં ચૈવ હતૌ વીરૌ સ્વલ્પકાલેન દૈત્યપ ॥ ૫૬॥

વક્રતુણ્ડસમશ્ચૈવ ન ભૂતો ન ભવિષ્યતિ ।
ઇતિ સ્વાન્તે ચ સંજ્ઞાય દેવં તં શરણં વ્રજ ॥ ૫૭॥

નોચેદ્દૈત્યગણાઃ સર્વે નાશં યાસ્યન્તિ નિશ્ચિતમ્ ।
મા ગર્વં કુરુ દૈત્યેશ દૈત્યાન્ રક્ષ મહામતે ॥ ૫૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે સુન્દરપ્રિયવિષયપ્રિયવધો નામ ષટ્ત્રિંશોઽધ્યાયઃ ॥ ૧.૩૬

## ૧.૩૭ મત્સરાસુરસમાગમો નામ સપ્તત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ।
મુદ્ગલ ઉવાચ ।
દૈત્યાનાં વચનં શ્રુત્વા સ દૈત્યો મત્સરાસુરઃ ।
મૂર્ચ્છિતઃ સહસા ભૂમૌ પપાત ભયવિહ્વલઃ ॥ ૧॥

અનિશ્વસન્ દૈત્યપસ્તુ તૈરાશુ વિધૃતો નૃપઃ ।
સાવધાનં પ્રચક્રુસ્તં પ્રયત્નૈઃ પરમૈસ્તતઃ ॥ ૨॥

દ્વિમુહૂર્તેન સમ્બુદ્ધો મત્સરઃ પ્રલલાપ હ ।
કિં જાતં ભાવિ વા કિં વા દૈવેન વિફલં કૃતમ્ ॥ ૩॥

તપસા ત્વમરત્વં ચ પૃથિવીરાજ્યમઞ્જસા ।
મયા પ્રાપ્તં સ્વસામર્થ્યાદતુલં તદ્ વૃથા કૃતમ્ ॥ ૪॥

અહો હિ બલવદ્ દૈવં પ્રયત્નો નિષ્ફલો મતઃ ।
અચિન્ત્યા મેઽભયપ્રાપ્તિઃ પશ્ચાત્ સૂર્યોદયો યથા ॥ ૫॥

મૃતા દૈત્યા અસઙ્ખ્યાશ્ચ મદર્થં નાત્ર સંશયઃ ।
મૃતૌ પુત્રૌ મહાકાલૌ કાલસ્ય કથમદ્ય તૌ ॥ ૬॥

અધુના શોકસન્તપ્તો મરિષ્યામિ ન સંશયઃ ।
મૃતૌ પુત્રૌ મહાકાલૌ કિં કાર્યં જીવિતેન મે ॥ ૭॥

બ્રહ્માણ્ડાધિપતેઃ પુત્રૌ કથં તૌ નિધનં ગતૌ ।
કથં મિથ્યા હિ જાતં મે વરદાનં મહત્તરમ્ ॥ ૮॥

અહો પુત્રૌ મહાવીર્યૌ કથં મરણમાપતુઃ ।
યાભ્યાં સ્વભુજવીર્યેણ જિતા વિષ્ણુમુખાઃ સુરાઃ ॥ ૯॥

અહો પુત્રૌ ચ માં ત્યક્ત્વા ઘોરે દુઃખાર્ણવે પરે ।
ક્વ ગતૌ વદતં વાક્યમભૂતં નિષ્ઠુરૌ કથમ્ ॥ ૧૦॥

સખીંશ્ચ પિતરં વૃદ્ધં ત્યક્ત્વા માં સુન્દરપ્રિય ।
વિષયપ્રિય મદ્વલૌ કથં મૃત્યુમુપસ્થિતૌ ॥ ૧૧॥

ઇતિ નાનાવિધં શૌકં ચક્રે દૈત્યેન્દ્રપાલકઃ ।
તં તે સભ્યવરાઃ સર્વે સાન્ત્વયામાસુરાદરાત્ ॥ ૧૨॥

વૃદ્ધા ઊચુઃ ।
ન રોદનં પ્રકર્તવ્યં ત્વયા દૈત્યેન્દ્રનાયક ।
રણે મૃતૌ મહાવીર્યૌ કીર્તિં કૃત્વા મહત્તરામ્ ॥ ૧૩॥

દેહસ્ય મરણં નિત્યં જન્મ ચૈવ તથા પ્રભો ।
કિં ચિત્રં તચ્ચ સઞ્જાતં યેન શોચસિ દૈત્યપ ॥ ૧૪॥

(Page ખં. ૧ અ. ૩૭ પાન ૮૪)
આત્મનો મરણં નૈવ જન્મશાસ્ત્રેષુ કથ્યતે ।
માયામોહં પરિત્યજ્ય સ્વસ્થો ભવ મહામતે ॥ ૧૫॥

જન્તોરૂર્ધ્વક્રિયા સર્વા કર્તવ્યા સ્વજનૈરપિ ।
અતસ્ત્વં દૈત્યરાજેન્દ્ર સાર્થકં ત્વેતયોઃ કુરુ ॥ ૧૬॥

અથવા તૌ પરિત્યજ્ય વક્રતુણ્ડં જહિ પ્રભો ।
અથવા શરણં યાહિ યેનૈવ કુશલં ભવેત્ ॥ ૧૭॥

વીરા રુદન્તિ કુત્રાપિ નૈવ જાનીહિ દૈત્યપ ।
સપત્નાન્ હર્ષસંયુક્તાન્ મા કુરુષ્વાધુના પરાન્ ॥ ૧૮॥

એવં પ્રબોધિતો દૈત્યો મત્સરઃ ક્રોધસંયુતઃ ।
આદાય સકલં સૈન્યં યયૌ સઙ્ગ્રામમણ્ડલમ્ ॥ ૧૯॥

મત્સરાસુરમાયાન્તં દૃષ્ટ્વા શમ્ભ્વાદયઃ સુરાઃ ।
ભયભીતાશ્ચ તં પ્રોચુર્વક્રતુણ્ડં પ્રણમ્ય તે ॥ ૨૦॥

સ્વામિન્ સમાગતો દૈત્યો મત્સરઃ સ પ્રતાપવાન્ ।
યસ્યાગ્રે મશકા દેવાસ્તૃણરૂપા નરાદયઃ ॥ ૨૧॥

યસ્યાગ્રે વશવર્તિન્યઃ શ્રિયઃ સર્વાર્થદાયિકાઃ ।
બ્રહ્માણ્ડં કમ્પતે યસ્ય ભયાત્સોઽયં સમાગતઃ ॥ ૨૨॥

યસ્ય રાજ્યે મહાભાગા જના દુઃખવિવર્જિતાઃ ।
સર્વર્તુફલદા વૃક્ષા મેઘાઃ કાલપ્રવર્ષિણઃ ॥ ૨૩॥

યસ્યાજ્ઞા વશગશ્ચાસૌ તપત્યેવ દિવાકરઃ ।
ન શીતં પ્રબલં તત્ર મત્સરે રાજ્યભોગિનિ ॥ ૨૪॥

ન રોગાઃ પ્રચરન્તીહ ભયભીતાઃ સમ્મતતઃ ।
ન ચ ચોરાદિસન્ત્રસ્તં જગદ્રાજ્યં પ્રશાસતિ ॥ ૨૫॥

યસ્ય પૂજા ચ સર્વત્ર જગતિ ક્રિયતે જનૈઃ ।
યજ્ઞાદિ સર્વમખિલં ભુક્તં યેન મહાત્મના ॥ ૨૬॥

કાલો બિભેતિ યં દૃષ્ટ્વા તદાજ્ઞા પાલકોઽભવત્ ।
કર્મખણ્ડનમપ્યત્ર કૃતં યેન સુરારિણા ॥ ૨૭॥

ન સ્વાહા ન સ્વધા યત્ર ન વષટ્કાર એવ ચ ।
ન વેદાધ્યયનાચારો મત્સરે રાજ્યકર્તરિ ॥ ૨૮॥

ન સ્નાનાદિક્રિયા યત્ર ન સ્વધર્મઃ સ્વભાવજઃ ।
ન વર્ણાશ્રમયોર્ધર્મો મત્સરે રાજ્યકર્તરિ ॥ ૨૯॥

દેવાઃ શ્વાપદતુલ્યા વૈ ભ્રમન્તિ વનગોચરાઃ ।
અન્નવસ્ત્રાદિસંહીનાઃ કૃતા દૈત્યેન્દ્રકેણ ભોઃ ॥ ૩૦॥

મુનયસ્તપસા હીનાઃ શાપસામર્થ્યહીનકાઃ ।
કૃતા મત્સરદૈત્યેન સોઽયં સ્વામિન્ સમાગતઃ ॥ ૩૧॥

દેવાઙ્ગનાશ્ચ તત્કન્યા નાગકન્યા મહાત્મના ।
ભુક્તા નાનાવિધા ભોગાઃ સોઽયં મત્સર આગતઃ ॥ ૩૨॥

નરકન્યાઃ પશોઃકન્યા મુનિકન્યાઃ સમાહૃતાઃ ।
બલેન ન સમં યસ્ય બ્રહ્માણ્ડે સોઽયમાગતઃ ॥ ૩૩॥

યસ્યાષ્ટાવરણૈર્મૃત્યુર્ન ભવેચ્ચ કદાચન ।
સોઽયં સમાગતો દૈત્યઃ પશ્ય પશ્ય ગણાધિપ ॥ ૩૪॥

ઇત્યેવં બ્રુવતો દેવાન્ વક્રતુણ્ડો મહાબલઃ ।
મા ભયં કુરુત પ્રાજ્ઞા હનિષ્યામીતિ સોઽબ્રવીત્ ॥ ૩૫॥

સિંહારૂઢો મહાબાહુરેકદન્તવિરાજિતઃ ।
પાશાङ્કુશધરો ભૂત્વા યયૌ સઙ્ગ્રામમણ્ડલમ્ ॥ ૩૬॥

પ્રમોદામોદકાદ્યૈશ્ચ સંવૃતં યુદ્ધલાલસમ્ ।
તં દૃષ્ટ્વા ક્રોધસંયુક્તો મત્સરઃ પ્રાહ ભર્ત્સયન્ ॥ ૩૭॥

મત્સરાસુર ઉવાચ ।
કિમર્થમાગતસ્ત્વં મે વક્રતુણ્ડ રણેઽગ્રતઃ ।
અદ્યૈવ ત્વાં હનિષ્યામિ મા મુખં દર્શયસ્વ રે ॥ ૩૮॥

મૂઢોઽસિ યેન સઙ્ગ્રામં કર્તુમાગત એવ ચ ।
ન મે મૃત્યુર્ભવેદષ્ટાવરણૈર્દેહધારિભિઃ ॥ ૩૯॥

(Page ખં. ૧ અ. ૩૮ પાન ૮૫)
શમ્ભુવિષ્ણુમુખૈર્દેવૈઃ પ્રેરિતસ્ત્વં ન બુધ્યસે ।
મોહભાવેન સંયાતો મત્સરેણ યુયુત્સુના ॥ ૪૦॥

હન્મિ ત્વામેકબાણેન સસૈન્યં નાત્ર સંશયઃ ।
પદાઘાતેન મે ભૂમિર્વિશીર્ણા જાયતે ખલ ॥ ૪૧॥

તલપ્રહારસંયુક્તાઃ પર્વતાશ્ચૂર્ણતાં ગતાઃ ।
તસ્યાઽગ્રે કથમાયાતઃ કાલેન પ્રેરિતોઽથવા ॥ ૪૨॥

શબ્દગર્જનમાત્રેણ કમ્પતે સચરાચરમ્ ।
તસ્યાગ્રે ત્વં સુસઙ્ગ્રામં કિં કરિષ્યસિ તદ્વદ ॥ ૪૩॥

બ્રહ્માણ્ડં સકલં યુદ્ધે જિતં યેન પ્રભાવતઃ ।
તદા ત્વં કુત્ર ગુપ્તઃ સન્ સ્થિતોઽસિ ભયભાવિતઃ ॥ ૪૪॥

સમીચીનમિદં મૂઢાઽધુના ખલ કૃતં ત્વયા ।

દૃષ્ટેઃ સમીપગો જાતો હતો મમ ભવિષ્યસિ ॥ ૪૫॥

શરણં યાહિ મે દુષ્ટ જીવિતું યદિ ચેચ્છસિ ।
મદાજ્ઞાવશગો ભૂત્વા વને તિષ્ઠ યથાસુખમ્ ॥ ૪૬॥

મૂઢભાવેન સંયાતં ત્વાં ન હન્મિ ચ નિર્બલમ્ ।
પ્રેરકાન્ મુનિદેવાંસ્તે તાન્ હનિષ્યામિ નિશ્ચિતમ્ ॥ ૪૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે મત્સરાસુરસમાગમો નામ સપ્તત્રિંશોऽધ્યાયઃ ॥ ૧.૩૭

## ૧.૩૮ વક્રતુણ્ડવિજયો નામાષ્ટત્રિંશોऽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ।
મુદ્ગલ ઉવાચ ।
એવં બ્રુબન્તમત્યન્તં મત્સરં ક્રોધસંયુતમ્ ।
વક્રતુણ્ડઃ પ્રસન્નાત્મા સ્મયન્નિવ જગાદ તમ્ ॥ ૧॥

વક્રતુણ્ડ ઉવાચ ।
મા ગર્વં કુરુ દૈત્યેશ નાહં દેવો ન માનુષઃ ।
નાસુરો નૈવ નાગશ્ચ ન ગન્ધર્વો ન પર્વતઃ ॥ ૨॥

ન નાનાયોનિજો જન્તુર્નાષ્ટાવરણજસ્તથા ।
બ્રહ્મરૂપોऽહમાનન્દાનન્દકારક એવ ચ ॥ ૩॥

ત્વાં હન્તું મુનિદેવાનાં સ્થાપનાર્થમિહાગતઃ ।
હનિષ્યામિ ત્વસન્દેહાદ દૈત્યનાયક દુર્મતે ॥ ૪॥

શિથિલં વરપુણ્યં તે સામ્પ્રતં પાપસઞ્ચયાત્ ।
નાનાપાપફલાર્થસ્ય દાતા તેऽહં સમાગતઃ ॥ ૫॥

અકર્તું કર્તુમીશં મામન્યથાકર્તુમાદરાત્ ।
જાનીહિ મત્સર ત્વં વૈ કિં કરિષ્યસિ તદ્વદ ॥ ૬॥

જીવિતું ચેચ્છસિ પ્રાજ્ઞ તદા માં શરણં વ્રજ ।
સ્વસ્થાને ધર્મવિદ્વેષં ત્યક્ત્વા ત્વં તુ સુખી ભવ ॥ ૭॥

દેવાદીનાં ચ વિદ્વેષં ત્યક્ત્વા તિષ્ઠસિ દૈત્ય ચેત્ ।
તદા ત્વાં ન હનિષ્યામિ જાનીહિ ત્વં મતં મમ ॥ ૮॥

મુદ્ગલ ઉવાચ ।
વક્રતુણ્ડવચઃ શ્રુત્વા મત્સરો વિસ્મિતોઽભવત્ ।
ઉવાચ તં પ્રસન્નાત્મા ભક્તિભાવેન યન્ત્રિતઃ ॥ ૯॥

મત્સર ઉવાચ ।
વક્રતુણ્ડ નમસ્તુભ્યં વદ મે સકલં પ્રભો ।
સંશયં છિન્ધિ તં પૂર્વં હૃદિસ્થં ગણનાયક ॥ ૧૦॥

યદિ ત્વં સગુણો નાસિ નિર્ગુણોઽપિ ન વર્તસે ।
બ્રહ્મરૂપોઽસિ સર્વેશ તદાકારધરઃ કથમ્ ॥ ૧૧॥

અન્યચ્ચ ત્વં મહાભાગ બ્રહ્મભાવેન સંસ્થિતઃ ।
સુરાસુરસમં બ્રહ્મ કથમેકં સમાશ્રિતઃ ॥ ૧૨॥

અસુરાણાં નિહન્તા ત્વં સુરાણાં પાલકોઽધુના ।
એતં મે સંશયં બ્રહ્મન્ છેત્તુમર્હસિ વિઘ્નપ ॥ ૧૩॥

મત્સરસ્ય વચઃ શ્રુત્વા વક્રતુણ્ડઃ પ્રતાપવાન્ ।
ઉવાચ તં મહાવીરં ભાવં દૃષ્ટ્વા હૃદિ સ્થિતમ્ ॥ ૧૪॥

(Page ખં. ૧ અ. ૩૮ પાન ૮૬)
વક્રતુણ્ડ ઉવાચ ।
શ઼ૃણુ મત્સર યત્પૃષ્ટં ત્વયા બુદ્ધિવિશારદ ।
તત્સર્વં કથયિષ્યામિ સંશયચ્છેદનાય તે ॥ ૧૫॥

અખિલં બ્રહ્મરૂપેણ મયા સૃષ્ટં ચરાચરમ્ ।
લીલાર્થં બન્ધહીનેન સ્વસ્વધર્મયુતં પરમ્ ॥ ૧૬॥

પુરુષપ્રકૃતિભ્યાં તત્ પાલ્યતે હ્રિયતે મયા ।
તયોર્હૃદિ સ્થિતેનૈવ ચિન્તામણિસ્વરૂપિણા ॥ ૧૭॥

સર્વેષાં ચિત્તવૃત્તેશ્ચ ચાલકોઽહં ન સંશયઃ ।
મદાજ્ઞાવશગં સર્વં વર્તતે દૈત્યપુઙ્ગવ ॥ ૧૮॥

યદા સ્વધર્મમત્યન્તં ત્યક્ત્વા દેવગણેશ્વરાઃ ।
દૈત્યાનાં નિધનાર્થં ચ યતન્તે મૂલનાશકાઃ ॥ ૧૯॥

તદા દૈત્યહૃદિસ્થોઽહં તપસિ પ્રેરકોસ્મ્યતઃ ।
દૈત્યાઃ કુર્વન્તિ ચ તપો દેવાનાં પ્રજિઘાંસયા ॥ ૨૦॥

તપસા વરલાભેન દેવાન્ ઘ્નન્તિ મહાબલાઃ ।
તતસ્તે સતતં દેવાઃ સત્તાહીના ભવન્તિ વૈ ॥ ૨૧॥

તતોઽહં દેવસઙ્ઘાનાં વિપરીતો ન સંશયઃ ।
ભવામિ ચાસુરાણાં વૈ સિદ્ધિદાતા મહાસુર ॥ ૨૨॥

યદિ દૈત્યા મહાદુષ્ટાસ્ત્યક્ત્વા ઘ્નન્તિ સ્વધર્મકમ્ ।
દેવાન્ મૂલવિહીનાંશ્ચ કર્તુમિચ્છન્તિ દાનવ ॥ ૨૩॥

તદાઽહં દેવરૂપેણ તેષાં હૃદિ સમાસ્થિતઃ ।
છિદ્રં પ્રકાશયામ્યાદૌ હનને દૈત્યરક્ષસામ્ ॥ ૨૪॥

તતસ્તેનૈવ દેવેન્દ્રા માર્ગેણ સુરવિદ્વિષઃ ।
ઘ્નન્તિ મત્સર તે સર્વં કથિતં મે ચરિત્રકમ્ ॥ ૨૫॥

યદિ સ્વહૃદયે દેવા નિશ્ચયં કુર્વતે પરમ્ ।
દૈત્યાનાં તપસાં વિઘ્નં કર્તવ્યમિતિ સામ્પ્રતમ્ ॥ ૨૬॥

તદાઽહં વરદાતા ચ ભવામ્યસુરનાયક ।
દૈત્યેભ્યો નાત્ર સન્દેહો દેવગર્વપ્રહારકઃ ॥ ૨૭॥

યદિ દૈત્યા મહાભાગા દેવૈર્જાતા દુરાસદાઃ ।
તદાઽહં દૈત્યનાશાય ભવામિ તનુધારકઃ ॥ ૨૮॥

યદા દૈત્યાશ્ચ દેવાશ્ચ સ્વસ્વધર્મપરાયણાઃ ।
તદાઽહં બ્રહ્મભાવેન સ્થિતસ્તેષાં હૃદિ હ્યહો ॥ ૨૯॥

ત્વયા પ્રપીડિતા દેવાસ્ત્યક્ત્વા ધર્મં સ્વભાવજમ્ ।
અતસ્ત્વાં હન્તુમાયાતો દૈત્યરાજ મહામતે ॥ ૩૦॥

ઇત્યુક્ત્વા નિજરૂપં તદ્દર્શયામાસ વિઘ્નપઃ ।
બિન્દુમાત્રે બ્રહ્મણિ સ્વે સંસ્થિતં સુન્દરં મુને ॥ ૩૧॥

વક્રતુણ્ડપ્રસાદેન તસ્ય દર્શનજેન ચ ।
ફલેન દૈત્યરાજોઽપિ દિવ્યં ચક્ષુરવાપ્તવાન્ ॥ ૩૨॥

તેનૈવ ચક્ષુષા તેન દૈત્યેન પરમાદ્ભુતમ્ ।
દૃષ્ટં રૂપં ગણેશસ્ય બ્રહ્માકારં પ્રજાપતે ॥ ૩૩॥

ન ન્યૂનં નાધિકં તત્ર ન સમં ચાત્મના ન ચ ।
ચતુષ્પાદમયં બ્રહ્મ પાદહીનં સ્વભાવતઃ ॥ ૩૪॥

ન દેહો ન ચ દેહ્યત્ર સગુણો નિર્ગુણો ન ચ ।
ન માયામાયિકો ભાતિ વક્રતુણ્ડો ગજાનનઃ ॥ ૩૫॥

દેહં સગુણરૂપં ચ નિર્ગુણં મસ્તકં મુને ।
ગજવક્ત્રમયં તેન દૃષ્ટં ભિન્નં પ્રભાવતઃ ॥ ૩૬॥

તયોર્યોગકરઃ સાક્ષાદ્ વક્રતુણ્ડઃ પ્રતાપવાન્ ।
સંયુક્તોઽવયવાદ્યૈશ્ચ જ્ઞાતો દૈત્યાધિપેન સઃ ॥ ૩૭॥

તતસ્તં પ્રણનામાથ ભક્તિયુક્તેન ચેતસા ।
તુષ્ટાવ પરયા ભક્ત્યા બદ્ધાઞ્જલિપુટોઽસુરઃ ॥ ૩૮॥

મત્સરાસુર ઉવાચ ।
નમામિ વક્રતુણ્ડં ચ ચતુષ્પાદં ચતુઃપરમ્ ।
ચતુર્દેહવિહીનં ચ બિન્દુમાત્રે વ્યવસ્થિતમ્ ॥ ૩૯॥

સાકારં ચ નિરાકારં માયારૂપધરં પ્રભુમ્ ।
(Page ખં. ૧ અ. ૩૮ પાન ૮૭)
નમામિ માયિનં તં ચ માયાહીનસ્વરૂપકમ્ ॥ ૪૦॥

જગન્મયં ચ તદ્ધીનં સર્વકામપ્રપૂરકમ્ ।
બ્રહ્મભૂયપ્રદં ચૈવ નમામિ ગણનાયકમ્ ॥ ૪૧॥

સિંહારૂઢં ચતુર્બાહું વિઘ્નનાશં નમામિ ચ ।
સિદ્ધિબુદ્ધિપતિં ચૈવ સિદ્ધિબુદ્ધિપ્રદાયકમ્ ॥ ૪૨॥

અનન્તલીલયા યુક્તં લીલાહીનં નમામિ તમ્ ।
અવ્યક્તં વ્યક્તરૂપં વૈ નમામિ સ્વહૃદિ સ્થિતમ્ ॥ ૪૩॥

વેદાન્તવેદ્યં સજ્યોતિર્જ્યોતિષામપિ ભાસકમ્ ।
નમામિ સચ્ચિદાનન્દદેહરૂપં ગજાનનમ્ ॥ ૪૪॥

યોગિનાં હૃદિ સંસ્થં ચ યોગિભ્યો યોગદાયકમ્ ।
ભાવાભાવમયં દેવં નમામિ ભવવર્જિતમ્ ॥ ૪૫॥

સર્વત્ર પક્ષહીનં તં સર્વપક્ષધરં પ્રભુમ્ ।
નમામિ વક્રતુણ્ડાખ્યં બ્રહ્મબ્રહ્માધિપં વિભુમ્ ॥ ૪૬॥

અહો ભાગ્યમહો ભાગ્યં યેન દૃષ્ટો ગજાનનઃ ।

સર્વાકારનિરાકારહીનોઽયં વક્રતુણ્ડકઃ ॥ ૪૭॥

શરણં તે પ્રપન્નોઽસ્મિ પાહિ માં ભક્તવત્સલ ।
પ્રવણં ત્વત્પદે નિત્યં સંસારોત્તારણૈષિણમ્ ॥ ૪૮॥

એવં સ્તુત્વા વક્રતુણ્ડં પાદયોર્નિપપાત હ ।
પુનઃ પુનઃ પ્રણમ્યાઽસૌ બદ્ધાઞ્જલિપુટઃ સ્થિતઃ ॥ ૪૯॥

સ દૃષ્ટ્વા તાદૃશં દૈત્યં ભક્તિયુક્તં ગજાનનઃ ।
જગાદ તં મહાભાગં ભક્તેશો ભાવતોષિતઃ ॥ ૫૦॥

વક્રતુણ્ડ ઉવાચ ।
મત્સર ત્વદ્વિનાશાય કુપિતોઽહં ન સંશયઃ ।
શરણાગતનાશં ચ નેચ્છામિ વૃણુ વાઞ્છિતમ્ ॥ ૫૧॥

ઇદં ત્વયા કૃતં સ્તોત્રં મત્પ્રીતર્વર્ધનં મહત્ ।
મહૈશ્વર્યાયુરારોગ્યદાયકં ધનધાન્યદમ્ ॥ ૫૨॥

પુત્રપૌત્રકલત્રાદિનાનાસમ્પત્કરં પરમ્ ।
ધર્માર્થકામમોક્ષાણાં દાયકં પ્રભવિષ્યતિ ॥ ૫૩॥

મુદ્ગલ ઉવાચ ।
વક્રતુણ્ડવચઃ શ્રુત્વા મત્સરો ભક્તિસંયુતઃ ।
જગાદ વચનં તત્ર વક્રતુણ્ડં કૃતાઞ્જલિઃ ॥ ૫૪॥

મત્સર ઉવાચ ।
પ્રસન્નો યદિ સર્વેશ મહ્યં દેયો વરો યદિ ।
સુદૃઢાં ચ તદા ભક્તિં ત્વદીયાં દેહિ વિઘ્નપ ॥ ૫૫॥

અન્યં ત્વં મે વરં દેહિ ત્વદ્ભક્તાસ્તે ચ મે પ્રિયાઃ ।
સ્થાનં દેહિ તથા વૃત્તિં યોગક્ષેમકરીં પ્રભો ॥ ૫૬॥

મત્સરસ્ય વચઃ શ્રુત્વા વક્રતુણ્ડસ્તમબ્રવીત્ ।
અચલા પદિ મે ભક્તિરદ્ય તે સમ્ભવિષ્યતિ ॥ ૫૭॥

સ્વસ્વધર્મરતાન્ જન્તૂંસ્તાન્ રક્ષસ્વ ચ મત્સર ।
મદીયાન્ પ્રવરાન્ ભક્તાંસ્તાન પાલય ચ યત્નતઃ ॥ ૫૮॥

મદીયમૂર્તિપૂજા ચ યત્રાદૌ સ્મરણં ભવેત્ ।
સર્વારમ્ભેષુ તત્ર ત્વં મા વિઘ્નં કુરુ દૈત્યપ ॥ ૫૯॥

અન્યત્ર સર્વભાવેષુ કર્મજ્ઞાનાદિકર્તૃષુ ।
આસુરેણૈવ વર્તસ્વ ફલં ગ્રાહ્યં ત્વયાઽસુર ॥ ૬૦॥

તેષાં હૃદિ સમાવિશ્ય કુરુ રાજ્યં મહામતે ।
મદ્ભક્ત્યાદિષુ ભાવેષુ દાસવત્ત્વં સદા ભવ ॥ ૬૧॥

એવમુક્તો મહાદૈત્યસ્તથેતિ તમુવાચ હ ।
પ્રણિપત્ય ગણેશાનં હર્ષયુક્તેન ચેતસા ॥ ૬૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે વક્રતુણ્ડવિજયો નામાષ્ટત્રિંશોઽધ્યાયઃ ॥ ૧.૩૮
(Page ખં. ૧ અ. ૩૯ પાન ૮૮)

## ૧.૩૯ વક્રતુણ્ડાન્તર્ધાનં નામૈકોનચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
મત્સરં શાન્તિમાપન્નં દૃષ્ટ્વા દેવર્ષયસ્તદા ।
પ્રહૃષ્ટમનસો જાતાસ્તુષ્ટુવુસ્તં ગજાનનમ્ ॥ ૧॥

દેવર્ષય ઊચુઃ ।
સદા બ્રહ્મભૂતં વિકારાદિહીનં વિકારાદિભૂતં મહેશાદિવન્દ્યમ્ ।
અપારસ્વરૂપં સ્વસંવેદ્યમેકં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૨॥

અજં નિર્વિકલ્પં કલાકાલહીનં હૃદિસ્થં સદા સાક્ષિરૂપં પરેશમ્ ।
જનજ્ઞાનકારં પ્રકાશૈર્વિહીનં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૩॥

અનન્તસ્વરૂપં સદાનન્દકન્દં પ્રકાશસ્વરૂપં સદા સર્વગં તમ્ ।
અનાદિં ગુણાદિં ગુણાધારભૂતં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૪॥

ધરાવાયુતેજોમયં તોયભાવં સદાકાશરૂપં મહાભૂતસંસ્થમ્ ।
અહઙ્કારધારં તમોમાત્રસંસ્થં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૫॥

રવિપ્રાણવિષ્ણુપ્રચેતોયમેશવિધાત્રશ્વિવૈશ્વાનરેન્દ્રપ્રકાશમ્ ।
દિશાં બોધકં સર્વદેવાધિરૂપં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૬॥

ઉપસ્થત્વગુક્તીક્ષણસ્થપ્રકાશં કરાઙ્ઘ્રિસ્વરૂપં કૃતઘ્રાણજિહ્વમ્ ।
ગુદસ્થં શ્રુતિસ્થં મહાખપ્રકાશં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૭॥

રજોરૂપસૃષ્ટિપ્રકાશે વિધિં તં સદા પાલને કેશવં સત્ત્વસંસ્થમ્ ।
તમોરૂપધારં હરં સંહરં તં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૮॥

દિશાધીશરૂપં સદાશાસ્વરૂપં ગ્રહાદિપ્રકાશં ધ્રુવાદિં ખગસ્થમ્ ।
અનન્તોડુરૂપં તદાકારહીનં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૯॥

મહત્તત્વરૂપં પ્રધાનસ્વરૂપમહઙ્કારધારં ત્રયીબોધકારમ્ ।
અનાદ્યન્તમાદ્યં તદાધારપુચ્છં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૧૦॥

સદા કર્મધારં ફલૈઃ સ્વર્ગદં તમકર્મપ્રકાશેન મુક્તિપ્રદં તમ્ ।
વિકર્માદિના યાતનાધારભૂતં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૧૧॥

અલોભસ્વરૂપં સદા લોભધારં જનજ્ઞાનકારં જનાધીશપાલમ્ ।
નૃણાં સિદ્ધિદં માનવં માનવસ્થં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૧૨॥

લતાવૃક્ષરૂપં સદા પક્ષિરૂપં ધનાદિપ્રકાશં સદા ધાન્યરૂપમ્ ।
પ્રસૂપુત્રપૌત્રાદિનાનાસ્વરૂપં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૧૩॥

ખગેશસ્વરૂપં વૃષાદિપ્રસંસ્થં મૃગેન્દ્રાદિબોધં મૃગેન્દ્રસ્વરૂપમ્ ।
ધરાધારહેમાદ્રિમેરુસ્વરૂપં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૧૪॥

સુવર્ણાદિધાતુસ્થસદ્રઙ્ગસંસ્થં સમુદ્રાદિમેઘસ્વરૂપં જલસ્થમ્ ।
જલે જન્તુમત્સ્યાદિનાનાવિભેદં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૧૫॥

સદા શેષનાગાદિનાગસ્વરૂપં સદા નાગભૂષં ચ લીલાકરં તૈઃ ।
સુરારિસ્વરૂપં ચ દૈત્યાદિભૂતં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૧૬॥

વરં પાશધારં સદા ભક્તપોષં મહાપૌરુષં માયિનં સિંહસંસ્થમ્ ।
ચતુર્બાહુધારં સદા વિઘ્નનાશં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૧૭॥

ગણેશં ગણેશાદિવન્દ્યં સુરેશં પરં સર્વપૂજ્યં સુબોધાદિગમ્યમ્ ।
મહાવાક્યવેદાન્તવેદ્યં પરેશં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૧૮॥

અનન્તાવતારૈઃ સદા પાલયન્તં સ્વધર્માદિસંસ્થં જનં કારયન્તમ્ ।
સુરૈર્દૈત્યપૈર્વન્દ્યમેકં સમં ત્વાં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૧૯॥

(Page ખં. ૧ અ. ૩૯ પાન ૮૯)
ત્વયા નાશિતોઽયં મહાદૈત્યભૂપઃ સુશાન્તેર્ધરોઽયં કૃતસ્તેન વિશ્વમ્ ।
અખણ્ડપ્રહર્ષેણ યુક્તં ચ તં વૈ નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૨૦॥

ન વિન્દન્તિ યં વેદવેદજ્ઞમર્ત્યા ન વિન્દન્તિ યં શાસ્ત્રશાસ્ત્રજ્ઞભૂપાઃ ।

ન વિન્દન્તિ યં યોગયોગીશકાદ્યા નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૨૧॥

ન વેદા વિદુર્યં ચ દેવેન્દ્રમુખ્યા ન યોગૈર્મુનીન્દ્રા વયં કિં સ્તુમશ્ચ ।
તથાઽપિ સ્વબુધ્યા સ્તુતં વક્રતુણ્ડં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૨૨॥

મુદ્ગલ ઉવાચ ।
એવં સ્તુત્વા વક્રતુણ્ડં સ્થિતા દેવષર્યઃ પ્રભો ।
બધ્દ્વાઞ્જલિપુટાઃ સર્વે તૂષ્ણીમ્ભાવેન માનદ ॥ ૨૩॥

દેવાનાં ચ મુનીનાં સ સ્તુતિં શ્રુત્વા ગજાનનઃ ।
ઉવાચ તાન્ પ્રસન્નાત્મા હષર્યન્ વચનં મહત્ ॥ ૨૪॥

વક્રતુણ્ડ ઉવાચ ।
શ ृણુધ્વં મુનયઃ સર્વે દેવા મે વચનં મહત્ ।
ભવત્કૃતમિદં સ્તોત્રં મત્પ્રીતેર્વધનં ભવેત્ ॥ ૨૫॥

અનન સ્તૌતિ યો નિત્યં માં તસ્ય પરિપૂરયે ।
ભોગાન્નાનાવિધાંશ્ચૈવ પુત્રપૌત્રાદિસમ્પદઃ ॥ ૨૬॥

યં યમિચ્છતિ તં તં ચ દાસ્યેઽહં નાત્ર સંશયઃ ।
ભુક્તિમુક્તિપ્રદં ચૈતદ્બ્રહ્મભૂયકરં ભવેત્ ॥ ૨૭॥

નાનાસિદ્ધિપ્રદં ચૈવ હૃદિ બુદ્ધિપ્રકાશકમ્ ।
સુરેન્દ્રૈર્વન્દ્યતાં યાતિ યો માં સ્તૌતિ ત્વનેન સઃ ॥ ૨૮॥

સહસ્રાવર્તનાન્ મર્ત્યઃ કારાગૃહગતં નરમ્ ।
મોચયેન્નાત્ર સન્દેહો મત્પ્રિયઃ સર્વદા ભવેત્ ॥ ૨૯॥

અપરાધશતૈર્યુક્તો યો વૈ ભવતિ માનવઃ ।
તસ્યાપરાધસહનં કરોમિ સ્તોત્રપાઠતઃ ॥ ૩૦॥

એકવિંશતિવારં ય એકવિંશદ્દિનાનિ વૈ ।
પઠિષ્યતિ સદા તસ્મૈ ચિન્તિતં પ્રદદામ્યહમ્ ॥ ૩૧॥

એકવિંશતિકાઃ શ્લોકા ભવદ્ભિર્મત્પ્રિયાત્મકૈઃ ।
કૃતાસ્તૈર્માં સ દેવાસ્તુ સ્તુતા વૈ મુનયોઽખિલાઃ ॥ ૩૨॥

તેન વિઘ્નવિહીનાશ્ચ સ્વધર્મરુચયસ્તથા ।
ભવિષ્યથ મહાભાગા ભુક્તિમુક્તિપ્રદાસ્તથા ॥ ૩૩॥

વરં બ્રૂત મહાભાગા યેષાં યન્મનસિ સ્થિતમ્ ।

તદ્દાસ્યામિ ન સન્દેહઃ સ્તોત્રસન્તોષિતો હ્યહમ્ ॥ ૩૪॥

મુદ્ગલ ઉવાચ ।
એવમુક્તાઃ સુરાઃ સર્વે મુનયસ્તં પ્રણમ્ય ચ ।
પ્રહૃષ્ટમાનસા ઊચુર્વક્રતુણ્ડં મહાબલમ્ ॥ ૩૫॥

દેવર્ષય ઊચુઃ ।
યદિ પ્રસન્નતાં યાતો વક્રતુણ્ડ દદાસિ ચેત્ ।
ત્વદીયામચલાં ભક્તિં દેહિ નાથ દયાનિધે ॥ ૩૬॥

યદિ પ્રાપ્તા ત્વદીયા ચ ભક્તિર્જન્તોસ્તદા પ્રભો ।
કિં દુર્લભં ભવેત્તસ્ય હસ્તગાઃ સર્વસિદ્ધયઃ ॥ ૩૭॥

અતો ભક્તિં મહાભાગ દેહિ નો વિઘ્નનાયક ।
તયા તૃપ્તા ભવિષ્યામસ્ત્વત્પાદપ્રવણા વયમ્ ॥ ૩૮॥

તેષાં વચનમાકર્ણ્ય દેવદેવો ગજાનનઃ ।
જગાદ ભાવગમ્ભીરં જ્ઞાતા વિજ્ઞજનપ્રિયઃ ॥ ૩૯॥

વક્રતુણ્ડ ઉવાચ ।
મદીયા ભક્તિરચલા ભવિષ્યતિ ન સંશયઃ ।
ભવતાં ભાવયુક્તાનાં ભો ભો દેવર્ષયઃ ખલુ ॥ ૪૦॥

અન્તર્દધે સ ઉક્ત્વૈવં વક્રતુણ્ડો ગણેશ્વરઃ ।
પશ્યતાં મુનિદેવાનાં સ્વાનન્દસ્થો બભૂવ હ ॥ ૪૧॥

તતો દેવર્ષયઃ સર્વે ખિન્નાઃ સ્વસ્વપદં યયુઃ ।
(Page ખં. ૧ અ. ૪૦ પાન ૯૦)
ધ્યાયન્તશ્ચ તમેવૈતે વક્રતુણ્ડં સુસિદ્ધિદમ્ ॥ ૪૨॥

મત્સરોઽપિ તતઃ સર્વૈર્દૈત્યૈઃ પરિવૃતો યયૌ ।
સ્વં પદં પાલયન્ શીઘ્રં સુશાન્તો હ્યભવત્ સદા ॥ ૪૩॥

તં ત્યક્ત્વા દૈત્યસઙ્ઘાસ્તે યયુઃ સ્વં સ્વં ગૃહં મુને ।
એવં મત્સરમાહાત્મ્યં વક્રતુણ્ડેન કારિતમ્ ॥ ૪૪॥

સ એવ વક્રતુણ્ડસ્તુ સૃજત્યવતિ ચ પ્રભુઃ ।
હરતે ભાવહીનઃ સન્ નાદ્યમધ્યાન્તગઃ સ્વયમ્ ॥ ૪૫॥

એવં નાનાવતારેણ સ્વસ્વધર્મરતાન્ સુરાન્ ।

અસુરાન્ માનવાદીંશ્ચ કુરુતે વક્રતુણ્ડકઃ ॥ ૪૬॥

અવતારા અનન્તાશ્ચ વક્રતુણ્ડસ્ય ભો વિભો ।
ચરિત્રમખિલં તેષાં કથિતું શક્યતે ન વૈ ॥ ૪૭॥

બ્રહ્મણા ષણ્મુખેનાઽપિ વિષ્ણુના શઙ્કરેણ ચ ।
શેષેણ મુનિભિશ્ચૈવ વેદૈઃ કાહં ચ તત્ર વૈ ॥ ૪૮॥

દિવોદાસશમાર્થાય સ એવં વક્રતુણ્ડકઃ ।
શિવપુત્રત્વમાપન્નો ઢુણ્ઢિરાજેતિ નામતઃ ॥ ૪૯॥

વામનસ્ય વરં દાતું સ એવ ગણનાયકઃ ।
પ્રકટોઽભૂન્ મહાતેજાસ્તસ્યાગ્રે ભક્તપાલકઃ ॥ ૫૦॥

એવં નાનાવતારૈશ્ચ ભક્તરક્ષણલાલસઃ ।
કરોતિ ભક્તસંરક્ષાં જાનીહિ ત્વં પ્રજાપતે ॥ ૫૧॥

બ્રહ્મણા સૃષ્ટિકાર્યાર્થં વ્યાકુલેન સ ન સ્મૃતઃ ।
વક્રતુણ્ડસ્તતો દૈત્યો મત્સરઃ પ્રવિવેશ તમ્ ॥ ૫૨॥

તેનાસુરસ્વભાવેન પીડિતો વિધિરદ્ભુતમ્ ।
વિઘ્નયુક્તોઽભવત્તત્ર સૃષ્ટિં કર્તું ન સ ક્ષમઃ ॥ ૫૩॥

પુરાતનં વચઃ સ્મૃત્વા પુનસ્તં શરણં યયૌ ।
વિધિર્વિઘ્નવિહીનઃ સ સસર્જ સકલં જગત્ ॥ ૫૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે વક્રતુણ્ડાન્તર્ધાનં નામૈકોનચત્વારિંશોઽધ્યાયઃ ॥ ૧.૩૯

## ૧.૪૦ બ્રહ્મણસ્તપશ્ચરણં નામ ચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
ધન્યોઽસ્મ્યનુગૃહીતોઽસ્મિ યત્ત્વયા શ્રાવિતં મહત્ ।
ચરિત્રં વક્રતુણ્ડસ્ય બ્રહ્મભૂયકરં મહત્ ॥ ૧॥

શ્રુત્વા શ્રુત્વા ન મે તૃપ્તિર્જાયતેઽમૃતતો યથા ।
ઇચ્છામિ તત્પુનઃ શ્રોતું પૂજિતો વિધિના કથમ્ ॥ ૨॥

વિસ્તરેણ ચ મે બ્રૂહિ કથાં પાપાપનોદિનીમ્ ।

શ્રોતુઃ પ્રષ્ટુશ્ચ વક્તુશ્ચ ત્રયાણાં સર્વસિદ્ધિદામ્ ॥ ૩॥

સૂત ઉવાચ ।
દક્ષસ્ય વચનં શ્રુત્વા મુદ્ગલસ્તમુવાચ હ ।
ઉત્ફુલ્લનયનો હર્ષાદ્ગાણેશેન્દ્રઃ સ શૌનક ॥ ૪॥

મુદ્ગલ ઉવાચ ।
શ‍ૃણુ દક્ષ મહાભાગ ધન્યોઽસિ ન ચ સંશયઃ ।
યેન તે ગણરાજસ્ય કથાયાં પ્રીતિરદ્ભુતા ॥ ૫॥

અલ્પપુણ્યવતો ઢુણ્ઢિકથાયા અવધારણે ।
શ્રવણે ચ તથા પ્રીતિર્જાયતે ન કદાચન ॥ ૬॥

અતસ્તેહં પ્રવક્ષ્યામિ ત્વદાદરસુતોષિતઃ ।
સઙ્ક્ષેપેણ કથાં દિવ્યાં ગણેશસ્ય મહાત્મનઃ ॥ ૭॥

પ્રલયાદૌ ગણેશેન સૃષ્ટાઃ પઞ્ચ સુરાધિપાઃ ।
તેષાં તપઃપ્રભાવેણ પ્રસન્નો વરદોઽભવત્ ॥ ૮॥

વરસ્યૈવ પ્રભાવેણ સમર્થાસ્તે બભૂવિરે ।
(Page ખં. ૧ અ. ૪૦ પાન ૯૧)
સ્વસ્વકાર્યે પ્રવૃત્તાશ્ચ સાવધાનેન ચેતસા ॥ ૯॥

સૃષ્ટિપ્રકરણે બ્રહ્મા પ્રવૃત્તો જગતોઽભવત્ ।
ન સસ્માર ગણેશાનં વિસ્મૃત્યાદૌ તદર્ચનમ્ ॥ ૧૦॥

તેન ભ્રાન્તોઽભવત્ સદ્યો માનસે ગર્વમાદધે ।
ત્રિલોકે નૈવ મત્તુલ્યઃ સ્રષ્ટાઽહં નાત્ર સંશયઃ ॥ ૧૧॥

સૃજામિ સકલં વિશ્વં તદા વિષ્ણુશ્ચ પાતિ વૈ ।
રુદ્રઃ સંહરતે તચ્ચ શક્તિર્મોહં કરોતિ ચ ॥ ૧૨॥

સૂર્યઃ કર્મપ્રકાશં ચ કરોતિ જગતિ પ્રભુઃ ।
ન સૃષ્ટં ચેન્ મયા વિશ્વં દેવત્વં તુ નિરર્થકમ્ ॥ ૧૩॥

મમાજ્ઞાદૌ ગણેશેન કૃતા સૃષ્ટૌ વિશેષતઃ ।
મદીયાં પાત્રતાં દૃષ્ટ્વા તસ્માન્નાન્યોઽસ્તિ મત્સમઃ ॥ ૧૪॥

ઇતિ ગર્વેણ મનસિ મોહિતોઽભૂત્ પિતામહઃ ।
તતો વિઘ્નગણાસ્તત્ર પ્રબભૂવુરનેકશઃ ॥ ૧૫॥

સૃષ્ટિં વિરચયન્તં તં બ્રહ્માણં પ્રાપ્ય દારુણઃ ।
નાનારૂપા મહાવીર્યાસ્તાડયામાસુરોજસા ॥ ૧૬॥

ત્રિનેત્રાઃ પઞ્ચનેત્રાશ્ચ પૃષ્ઠનેત્રા મહાબલાઃ ।
દશતુણ્ડા સહસ્રં ચ મુખાનિ દધતઃ પરે ॥ ૧૭॥

એવં નાનાસ્વરૂપાસ્તે વિધિં ધૃત્વા પ્રરેમિરે ।
બાલક્રીડનકં કૃત્વા દુઃખયુક્તં મહાબલાઃ ॥ ૧૮॥

એવં સ પરવાન્ બ્રહ્મા ગર્વં સર્વં પ્રમુચ્ય વૈ ।
જગામ શરણં દેવં ગણેશં વિઘ્નનાયકમ્ ॥ ૧૯॥

ગતગર્વો હૃદિ સ્મૃત્વા તુષ્ટાવ ગણનાયકમ્ ।
તેન વિઘ્નગણાઃ સર્વેઽતર્ધાનં તત્ર ચક્રિરે ॥ ૨૦॥

મુક્તો વિઘ્નૈસ્તદા બ્રહ્મા તતાપ પરમં તપઃ ।
ષડક્ષરેણ મન્ત્રેણ વક્રતુણ્ડમતોષયત્ ॥ ૨૧॥

વાયુભક્ષોઽભવદ્બ્રહ્મા પાદાઙ્ગુષ્ઠાગ્રસંસ્થિતઃ ।
ચકાર તેજસા વૃત્તિં ગણેશે નિશ્ચલાં તતઃ ॥ ૨૨॥

એવં દિવ્યસહસ્રં સ તપસ્તેપે સુદારુણમ્ ।
તતો ભૂતાનિ સર્વાનિ વ્યાકુલાણિ તદાઽભવન્ ॥ ૨૩॥

તતસ્તસ્યોગ્રતપસા પ્રસન્નો વક્રતુણ્ડકઃ ।
આયયૌ ભક્તરાજં તં ભક્તિભાવેન તોષિતઃ ॥ ૨૪॥

તેજોરૂપી મહાકાયો વક્રતુણ્ડશ્ચતુર્ભુજઃ ।
સિંહારૂઢસ્ત્રિનેત્રશ્ચ પાશાઙ્કુશધરો વિભુઃ ॥ ૨૫॥

વરદાભયહસ્તશ્ચ પૃથુવક્ષા મહોદરઃ ।
સિદ્ધિબુદ્ધિયુતશ્ચિન્તામણિના ચ વિરાજિતઃ ॥ ૨૬॥

નાનાલઙ્કારસંયુક્તઃ શેષનાભિર્ગજાનનઃ ।
સિન્દૂરારુણદેહશ્ચ નાનાવસ્ત્રધરઃ પ્રભુઃ ॥ ૨૭॥

તં દૃષ્ટ્વા ભયભીતોઽસૌ વિધાતા સ્તૌતિ તં પરમ્ ।
ગણેશં હૃદિ સઞ્ચિન્ત્ય નાનાસ્તોત્રૈર્વિધાનતઃ ॥ ૨૮॥

વક્રતુણ્ડઃ સ્તુવન્તં તમુવાચ ઘનનિસ્વનઃ ।
વરં વૃણુ વિધાતસ્ત્વં દાસ્યામિ તુ ન સંશયઃ ॥ ૨૯॥

ઇતિ તસ્ય વચઃ શ્રુત્વા બ્રહ્મા તં પ્રણનામ ચ ।
ઉવાચ સૌમ્યરૂપેણ વરં દેહિ ગજાનન ॥ ૩૦॥

બ્રહ્મણો ગિરમાકર્ણ્ય સૌમ્યતેજા ગજાનનઃ ।
ઉવાચ તં મહાભાગં ભક્તિભાવેન તોષિતઃ ॥ ૩૧॥

વક્રતુણ્ડ ઉવાચ ।
સ્વાનન્દનગરે સંસ્થં સદૈતાદૃશરૂપકમ્ ।
મૃત્યુલોકે સ્થિતસ્ત્વં ચ કથં દ્રક્ષ્યસિ માનદ ॥ ૩૨॥

તપસા ભક્તિભાવેન તોષિતોઽહં ત્વયા વિધે ।
તેન સૌમ્યસ્વરૂપેણ ત્વદગ્રે સંસ્થિતોઽભવમ્ ॥ ૩૩॥

ત્વં તુ મત્તો વરાન્ બ્રૂહિ દાસ્યેઽહં વાઞ્છિતાન્ પરાન્ ।
(Page  ખં. ૧ અ. ૪૧ પાન ૯૨)
મયિ પ્રસન્નતાં યાતે દુર્લભં ન ભવિષ્યતિ ॥ ૩૪॥

ગણેશવચનં શ્રુત્વા બ્રહ્મા તં પ્રણનામ ચ ।
બધ્દ્વાઞ્જલિપુટો ભૂત્વા સ્તોતું તમુપચક્રમે ॥ ૩૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે બ્રહ્મણસ્તપશ્ચરણં નામ ચત્વારિંશોઽધ્યાયઃ ॥ ૧.૪૦

## ૧.૪૧ દમ્ભાસુરરાજ્યાભિષેકો નામ એકચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

બ્રહ્મોવાચ ।
નમસ્તે વક્રતુણ્ડાય ગણેશાય મહાત્મને ।
અનન્તાનન્તપારાય વિઘ્નેશાય નમો નમઃ ॥ ૧॥

નમો ભક્તિપ્રિયાયૈવ ભક્તસંરક્ષકાય તે ।
અભક્તકામનાશાય સર્વદાત્રે નમો નમઃ ॥ ૨॥

નિર્ગુણાય નિરૂપાય નિર્મલાય ગુણાત્મને ।
અનન્તાનનધારાય સિંહવાહાય તે નમઃ ॥ ૩॥

અનાદિરૂપકાયૈવ નમઃ સર્વપ્રિયઙ્કર ।

વેદાન્તવેદ્યદેહાય ગજવક્ત્રાય તે નમઃ ॥ ૪॥

અનન્તોદરસંસ્થાય નાનાભોગકરાય તે ।
માયાધારાય માયાયા મોહકાય નમો નમઃ ॥ ૫॥

અમેયશક્તયે તુભ્યમનાધારાય દંષ્ટ્રિણે ।
ચતુર્બાહુયુતાયૈવ સ્વાનન્દપતયે નમઃ ॥ ૬॥

સિદ્ધિબુદ્ધિપ્રદાયૈવ સિદ્ધિબુદ્ધિધરાય ચ ।
બ્રહ્મભૂતાય દેવાય વિઘ્નહર્ત્રે નમોઽસ્તુ તે ॥ ૭॥

વક્રતુણ્ડ પ્રસન્નસ્ત્વં મહ્યં દેહિ તદાનઘ ।
ત્વદીયામચલાં ભક્તિં યયા બન્ધો ન વિદ્યતે ॥ ૮॥

ત્વદાજ્ઞયા પ્રવૃત્તોઽહં તત્ર સામર્થ્યમદ્ભુતમ્ ।
સૃષ્ટૌ દેહિ ગણાધીશ વિઘ્નહીનં ચ મે સદા ॥ ૯॥

અહં સ્રષ્ટા ચ સર્વેષાં ત્વયા પ્રોક્તો ગજાનન ।
અતસ્ત્વં પુત્રભાવેન ગૃહે મે તિષ્ઠ માયયા ॥ ૧૦॥

ત્વં સાક્ષાદ્બ્રહ્મભૂતશ્ચેદ્યદિ પુત્રો ભવિષ્યસિ ।
તદાહં બન્ધનાન્મુક્તો ભવિષ્યામિ ચ રાજસાત્ ॥ ૧૧॥

તવ માતા પિતા સ્વામિન્ બન્ધયુક્તૌ કૃતૌ યદિ ।
તદા વેદાદિકં સર્વં મિથ્યાભૂતં ભવિષ્યતિ ॥ ૧૨॥

નામગ્રહણમાત્રેણ બ્રહ્મભૂયપ્રદો ભવાન્ ।
કિં પુનઃ પુત્રભાવેન ત્વં ચેત્ સ્થાસ્યસિ મે ગૃહે ॥ ૧૩॥

અન્યચ્ચ લાલનં કુર્યાં સેવનં પૂજનં તથા ।
નિરન્તરં પ્રપશ્યેયં ભવેયમતુલસ્તતઃ ॥ ૧૪॥

બ્રહ્મણો વચનં તસ્ય શ્રુત્વા ગણપતિઃ સ્વયમ્ ।
જગાદ તં મહાભાગં હર્ષયન્ સર્વભાવવિત્ ॥ ૧૫॥

વક્રતુણ્ડ ઉવાચ ।
ત્વયા યત્ પ્રાર્થિતં બ્રહ્મન્ તદસ્તુ સકલં કિલ ।
સૃષ્ટિકતૃર્ત્વસામર્થ્યમદ્ભુતં તે ભવિષ્યતિ ॥ ૧૬॥

નિર્વિઘ્નં સર્વકાર્યેષુ મત્સ્મૃત્યા પ્રભવિષ્યતિ ।
યં યમિચ્છસિ તં તં ત્વં કામં પ્રાપ્સ્યસિ સર્વદા ॥ ૧૭॥

તવ પુત્રો ભવિષ્યામિ તારકો માયયાંશતઃ ।
વાઞ્છિતં પૂરયિષ્યામિ ભક્તિભાવેન તોષિતઃ ॥ ૧૮॥

ત્વયા કૃતમિદં સ્તોત્રં સર્વદં પ્રભવિષ્યતિ ।
મમ પ્રીતિકરં બ્રહ્મન્ બ્રહ્મભૂયપ્રદં તથા ॥ ૧૯॥

(Page ખં. ૧ અ. ૪૧ પાન ૯૩)
ઇત્યુક્ત્વાન્તર્દધે દક્ષ વક્રતુણ્ડઃ પ્રતાપવાન્ ।
બ્રહ્માઽપિ વિમના ભૂત્વા તત્ર વૈ સંસ્થિતોઽભવત્ ॥ ૨૦॥

વક્રતુણ્ડપ્રસાદેન નિર્મમે સકલં જગત્ ।
ચરાચરમયં સર્વં યથાયોગ્યં ચકાર હ ॥ ૨૧॥

સૃષ્ટ્વા ત્રિભુવનં સર્વં કૃતકૃત્ય ઇવાઽભવત્ ।
સ્થિતઃ સ્વસુખનિષ્ઠઃ સન્ વક્રતુણ્ડં સ સંસ્મરન્ ॥ ૨૨॥

એકદા વાયુવેગેન કમ્પિતઃ સ પ્રજાપતિઃ ।
તસ્માત્ પુરુષરૂપેણ દમ્ભશ્ચ પ્રકટોઽભવત્ ॥ ૨૩॥

તત્પુરઃ પુરુષશ્રેષ્ઠશ્ચતુર્બાહુધરઃ ખલઃ ।
ગદાચક્રત્રિશૂલાસ્ત્રધનુર્બાણધરો બભૌ ॥ ૨૪॥

રૂપેણ તેજસા પૂર્ણો વીર્યેણ હ્યતુલઃ પરઃ ।
મહાકાયો મહાબાહુઃ સ્થિતઃ પર્વતસન્નિભઃ ॥ ૨૫॥

તં દૃષ્ટ્વા વિસ્મિતો બ્રહ્મા પપ્રચ્છ ચ નરં તતઃ ।
કસ્ય ત્વં કુત આયાતઃ કિં કાર્યં તેઽત્ર વર્તતે ॥ ૨૬॥

વદ મે પૃચ્છતે સર્વં મહાબલપરાક્રમ ।
ધન્યોઽસિ રૂપલાવણ્યયુક્તઃ પરમશોભનઃ ॥ ૨૭॥

બ્રહ્મણો વચ આકર્ણ્ય મેઘગમ્ભીરયા ગિરા ।
ઉવાચ તં વિધાતારં સ્મયમાન ઇદં વચઃ ॥ ૨૮॥

પુરુષ ઉવાચ ।
વિધેઽહં ત્વાં પ્રજાનામિ પ્રભાવાન્ મે ચ માનદ ।
તવાઙ્ગકમ્પસમ્ભૂતં માં જાનીહિ પ્રજાપતે ॥ ૨૯॥

દેહિ મે નામ યોગ્યં ત્વં પુત્રોઽહં તે ચ સુવ્રત ।

સ્થાનં દેહિ તથા વૃત્તિં યોગક્ષેમકરીં પરામ્ ॥ ૩૦॥

વચસ્તસ્ય સમાકર્ણ્ય તમૂચે પદ્મસમ્ભવઃ ।
હાસ્યં કૃત્વા મહાબાહુઃ પ્રીણયન્ વાક્યમાદરાત્ ॥ ૩૧॥

બ્રહ્મોવાચ ।
કિં માં જાનાસિ પુત્ર ત્વં દમ્ભેન પ્રબ્રવીષિ રે ।
અતસ્ત્વં દમ્ભનામા વૈ ભવિષ્યસિ મહાખલઃ ॥ ૩૨॥

યત્ર તત્ર ગતિસ્તે વૈ ભવિષ્યતિ મહાસુર ।
ભોગાન્નાનાવિધાન્ ભુઙ્ક્ષ્વ યથારુચિ યથાસુખમ્ ॥ ૩૩॥

એવમુક્તો મહાબાહુસ્તં જગામ પ્રણમ્ય સઃ ।
પ્રદક્ષિણીકૃત્ય વિધિં ક્ષિતિમણ્ડલમાદરાત્ ॥ ૩૪॥

તત્રાગત્ય વિચારં સ કૃતવાન્ માનસે ખલઃ ।
બ્રહ્મણાઽસત્કૃતોઽહં વૈ તસ્ય ગર્વં હરામ્યહમ્ ॥ ૩૫॥

વિચાર્ય સહસા દમ્ભો જગામ શરણં કવિમ્ ।
તેનોપદિષ્ટમન્ત્રેણ બ્રહ્માણં સમતોષયત્ ॥ ૩૬॥

એકપાદેન તિષ્ઠન્ સન્નિરાહારપરાયણઃ ।
તતાપ તપ ઉગ્રં વૈ વર્ષાણામયુતં ગતમ્ ॥ ૩૭॥

તસ્યૈવ તપસા સર્વં વ્યાકુલં સચરાચરમ્ ।
ન સ્થાતુમશકત્ સ્થાને ભયભીતં બભૂવ હ ॥ ૩૮॥

તત્ દૃષ્ટ્વા પરમાશ્ચર્યં બ્રહ્મા દેવગણૈઃ સહ ।
આયયૌ તં વરં દાતું તપસા તોષિતઃ પ્રભુઃ ॥ ૩૯॥

કાષ્ઠવત્તં સ્થિતં વીક્ષ્ય વિસ્મિતઃ કમલાસનઃ ।
જગાદ તં મહાભાગં હર્ષયન્નિવ ભાષયા ॥ ૪૦॥

બ્રહ્મોવાચ ।
વરં વૃણુ મહાભાગ યં યં મનસિ સંસ્થિતમ્ ।
ઈપ્સિતં પૂરયિષ્યામિ નાત્ર કાર્યા વિચારણા ॥ ૪૧॥

બ્રહ્મણો વચનં શ્રુત્વા દમ્ભઃ પરમહર્ષિતઃ ।
તં પ્રણમ્ય પ્રતુષ્ટાવ બદ્ધાઞ્જલિપુટો બલી ॥ ૪૨॥

દમ્ભ ઉવાચ ।

નમસ્તે સૃષ્ટિકર્ત્રે વૈ સૃષ્ટિપાત્રે પ્રજાપતે ।
સૃષ્ટિહર્ત્રે ત્રિરૂપાય બ્રહ્મવિષ્ણુશિવાત્મને ॥ ૪૩॥

ત્વયા તતમિદં સર્વં ત્વદાધારં મહાપ્રભો ।
(Page ખં. ૧ અ. ૪૨ પાન ૯૪)
ત્વયિ સુપ્તે જગન્નષ્ટં ભવિષ્યતિ ન સંશયઃ ॥ ૪૪॥

ચરાચમયો ભૂત્વા ક્રીડસિ ત્વં પિતામહ ।
એકાનેકપ્રભેદેન ત્વં સ્થિતોઽસિ જગત્પ્રભો ॥ ૪૫॥

અણુભ્યોઽણુતરસ્ત્વં ચ મહદ્ભ્યશ્ચ મહાન્ કિલ ।
કસ્ત્વાં સ્તોતું સમર્થઃ સ્યાદ્ બ્રહ્માકારેણ સંસ્થિતમ્ ॥ ૪૬॥

મહદ્ભાગ્યં વિભો મેઽદ્ય યેન તે દર્શનં પરમ્ ।
પ્રાપ્તં સકલપાપઘ્નમગ્રે શુભકરં તથા ॥ ૪૭॥

યદિ પ્રસન્નતાં યાતો યદિ દેયો વરો મહાન્ ।
તદા મે વાઞ્છિતં સર્વં પૂરયસ્વ પ્રજાપતે ॥ ૪૮॥

રાજ્યં ત્રૈલોક્યસ્ય તથા મહ્યં દેહિ પિતામહ ।
પઞ્ચભૂતાત્મકેભ્યશ્ચ મૃત્યુર્ન ચ કદા ભવેત્ ॥ ૪૯॥

સઙ્ગ્રામે મત્સમઃ કશ્ચિન્નાન્યઃ સ્યાન્ માં કુરુ પ્રભો ।
અખણ્ડૈશ્વર્યસંયુક્તમારોગ્યાદિસમન્વિતમ્ ॥ ૫૦॥

ઇતિ તસ્ય વચઃ શ્રુત્વા બ્રહ્મા તં પ્રત્યુવાચ હ ।
તપસા તોષિતસ્તસ્મૈ દાતુમુત્સુકતાં ગતઃ ॥ ૫૧॥

બ્રહ્મોવાચ ।
ત્વયા યત્પ્રાર્થિતં દમ્ભ તત્સર્વં પ્રભવિષ્યતિ ।
અન્યદ્યચ્ચિન્તિતં તત્તે સિદ્ધરૂપં ભવિષ્યતિ ॥ ૫૨॥

ઇત્યુક્ત્વાન્તર્દધે બ્રહ્મા દમ્ભઃ સંહર્ષિતોઽભવત્ ।
સ્વગૃહં પ્રજગામાસૌ મહાબલપરાક્રમઃ ॥ ૫૩॥

નગરં શોભનં નામ કારયામાસ દર્પિતઃ ।
પૃથિવ્યાં સર્વશોભાઢ્યં વાસં તત્ર ચકાર હ ॥ ૫૪॥

તતો દૈત્યગણાઃ સર્વે શુક્રેન પ્રેરિતા મુને ।
આયયુસ્તત્ર દમ્ભસ્ય નગરે હર્ષિતા ભૃશમ્ ॥ ૫૫॥

શુક્રઃ સમાગતસ્તત્ર મુનિભિર્બ્રહ્મવાદિભિઃ ।
દૈત્યરાજ્યં સ દમ્ભાયાઽભવદ્દાતું સ ઉદ્યતઃ ॥ ૫૬॥

શુભે લગ્ને મુહૂર્તે ચ સોઽભિષેકમકારયત્ ।
બ્રાહ્મણૈર્દૈત્યરાજાનાં રાજા દમ્ભો બભૂવ હ ॥ ૫૭॥

મહોત્સવં હર્ષિતાસ્તે ચક્રુઃ સર્વે સમાગતાઃ ।
હૃષ્ટપુષ્ટજનાકીર્ણં નગરં શુશુભે ભૃશમ્ ॥ ૫૮॥

સર્વે સ્વસ્વગૃહે જગ્મુસ્તતો હર્ષસમન્વિતાઃ ।
મુખ્યાશ્ચ સંસ્થિતાસ્તત્ર દૈત્યાઃ પરમદારુણાઃ ॥ ૫૯॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે દમ્ભાસુરરાજ્યાભિષેકો નામ એકચત્વારિંશોઽધ્યાયઃ ॥ ૧.૪૧

## ૧.૪૨ દમ્ભાસુરવિજયો નામ દ્વિચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
નગરે દમ્ભદૈત્યસ્ય મહોત્સવયુતા બભુઃ ।
જનાઃ સર્વે મહાભાગાઃ કઞ્ચિત્કાલં પ્રજાપતે ॥ ૧॥

એકદા દૈત્યપાઃ સર્વે યયુસ્તત્ર મહાબલમ્ ।
સુહુણ્ડશ્ચ તથા હુણ્ડો રુક્મકેતુર્મહાબલઃ ॥ ૨॥

મદ્યપશ્ચ સકોપશ્ચ તથા ક્રોધાસુરો મહાન્ ।
કામાસુરો બલાઢ્યશ્ચ રાસભાસુર એવ ચ ॥ ૩॥

ઇત્યાદ્યા બહવશ્ચાન્યે દમ્ભં શોભાસમન્વિતમ્ ।
પ્રણમ્યોચુર્મહાત્માન ઉત્સુકા દેવનાશને ॥ ૪॥

દૈત્યેશા ઊચુઃ ।
કિં સ્થિતોઽસિ મહારાજ વયં દાસાઃ સમાગતાઃ ।
ત્રિભુવનં પ્રજેષ્યામો દેવમર્દનલાલસાઃ ॥ ૫॥

(Page ખં. ૧ અ. ૪૨ પાન ૯૫)
તવાજ્ઞાવશગાઃ સર્વે દૈત્યદાનવરાક્ષસાઃ ।
બ્રહ્માણ્ડે ન ભવેત્તુલ્યસ્તવ દમ્ભ બલેન વા ॥ ૬॥

યશસા તેજસા ચૈવ ન સમસ્તે સુરાધિપ ।
આજ્ઞાપય મહાબાહો જેષ્યામઃ સકલં જગત્ ॥ ૭॥

દૈત્યેશાનાં વચઃ શ્રુત્વા દમ્ભદૈત્યઃ પ્રહર્ષિતઃ ।
ઉવાચ તાન્ મહાભાગાન્ ભાવયુક્તેન ચેતસા ॥ ૮॥

દમ્ભાસુર ઉવાચ ।
સમ્યગુક્તં મહાભાગા મમાપિ હૃદયે સ્થિતમ્ ।
ભવદ્ભિઃ સહિતોઽહં વૈ જેષ્યામિ સચરાચરમ્ ॥ ૯॥

એવમુક્ત્વા સ દૈત્યેશઃ શુક્રં તત્રાનયન્મુને ।
મતં તસ્ય સમાદાય નિર્જગામ તતઃ પુરાત્ ॥ ૧૦॥

અપારસેનયા સાર્ધં ચતુરઙ્ગસુયુક્તયા ।
સર્વે પૃથિવ્યાં રાજાનો જિતા દૈત્યૈર્મહાબલૈઃ ॥ ૧૧॥

પાતાલેષુ ચ સર્વાન્ વૈ નાગાન્ જિત્વા દિવં યયુઃ ।
તત્રેન્દ્રો દેવદેવેન્દ્રૈર્યુયુધે સોઽસુરૈઃ સહ ॥ ૧૨॥

તેન દૈત્યગણાઃ સર્વે ભયભીતાઃ સમન્તતઃ ।
વજ્રપાતૈર્મહાઘોરૈશ્ચૂર્ણિતા જ્વાલિતાસ્તથા ॥ ૧૩॥

અસુરા રણભૂમિં ચ ત્યક્ત્વા સર્વે પલાયિતાઃ ।
તતો દમ્ભાસુરસ્તત્ર યુયુધે બલગર્વિતઃ ॥ ૧૪॥

ચક્રપાતેન દેવેન્દ્રં મૂર્ચ્છિતં ચ ચકાર હ ।
દેવાન્ બાણાર્દિતાન્ સર્વાન્ કારયામાસ દૈત્યપઃ ॥ ૧૫॥

લબ્ધ્વા સંજ્ઞાં સુરેન્દ્રો વૈ પલાયત જિજીવિષુઃ ।
તતો દેવગણાસ્તં ચાન્વગુઃ સર્વે ભયાતુરાઃ ॥ ૧૬॥

દૈત્ય ઐરાવતારૂઢો દેવેન્દ્રસ્યાસને સ્થિતઃ ।
અમરાણાં પુરીં ગત્વા હર્ષિતો હર્ષયન્ સ્વકાન્ ॥ ૧૭॥

ઇન્દ્રો દેવગણૈઃ સર્વૈર્બ્રહ્માણં શરણં યયૌ ।
બ્રહ્મણા સહ વિષ્ણું ચ તેન સાર્દ્ધં શિવં યયૌ ॥ ૧૮॥

શિવઃ ક્રોધસમાયુક્ત આયયૌ રણમૂર્ધનિ ।
જુહાવ દૈત્યરાજં તં સઙ્ગ્રામાય મહાબલમ્ ॥ ૧૯॥

તતો દૈત્યેશસંયુક્તો દમ્ભદૈત્યઃ સમાયયૌ ।

ક્રોધસંરક્તચક્ષુસ્તં સન્નદ્ધો બલસંયુતઃ ॥ ૨૦॥

તતઃ સમભવદ્યુદ્ધં દારુણં રોમહર્ષણમ્ ।
દૈત્યાનાં ચૈવ દેવાનાં પરસ્પરવિનાશનમ્ ॥ ૨૧॥

ચત્વારિંશદ્દિનાન્યત્ર તુમુલં નીતિસંયુતમ્ ।
શોણિતૌઘા મહાનદ્યો જાતાઃ પ્રેતસમાકુલાઃ ॥ ૨૨॥

તતો દમ્ભઃ સ્વયં ક્રુદ્ધો બાણૈર્દેવાનમર્દયત્ ।
ચકાર દેવરાજાંસ્તાન્ મૂર્ચ્છિતાન્ ધરણિં ગતાન્ ॥ ૨૩॥

તતઃ શમ્ભુસ્ત્રિશૂલેન તં જઘાન મહાબલમ્ ।
પપાત મૂર્ચ્છયા દૈત્યઃ ક્ષણાદુત્થિતવાન્ પુનઃ ॥ ૨૪॥

તત્યાજ બલવાંશ્ચક્રં પાતયામાસ શઙ્કરમ્ ।
મૂર્ચ્છિતં પ્રહરાર્દ્ધં ચ દમ્ભદૈત્યઃ પ્રતાપવાન્ ॥ ૨૫॥

દૃષ્ટ્વાઽદ્ભુતં મહાવીર્યં દૈત્યરાજસ્ય શઙ્કરઃ ।
પલાયત સસંજ્ઞઃ સન્ વને વૈ દેવસંયુતઃ ॥ ૨૬॥

દેવેન્દ્રાન્ ગચ્છતો દૃષ્ટ્વા જહસુર્દૈત્યનાયકાઃ ।
આનન્દેન સમાયુક્તા વિવિશુસ્ત્વમરાવતીમ્ ॥ ૨૭॥

તતઃ સ સત્યલોકે ચ વૈકુણ્ઠે દૈત્યનાયકાન્ ।
કૈલાસે ચામરાવત્યાં સ્થાપયામાસ યત્નતઃ ॥ ૨૮॥

નાનાદેવપુરે રમ્યે સ્થાપયામાસ દાનવાન્ ।
આયયૌ શોભનાયાં સ સ્વપુર્યાં બલસંયુતઃ ॥ ૨૯॥

ચકાર રાજ્યમુન્મત્તસ્ત્રૈલોકસ્ય મહાબલઃ ।
તતઃ કર્મવિનાશાર્થમાજ્ઞાપયત દૈત્યપાન્ ॥ ૩૦॥

(Page ખં. ૧ અ. ૪૩ પાન ૯૬)
તદાજ્ઞયા યયુઃ સર્વે દૈત્યાઃ પરમદારુણાઃ ।
બ્રાહ્મણાદીન્ બબન્ધુસ્તે તાડયામાસુરોજસા ॥ ૩૧॥

યજ્ઞવાટાન્ બભઞ્જુસ્તે યજ્ઞવૃક્ષાદિકાન્ ખલાઃ ।
તીર્થાનિ લોપયામાસુર્દેવતાયતનાનિ ચ ॥ ૩૨॥

એવં નાનાવિધૈર્યત્નૈઃ કર્મલોપં પ્રચક્રિરે ।
કેચિદ્ભ્રષ્ટા દ્વિજાસ્તત્ર મૃતાઃ કેચિત્તદાઽભવન્ ॥ ૩૩॥

કેચિદ્વનં યયુસ્તત્ર સિંહવ્યાઘ્રાદિસઙ્કુલમ્ ।
સન્ધ્યાદિભિર્વિહીનાસ્તે દ્વિજાસ્તત્રાઽભવન્ કિલ ॥ ૩૪॥

ન સ્વાહા ન સ્વધા તત્ર ન વષટ્કાર એવ ચ ।
ન વર્ણાશ્રમધર્મશ્ચ દમ્ભે રાજ્યં પ્રકુર્વતિ ॥ ૩૫॥

વર્ણસઙ્કરરૂપા વૈ પ્રજા જાતા મહીતલે ।
તદા દેવગણાઃ સર્વે ભયભીતા બભૂવિરે ॥ ૩૬॥

કર્મભોગકરા દેવા નષ્ટે કર્મણિ શૌનક ।
મૃતપ્રાયા મૃતાઃ સર્વ ઇવ બ્રહ્માણમબ્રુવન્ ॥ ૩૭॥

દેવા ઊચુઃ ।
શરણં ત્વદૃતે દેવ કં યામ કમલાસન ।
ત્વં ધાતા ત્વં વિધાતા ચ સર્વેષાં પ્રાણધારકઃ ॥ ૩૮॥

ત્વં ગતિઃ સર્વદેવાનાં ત્વમેવ બ્રહ્મભાવિતઃ ।
અતોઽસ્માન્ રક્ષ દેવેશ દમ્ભાસુરભયાત્ પરાત્ ॥ ૩૯॥

કર્મહીનં કૃતં તેન ત્રૈલોક્યં સચરાચરમ્ ।
દેવાઃ કર્માન્નભોક્તારો મહાબુદ્ધે કૃતાસ્ત્વયા ॥ ૪૦॥

કર્માભાવેન જગતિ મરિષ્યામો ન સંશયઃ ।
અતસ્ત્વં સર્વદેવાંશ્ચ રક્ષસ્વ પ્રપિતામહ ॥ ૪૧॥

ત્વયૈવ ચાભયં દત્તં પાલિતાશ્ચ ત્વયા વયમ્ ।
અધુના ક્ષુધયાઽઽવિષ્ટા મરિષ્યામસ્ત્વદગ્રતઃ ॥ ૪૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમ ખણ્ડે વક્રતુણ્ડચરિતે દમ્ભાસુરવિજયો નામ દ્વિચત્વારિંશોઽધ્યાયઃ ॥ ૧.૪૨

## ૧.૪૩ દમ્ભાસુરદૂતસંવાદો નામ ત્રિચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
દેવેન્દ્રાણાં વચઃ ક્રૂરં શ્રુત્વા ચિન્તાતુરોઽભવત્ ।
ચર્તુમુખો વિચારં સ ચકારાઽત્ર તુ શોભનમ્ ॥ ૧॥

નાવાપ દેવરક્ષાર્થં બુદ્ધિં બુદ્ધિવિશારદઃ ।
તતશ્ચિન્તાં દુરન્તાં વૈ જગામ કમલાસનઃ ॥ ૨॥

જગાદ દેવમુખ્યાંસ્તુ ભયેન કમલાસનઃ ।
અહં યૂયં ચ સર્વેઽપિ પ્રાર્થયામો ગજાનનમ્ ॥ ૩॥

સ વૈ સર્વવિચારજ્ઞઃ કરિષ્યતિ શુભં મહત્ ।
અતસ્તત્ ધ્યાનકૌશલ્યાત્ ધ્યાયેમ ચ વિનાયકમ્ ॥ ૪॥

એકાક્ષરવિધાનેન વક્રતુણ્ડં યજામહે ।
શરણં સર્વદેવાનાં ભવિષ્યતિ ન સંશયઃ ॥ ૫॥

મુદ્ગલ ઉવાચ ।
બ્રહ્મણો ગિરમાકર્ણ્ય દેવા મુનિગણૈઃ સહ ।
પૂજયામાસુરવ્યગ્રા વક્રતુણ્ડં વિધાનતઃ ॥ ૬॥

બ્રહ્માઽપિ ધ્યાનસંયુક્તસ્તોષયામાસ વિઘ્નપમ્ ।
પુરા દૃષ્ટં તથા ચિત્તે સિદ્ધિબુદ્ધિયુતં મુને ॥ ૭॥

ગતેષુ શતવર્ષેષુ બ્રહ્માઽપશ્યચ્ચ તં હૃદિ ।
સાકારં ગુણસંયુક્તં વદન્તં મઞ્જુલા ગિરઃ ॥ ૮॥

દૃષ્ટ્વા વિસ્મિતચિત્તોઽસૌ યાવત્પૃચ્છતિ તં પ્રભુમ્ ।
(Page ખં. ૧ અ. ૪૩ પાન ૯૭)
તાવત્ સોઽપિ બહિર્યાતઃ સિદ્ધિબુદ્ધિસમન્વિતઃ ॥ ૯॥

બ્રહ્માણં બોધયામાસ વક્રતુણ્ડો મહાબલઃ ।
સુપ્રસન્નતરો જાતસ્તપસા ધ્યાનશાલિના ॥ ૧૦॥

વક્રતુણ્ડ ઉવાચ ।
પશ્ય માં પુત્રભાવેન પિતામહ ગણાધિપમ્ ।
તવ ધ્યાનાત્ સમુત્પન્નં ધ્યાનજં પ્રવદન્ત્યતઃ ॥ ૧૧॥

તપસા પૂર્વકાલે માં ત્વયા પુત્રત્વમાદરાત્ ।
યાચિતં સફલં તચ્ચ કૃતં તવ મયાઽધુના ॥ ૧૨॥

વચનં વક્રતુણ્ડસ્ય શ્રુત્વા બ્રહ્મા મુદા યુતઃ ।
બહિર્વીક્ષ્ય ગણેશાનં સિદ્ધિબુદ્ધિવિરાજિતમ્ ॥ ૧૩॥

પ્રણનામ સ સાષ્ટાઙ્ગ વક્રતુણ્ડં ગજાનનમ્ ।

સિદ્ધિં બુદ્ધિં વિધાનેન પૂજયામાસ યત્નતઃ ॥ ૧૪॥

તદ્ દૃષ્ટ્વા પરમાશ્ચર્યં દેવાઃ સર્વે સમાગતાઃ ।
ઋષયસ્તં મહાભાગાઃ પ્રણેમુર્ભક્તિભાવતઃ ॥ ૧૫॥

સુતં માનસિકં દૃષ્ટ્વા સિદ્ધિં બુદ્ધિં તથાત્મજે ।
તાભ્યાં સહ વિનીતાસ્તે તુષ્ટુવુર્બદ્ધપાણયઃ ॥ ૧૬॥

બ્રહ્માઽપિ પૂજનં કૃત્વા સ્તોતું સર્વૈઃ સમન્વિતઃ ।
ઉદ્યતોઽભૂન્ મહાતેજા વક્રતુણ્ડં સભાર્યકમ્ ॥ ૧૭॥

સદેવર્ષિબ્રહ્મોવાચ ।
નમસ્તે બ્રહ્મભૂતાય વક્રતુણ્ડાય સાક્ષિણે ।
સિદ્ધિબુદ્ધિયુતાયૈવ ગણેશાય નમો નમઃ ॥ ૧૮॥

વિઘ્નેશાય નમસ્તુભ્યં નિર્ગુણાય ગુણાત્મને ।
અનાદયે ચ સર્વજ્ઞ પાલકાય નમોઽસ્તુ તે ॥ ૧૯॥

નમસ્તે સર્વરૂપાય સર્વાધ્યક્ષાય ધીમતે ।
આદિમધ્યાન્તહીનાય સાક્ષાદ્દેવાય તે નમઃ ॥ ૨૦॥

અમેયશક્તયે તુભ્યં માયિભ્યો મોહદાય ચ ।
અમાયિને ચ માયાયા આધારાય નમો નમઃ ॥ ૨૧॥

સત્યાય સત્યરૂપાય સત્યપાલક રક્ષિણે ।
જ્ઞાનાય જ્ઞાનદાત્રે ચ જ્ઞાનગમ્યાય તે નમઃ ॥ ૨૨॥

લમ્બોદરાય દેવાય ગણાનાં પતયે નમઃ ।
ગણેશાય ગુણાધાર હેરમ્બાય નમો નમઃ ॥ ૨૩॥

ત્વાં સ્તોતું ન સમર્થાશ્ચ વેદાઃ શાસ્ત્રસમન્વિતાઃ ।
યોગીન્દ્રા દેવમુખ્યાશ્ચ તત્ર કોઽહં ગજાનન ॥ ૨૪॥

યથાબુદ્ધિ પ્રમોદેન સંસ્તુતોઽસિ ગણેશ્વર ।
તેન મે સફલં સર્વં જાતં લમ્બોદરાધુના ॥ ૨૫॥

બ્રહ્માણ્ડાનામનન્તાનાં કારકસ્ત્વં ન સંશયઃ ।
કથં મે પુત્રતાં યાતઃ સિદ્ધિબુદ્ધિસમન્વિતઃ ॥ ૨૬॥

સિદ્ધિબુદ્ધિયુતં બ્રહ્મ હૃદિ ધ્યાતં વિશેષતઃ ।
તદેવ બહિરાયાતં તારિતું માં ન સંશયઃ ॥ ૨૭॥

ઇત્યુક્ત્વા બ્રાહ્મણૈઃ સાર્ધં જાતકર્માદિકાં ક્રિયામ્ ।
ચકાર ચ સ્વયં બ્રહ્મા પરમાનન્દસંયુતઃ ॥ ૨૮॥

એકાદશદિને તસ્ય સિદ્ધિબુદ્ધિપતિસ્ત્વતિ ।
નામ સંસ્થાપયામાસ દ્વિજૈઃ સહ પિતામહઃ ॥ ૨૯॥

બાલક્રીડનભાવેન ક્રીડતિ સ્મ વિનાયકઃ ।
સાવિત્રી સ્તનપાનં સા કારયામાસ ભાવતઃ ॥ ૩૦॥

દિને દિનેઽથ બાલોઽસૌ વવૃધે શુક્લચન્દ્રવત્ ।
આનન્દં જનયન્ માતુઃ પિતુશ્ચ ચરિતૈઃ સ્વકૈઃ ॥ ૩૧॥

સિદ્ધિબુદ્ધિયુતો દક્ષ વર્ષદ્વયવયાઃ સ્થિતઃ ।
એકદા તં વિધાતારં પપ્રચ્છ વિનયાન્વિતઃ ॥ ૩૨॥

સિદ્ધિબુદ્ધિપતિરુવાચ ।
તાત કિં વનવાસં ત્વં કરોષિ મુનિભિઃ સહ ।
દેવૈઃ પરમદુઃખાર્તો મમ કિં ભાસસે પ્રભો ॥ ૩૩॥

તસ્ય તદ્વચનં શ્રુત્વા બ્રહ્મા હર્ષસમન્વિતઃ ।
જગાદ ગણપં સર્વં વૃત્તાન્તં દૈત્યસમ્ભવમ્ ॥ ૩૪॥

(Page ખં. ૧ અ. ૪૪ પાન ૯૮)
તચ્છ્રુત્વા કોપદીપ્તોઽસૌ વક્રતુણ્ડસ્તમબ્રવીત્ ।
હર્ષયન્ દેવવિપ્રાદીન્ મેઘગમ્ભીરનિસ્વનઃ ॥ ૩૫॥

વક્રતુણ્ડ ઉવાચ ।
દમ્ભાસુરં મહાવીર્યં હનિષ્યામિ ન સંશયઃ ।
દેવેભ્યો બ્રાહ્મણેભ્યશ્ચ સ્વપદાનિ દદામ્યહમ્ ॥ ૩૬॥

એવમુક્ત્વા સમારૂઢઃ સિંહં શસ્ત્રધરઃ પ્રભુઃ ।
સિદ્ધિબુદ્ધિયુતસ્તત્ર જગામાસુરવેશ્મનિ ॥ ૩૭॥

નગરપ્રાન્તભાગે સ સંસ્થિતો જગદીશ્વરઃ ।
તં દેવમુનયઃ સર્વે યયુર્હર્ષસમન્વિતાઃ ॥ ૩૮॥

દૂતમિન્દ્રં ગણેશશ્ચ પ્રેષયામાસ સત્વરઃ ।
સ્વધર્મે તિષ્ઠ દૈત્યેન્દ્ર નો ચેદ્ધન્મિ ન સંશયઃ ॥ ૩૯॥

ઇન્દ્રો ગત્વા મહાદૈત્યં સામપૂર્વમિદં વચઃ ।
ઉવાચ સર્વભાવજ્ઞો ભાવપૂર્વં સુરદ્વિષમ્ ॥ ૪૦॥

ઇન્દ્ર ઉવાચ ।
બ્રહ્મણઃ પુત્રતાં યાતં પૂર્ણં બ્રહ્મ સનાતનમ્ ।
સિદ્ધિબુદ્ધિપતિં વિદ્ધિ માનસં ધ્યાનયોગતઃ ॥ ૪૧॥

સ એવ મુનિભિર્દેવૈરાગતઃ પુરસન્નિધૌ ।
માં દૂતં પ્રેષયામાસ સામાર્થં તવ સન્નિધૌ ॥ ૪૨॥

સ્વધર્મે ત્વં સમાતિષ્ઠ દેવાઃ સન્તુ હવિર્ભુજઃ ।
વર્ણાશ્રમયુતા લોકાસ્તિષ્ઠન્તુ વિગતજ્વરાઃ ॥ ૪૩॥

ઇન્દ્રસ્ય વચનં શ્રુત્વા કુપિતોઽતિતરાં મુને ।
દમ્ભાસુર ઉવાચાઽથ તમિદ્રં પ્રદહન્નિવ ॥ ૪૪॥

દમ્ભાસુર ઉવાચ ।
કિં કરોમિ સમાયાતો દૂતરૂપેણ મે ગૃહે ।
નો ચેત્ત્વાં બન્ધયિત્વા તુ કારાગારે ક્ષિપામ્યહમ્ ॥ ૪૫॥

ઇન્દ્ર ગચ્છ મહાભાગ વદ તં ગણનાયકમ્ ।
પઞ્ચમે દિવસે ત્વાં ચ યોધયામિ ન સંશયઃ ॥ ૪૬॥

તત ઇન્દ્રઃ સમાયાતઃ સિદ્ધિબુદ્ધિપતિં પ્રતિ ।
કથયામાસ વૃત્તાન્તં વિસ્તરેણ યથાયથમ્ ॥ ૪૭॥

શ્રુત્વા ગણપતિઃ પ્રીતસ્તમુવાચ મહામતિમ્ ।
સમીચીનં ત્વયા તત્ર કૃતં દેવપતે યથા ॥ ૪૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે દમ્ભાસુરદૂતસંવાદો નામ ત્રિચત્વારિંશોઽધ્યાયઃ ॥ ૧.૪૩

## ૧.૪૪ દમ્ભાસુરવિચારો નામ ચતુશ્ચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
દેવેન્દ્રે પ્રસ્થિતે તત્ર ગણેશસ્યૈવ સન્નિધૌ ।
દમ્ભાસુરઃ કવિં વિપ્રમાહ્વયામાસ સન્નિધૌ ॥ ૧॥

સમાગતં મહાબુદ્ધિં શુક્રં મુનિવરં પ્રભો ।
પ્રણનામ સસાષ્ટાઙ્ગં બદ્ધાઞ્જલિપુટઃ સ્થિતઃ ॥ ૨॥

તં કાવ્યઃ સ્થાપયામાસ કાઞ્ચનોત્તર આસને ।
પપ્રચ્છ મામાહ્વયસે કિમર્થમિતિ દાનવમ્ ॥ ૩॥

શુક્રસ્ય વચનં શ્રુત્વા ભયહર્ષસમન્વિતઃ ।
ઉવાચ તં મહાભાગં ભક્તિયુક્તેન ચેતસા ॥ ૪॥

દમ્ભાસુર ઉવાચ ।
સ્વામિન્ યોદ્ધું સમાયાતઃ સિદ્ધિબુદ્ધિપતિઃ પ્રભુઃ ।
બ્રહ્મણો માનસઃ પુત્રસ્તપસા તેન નિર્મિતઃ ॥ ૫॥

પરિપૃચ્છામિ તત્ર ત્વાં સર્વજ્ઞં મુનિસત્તમમ્ ।
યેન તં સર્વભાવેન જાનામિ ખલુ તત્ત્વતઃ ॥ ૬॥

(Page ખં. ૧ અ. ૪૪ પાન ૯૯)
કા સિદ્ધિઃ કા તથા બુદ્ધિસ્તયોઃ કોઽસૌ પતિઃ પ્રભો ।
કિં સામર્થ્યધરો ભાતિ વદ સર્વં ચ મેઽગ્રતઃ ॥ ૭॥

દમ્ભસ્ય વચનં શ્રુત્વા શુક્રસ્તં પુનરબ્રવીત્ ।
યેન તત્ત્વે પ્રવિજ્ઞાતે ગણેશે જાયતે મતિઃ ॥ ૮॥

શુક્ર ઉવાચ ।
શ ૃણુ દૈત્યેન્દ્ર તસ્યાપિ મહિમાનં મહાદ્ભુતમ્ ।
યેન ત્વં ગાણપત્યે ચ તત્ત્વે પ્રનિપુણો ભવેઃ ॥ ૯॥

સિદ્ધિર્મોહકરી માયા સર્વત્રૈવ પ્રદૃશ્યતે ।
સિધ્યર્થં સર્વલોકાશ્ચ યત્નવન્તો ભવન્ત્યતઃ ॥ ૧૦॥

ઇહલોકે સ્વભોગાર્થી સિદ્ધિમિચ્છતિ દાનવ ।
પરલોકસ્ય સિધ્યર્થં જનસ્તત્પ્રસમાકુલઃ ॥ ૧૧॥

બ્રહ્મભૂયપદપ્રાપ્તિમિચ્છેદ્વૈ સિદ્ધિરૂપિકામ્ ।
ઇહ બ્રહ્મપરપ્રાપ્તિસ્ત્રિવિધા મોહસંજ્ઞિતા ॥ ૧૨॥

માયા ગણપતેઃ પ્રોક્તા ભ્રાન્તિરૂપા મહામતે ।
વામભાગસ્થયા દેવ્યા ક્રીડતેઽસૌ ગજાનનઃ ॥ ૧૩॥

ભ્રામયન્ બ્રહ્મવિષ્ણ્વાદીન્ યોગિનો માનવાદિકાન્ ।

બ્રહ્મભૂતસ્વરૂપત્વાત્ સ્વાધીનઃ સતતં મતઃ ॥ ૧૪॥

દ્વિતીયા બુદ્ધિરૂપા ચ માયા તસ્ય મહાત્મનઃ ।
તાં શ ૃણુષ્વ મહાદૈત્ય યેન ત્વં સર્વવિદ્ભવેઃ ॥ ૧૫॥

યત્કિઞ્ચિદ્ દૃશ્યતે સર્વં મનોવાણીમયં જગત્ ।
મનોવાણીવિહીનં યત્ સર્વં બુદ્ધિમયં બભૌ ॥ ૧૬॥

ક્ષિપ્તં મૂઢં ચ વિક્ષિપ્તમેકાગ્રં ચ નિરોધકમ્ ।
ચિત્તં પઞ્ચવિધં પ્રોક્તં બુદ્ધિરૂપં તદેવ ચ ॥ ૧૭॥

પઞ્ચાનાં બહવો ભેદા વક્તું તાન્ નૈવ શક્યતે ।
એવમેકાપ્યનેકાઽસૌ બુદ્ધિઃ સર્વત્ર દૃશ્યતે ॥ ૧૮॥

મોહધારકરૂપાં તા સુભ્રાન્તાં બુદ્ધિમાદરાત્ ।
જ્ઞાનરૂપાં હૃદિસ્થાં તુ બ્રહ્માકારાં પ્રવિદ્ધિ હિ ॥ ૧૯॥

બુદ્ધિયુક્તનરેણૈવ પરત્રેહ પ્રલભ્યતે ।
બુધ્યા બ્રહ્મમયો યોગો યુજ્યતે જ્ઞાનિભિઃ પરઃ ॥ ૨૦॥

એતાદૃશી મહાભાગા દક્ષિણાઙ્ગધરાઽસુર ।
તસ્ય યોગેશ્વરસ્યાઽપિ ગણેશસ્ય મહાત્મનઃ ॥ ૨૧॥

ક્રીડાર્થં રચિતે માયે સ્વસ્યાઙ્ગાત્તેન દૈત્યપ ।
બ્રહ્મરૂપં ચ તં વિદ્ધિ યોગેન લભતે નરઃ ॥ ૨૨॥

સ્વાનન્દાખ્યં પરં બ્રહ્મ તદેવ નગરં મતમ્ ।
તત્ર નિત્યં વસતિ યઃ સિદ્ધિબુદ્ધિસમન્વિતઃ ॥ ૨૩॥

બ્રહ્મણારાધિતં બ્રહ્મ પુત્રભાવાર્થમાદરાત્ ।
તદેવ ગણરાજોઽયમાગતો બ્રહ્મણઃ સુતઃ ॥ ૨૪॥

માતુઃ પિતુશ્ચ બન્ધં ચ પુત્રૌ હરતિ યત્ત્વિતિ ।
તદર્થં પુત્રભાવેન બ્રહ્મણા પ્રાર્થિતો વિભુઃ ॥ ૨૫॥

ધર્મસંરક્ષણાર્થાય ત્વાં હનિષ્યતિ નિશ્ચિતમ્ ।
અતસ્ત્વં શરણં ગચ્છ પ્રભુમિચ્છસિ જીવિતુમ્ ॥ ૨૬॥

મુદ્ગલ ઉવાચ ।
કાવ્યસ્ય મુનિમુખ્યસ્ય વચનં બ્રહ્મદાયકમ્ ।
વેદાન્તસારસમ્ભૂતં શ્રુત્વા દમ્ભ ઉવાચ હ ॥ ૨૭॥

દમ્ભ ઉવાચ ।
સ્વામિન્ શ્રુતં મયા વાક્યં ત્વદીયં યોગસંયુતમ્ ।
પરં તુ સંશયં છિન્ધિ હૃદિસ્થં કથયામિ તે ॥ ૨૮॥

એતાદૃશં પરં બ્રહ્મ ગાણેશં ચેન્ મહામુને ।
ધર્માધર્માવતસ્તસ્માત્ સમ્ભૂતૌ નાત્ર સંશયઃ ॥ ૨૯॥

યોગરૂપેણ સર્વત્ર ગણેશસ્તિષ્ઠતિ પ્રભો ।
ધર્મસ્ય રક્ષણં સોઽપિ કિં કરોતિ વિકારતઃ ॥ ૩૦॥

અધર્મસ્ય તથા નાશં કિમર્થં પ્રકરોતિ સઃ ।
એતં સંશયજાતં મે છેત્તુમર્હસિ સામ્પ્રતમ્ ॥ ૩૧॥

(Page ખં. ૧ અ. ૪૫ પાન ૧૦૦)
કાવ્ય ઉવાચ ।
શ ૃણુ દમ્ભ ગણેશસ્ય ચેષ્ટિતં સર્વદં પરમ્ ।
યેન તે સંશયઃ સર્વો નાશં યાસ્યતિ તત્ક્ષણાત્ ॥ ૩૨॥

ઇદં સૃષ્ટં ગણેશેન નાનાભેદમયં જગત્ ।
તત્ર સ્વસ્વપદે ચૈવ સ્થાપિતા જન્તવોઽભવન્ ॥ ૩૩॥

અધર્મસ્ય ચ ધર્મસ્ય વ્યવસ્થા તેન સા કૃતા ।
તત્ર લોભન વૈ ધર્મમધર્મો જયતે યદા ॥ ૩૪॥

સુરાણાં વૈ તદા તેજઃ ક્ષીણં ભવતિ સર્વતઃ ।
અસુરાણાં મહત્તેજો વર્ધતે ચ દિને દિને ॥ ૩૫॥

યદાઽયં ગણરાજસ્તુ દેવાનાં પક્ષવર્ધનઃ ।
અસુરાણાં વિનાશાય સ્વયં ભવતિ ચોદ્યતઃ ॥ ૩૬॥

હત્વા દેવગણૈઃ સર્વૈરસુરાણાં બલં મહત્ ।
સ્વસ્થાને સ્થાપયત્યેવ ધર્મં સર્વપ્રયત્નતઃ ॥ ૩૭॥

ધર્મેણ સકલં દૈત્ય હ્યધર્મસ્ય બલં હતમ્ ।
તદા દૈત્યાદિકાનાં તુ મૂલચ્છેદો ભવિષ્યતિ ॥ ૩૮॥

દેવાનામુદિતં તેજો ભવેદ્યદિ મહાદ્ભુતમ્ ।
દૈત્યાય વરદસ્તર્હિ ભવેચ્ચાનેકરૂપવાન્ ॥ ૩૯॥

અસુરૈર્વરસંયુક્તૈર્ધર્મે ક્ષીણે સમન્તતઃ ।
અધર્મસ્ય સ સંસ્થાં વૈ યથાપૂર્વમકલ્પયત્ ॥ ૪૦॥

એવં લોભસમાયુક્તાઃ સુરા દૈત્યા ભવન્તિ ચેત્ ।
તદા તેષાં વિનાશાય ગણેશો યતતેઽસુર ॥ ૪૧॥

નાસ્તિ તસ્ય વિચારેણ સ્વઃ પરઃ ક્વચિદેવ ચ ।
ક્રીડાર્થં સ્વાત્મભાવેષુ સ્થાપયત્યેવ વૈ જનાન્ ॥ ૪૨॥

મુદ્ગલ ઉવાચ ।
શુક્રસ્ય વચનં રમ્યં શ્રુત્વા દમ્ભઃ પ્રતાપવાન્ ।
ગણેશં મનસા ધ્યાયન્ સંસ્થિતો નગરે સ્વકે ॥ ૪૩॥

એકાન્તેઽસૌ મહાતેજા વિચારં પ્રચકાર હ ।
અયં ગણેશનામા વૈ પૂર્ણં બ્રહ્મ સનાતનમ્ ॥ ૪૪॥

તમેવ શરણં ગચ્છન્ યશસ્વી સ ભવિષ્યતિ ।
સર્વેષુ સમરૂપેણ સ્થિતોઽયં નાત્ર સંશયઃ ॥ ૪૫॥

ત્યક્ત્વા સિદ્ધિપતિં સિદ્ધિમિચ્છેદ્યો દુર્મતિઃ પરમ્ ।
અસિદ્ધિર્ભવિતા તસ્ય સુહૃદ્ભિર્નાત્ર સંશયઃ ॥ ૪૬॥

બુદ્ધેઃ પતિં ગણેશં યસ્ત્યક્ત્વા કુશલમિચ્છતિ ।
તસ્યાઽકુશલમવં ચ ભવિતા દુષ્ટભાવતઃ ॥ ૪૭॥

સિદ્ધિબુદ્ધિવિહીનં તુ ના કિઞ્ચિદ્ દૃશ્યતે મયા ।
અતસ્તં શરણં યામિ સુરાસુરસમં વિભુમ્ ॥ ૪૮॥

ઇતિ નિશ્ચિતસઙ્કલ્પો દમ્ભઃ સુષ્વાપ નિર્ભયઃ ।
ગણેશં હૃદિ વિન્યસ્ય ભક્તિભાવેન ભાવિતમ્ ॥ ૪૯॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે દમ્ભાસુરવિચારો નામ ચતુશ્ચત્વારિંશોઽધ્યાયઃ ॥ ૧.૪૪

## ૧.૪૫ દમ્ભાસુરશાન્તિકથનં નામ પઞ્ચચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
શ઼ૃણુ દક્ષ મહાપ્રાજ્ઞ મહદ્ દમ્ભસ્ય કૌશલમ્ ।

ત્યક્ત્વાऽऽસુરસ્વભાવં સ સંસ્થિતો વિગતજ્વરઃ ॥ ૧॥

પ્રાતરુત્થાય દૈત્યાન્ સ સર્વાનાકારયત્ સ્વયમ્ ।
ઉવાચ તાન્ મહાતેજા વચનં શુક્રસન્નિધૌ ॥ ૨॥

દમ્ભાસુર ઉવાચ ।
શ‍ૃણુધ્વમસુરાઃ સર્વે ગુરુણાऽહં પ્રબોધિતઃ ।
શરણં વક્રતુણ્ડં ચ યામિ તત્ર ન સંશયઃ ॥ ૩॥

સુરાણામધિપો નાऽયં નાયં દૈત્યાધિપઃ કદા ।
(Page ખં. ૧ અ. ૪૫ પાન ૧૦૧)
બ્રહ્માકારેણ સર્વત્ર સિદ્ધિબુદ્ધિપતિઃ સ્થિતઃ ॥ ૪॥

તસ્ય તદ્વચનં શ્રુત્વા કુપિતા દાનવાસ્તદા ।
યયુઃ સ્વં સ્વં ગૃહં સર્વે ત્યક્ત્વા દમ્ભાસુરં ખલાઃ ॥ ૫॥

દમ્ભાસુરઃ પ્રસન્નાત્મા કાવ્યેન સહિતઃ સ્વયમ્ ।
શરણં ગણનાથં ચ યયૌ હર્ષસમન્વિતઃ ॥ ૬॥

નગરાદ્બહિરાગત્ય યયૌ દેવસ્ય સન્નિધિમ્ ।
દણ્ડવત્પતિતઃ પૃથ્વ્યાં કૃતાઞ્જલિરુપસ્થિતઃ ॥ ૭॥

તુષ્ટાવ તં ગણાધ્યક્ષં તદ્દર્શનમહોત્સવઃ ।
યથાન્યાયં પૂજયિત્વા નિબદ્ધકરસમ્પુટઃ ॥ ૮॥

દમ્ભાસુર ઉવાચ ।
નમસ્તે બ્રહ્મરૂપાય બ્રહ્માકારશરીરિણે ।
બ્રહ્મણે બ્રહ્મદાત્રે ચ ગણેશાય નમો નમઃ ॥ ૯॥

નમસ્તે ત્રિદશેશાય દૈત્યદાનવપાય ચ ।
સર્વત્ર યોગરૂપાય ભાવહીનાય તે નમઃ ॥ ૧૦॥

સિદ્ધિબુદ્ધિપતે તુભ્યં નમઃ સિંહધ્વજાય ચ ।
ગણાનાં પતયે તુભ્યં હેરમ્બાય નમો નમઃ ॥ ૧૧॥

એકદન્તાય દેવાય હ્યનન્તવિભવાય તે ।
વિઘ્નેશાય મહાવિઘ્નનાશનાય નમો નમઃ ॥ ૧૨॥

અપારગુણધારાય દૈત્યદાનવમર્દિને ।
મનોવાણીમયાયૈવ સર્વરૂપાય તે નમઃ ॥ ૧૩॥

મનોવાણીવિહીનાય યોગિભ્યો યોગદાયિને ।
યોગાય યોગનાથાય વિશ્વપાય નમો નમઃ ॥ ૧૪॥

માયાધારાય માયાયાશ્ચાલકાય નમો નમઃ ।
માયાહીનાય સર્વત્ર સમભાવધરાય તે ॥ ૧૫॥

અવ્યક્તાય નમસ્તુભ્યં વ્યક્તિમૂલધરાય ચ ।
નિર્મોહાય સમોહાય લમ્બોદર નમો નમઃ ॥ ૧૬॥

યં સ્તોતું ન સમર્થાશ્ચ વેદાઃ સાઙ્ગા મહર્ષયઃ ।
યોગીન્દ્રા બ્રહ્મવિષ્ણ્વાદ્યાસ્તં કિં સ્તૌમિ પરાત્ પરમ્ ॥ ૧૭॥

ઇત્યુક્ત્વા પતિતઃ પૃથ્વ્યાં દમ્ભો ભક્તિસમન્વિતઃ ।
તમુત્થાપ્ય ગણાધીશ ઊચિવાન્ ભક્તિભાવિતઃ ॥ ૧૮॥

ગણેશ ઉવાચ ।
ત્વયા દમ્ભ કૃતં સ્તોત્રં મમ સન્તોષવર્ધનમ્ ।
યઃ પઠેત્ પાઠયેત્તદ્વા સ સર્વં સુખમાપ્નુયાત્ ॥ ૧૯॥

પુત્રપૌત્રકલત્રાદિ ધનધાન્યપ્રદં ભવેત્ ।
આધિવ્યાધિહરં ચૈવ સર્વોપદ્રવનાશનમ્ ॥ ૨૦॥

એકકાલં દ્વિકાલં વા ત્રિકાલં સતતં તથા ।
યઃ પઠેત્ સ નરોઽત્યન્તં મમ પ્રીતિકરો ભવેત્ ॥ ૨૧॥

ત્વાં હન્તું ક્રોધસંયુક્ત આગતોઽહં ન સંશયઃ ।
અધુના શરણં યાતસ્તતો હન્મિ ન નિશ્ચિતમ્ ॥ ૨૨॥

વરં વરય મત્તસ્ત્વં યત્ત્વચ્ચિત્તે સ્થિતં પરમ્ ।
સ્તોત્રેણ ભક્તિભાવેન સન્તુષ્ટોઽહં દદામિ તે ॥ ૨૩॥

ગણેશવચનં શ્રુત્વા દમ્ભો હર્ષસમન્વિતઃ ।
ઉવાચ ગણપં તત્ર ભક્તિનમ્રાત્મકન્ધરઃ ॥ ૨૪॥

દમ્ભાસુર ઉવાચ ।
યદિ દેવેશ તુષ્ટોઽસિ યદિ દેયો વરો હિ મે ।
અચલાં દેહિ તે ભક્તિં તદા નાથ નમોઽસ્તુ તે ॥ ૨૫॥

આજ્ઞાં ત્વં જ્ઞાપય વિભો વૃત્ત્યર્થં મે ચ સામ્પ્રતમ્ ।
સ્થાનં દેહિ ગણાધ્યક્ષ તત્ર સ્થાસ્યામિ નિશ્ચલઃ ॥ ૨૬॥

દમ્ભસ્ય વચનં શ્રુત્વા ગણેશસ્તમુવાચ હ ।
સુપ્રસન્નતયા દક્ષ ભક્તં ગમ્ભીરનિસ્વનઃ ॥ ૨૭॥

સિદ્ધિબુદ્ધિપતિરુવાચ ।
ભવિતા મયિ ભક્તિસ્તે દૃઢા હ્યવ્યભિચારિણી ।
તિષ્ઠ સ્થાને સ્વકે ત્વં વૈ દમ્ભ હર્ષસમન્વિતઃ ॥ ૨૮॥

ન ત્વં ન્યૂનોઽસિ મે ક્વાપિ દેવા નૈવાધિકા મતાઃ ।
સ્વસ્વધર્મે સ્થિતાઃ સર્વે મમ પ્રીતિવિવર્ધનાઃ ॥ ૨૯॥

સ્વધર્મત્યાગદોષેણ ક્રુદ્ધોઽહં નાશયામિ તાન્ ।
અતસ્ત્વં નિર્ભયો ભૂત્વા ચિરં તિષ્ઠ મહાસુર ॥ ૩૦॥

યત્ર મે સ્મરણં નાસ્તિ કાર્યાદૌ દૈત્યસત્તમ ।
તત્ર ત્વં દમ્ભભાવેન કાર્યનાશં સદા કુરુ ॥ ૩૧॥

કર્માદૌ પૂજનં યત્ર મમ નાસ્તિ યદાસુર ।
તદા તદ્ભ્રંશભાવેન નિષ્ફલં કુરુ સર્વદા ॥ ૩૨॥

મમ ભક્તિસમાયુક્તા યે નરાઃ સતતં પ્રિયાઃ ।
તાન્ પાલય પ્રયત્નેન દમ્ભ હીનસ્વભાવતઃ ॥ ૩૩॥

યત્ર મે સ્મરણં નાસ્તિ પૂજનં ચ મહામતે ।
આદૌ તત્ર ચ તે ભાગઃ કર્મરૂપો મયા કૃતઃ ॥ ૩૪॥

એવમુક્ત્વા સ તં દમ્ભં ગણેશોઽન્તર્દધે સ્વયમ્ ।
દેવાશ્ચ મુનયઃ સર્વે જયેત્યુક્ત્વા યયુસ્તતઃ ॥ ૩૫॥

સ્વસ્વસ્થાનેષુ દીપ્તાસ્તે સ્થિતા ભયવિવર્જિતાઃ ।
પાતાલવિવરે દૈત્યાઃ સ્થિતા નિર્વ્યાકુલાઃ પ્રભો ॥ ૩૬॥

એવં દમ્ભાસુરં શાન્તં સ ચકાર ગજાનનઃ ।
બ્રહ્મપુત્રત્વમાપન્નસ્તદપ્યુક્તં મયા પરમ્ ॥ ૩૭॥

ય એતચ્છૃણુયાન્નિત્યં શ્રાવયેદ્વા સમાહિતઃ ।
સ દમ્ભભયનિર્મુક્તો યાતિ બ્રહ્મ સનાતનમ્ ॥ ૩૮॥

યં યં ચિન્તયતે કામં તં તં પ્રાપ્નોતિ માનવઃ ।
સર્વસમ્પત્સમાયુક્તસ્તિષ્ઠેદ્વૈ વિઘ્નવર્જિતઃ ॥ ૩૯॥

અધુના વામનસ્યાપિ કથયામિ સમાસતઃ ।

ચરિત્રં ગણનાથસ્ય ભક્ત્યા યુક્તં મહાદ્ભતમ્ ॥ ૪૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે દમ્ભાસુરશાન્તિકથનં નામ પઞ્ચચત્વારિંશોઽધ્યાયઃ ॥ ૧.૪૫

## ૧.૪૬ વામનવરપ્રદાનં નામ ષટ્ચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
શ્રુત્વા કથાં ગણેશસ્ય હર્ષશ્ચેતસિ વર્ધતે ।
અતઃ કથય સર્વજ્ઞ ચરિત્રં વામનસ્ય યત્ ॥ ૧॥

મુદ્ગલ ઉવાચ ।
કશ્યપો મુનિશાર્દૂલઃ પ્રજાપતિસમોઽભવત્ ।
અદિતિસ્તસ્ય પત્ન્યાસીત્ જ્યેષ્ઠા પરમધાર્મિકા ॥ ૨॥

તસ્યાં ચ કશ્યપાદ્દેવા ઇન્દ્રાદ્યા જજ્ઞિરે પ્રભો ।
તેષાં વિરુદ્ધભાવેન સ્થિતા દૈત્યા મુનેઃ સુતાઃ ॥ ૩॥

બલેન વરગર્વેણ દેવાન્ હન્તું સમુદ્યતાઃ ।
અભવન્ વિષ્ણુના તે વૈ નાનારૂપેણ નાશિતાઃ ॥ ૪॥

ન પ્રાપુઃ સ્વર્ગરાજ્યં તે સર્વમાન્યં યદા તદા ।
કાવ્યં સકલનીતિજ્ઞં શરણં પ્રયયુઃ પુનઃ ॥ ૫॥

તેષાં સર્વં સ વૃત્તાન્તં વિદિત્વા મુનિપુઙ્ગવઃ ।
દૈત્યાનુવાચ સર્વજ્ઞઃ કાવ્યો વેદવિદાં વરઃ ॥ ૬॥

કાવ્ય ઉવાચ ।
બલિદાનવમુખ્યા વૈ શ ૃણુધ્વં મે વચો હિતમ્ ।
યજ્ઞે દેવાઃ સમુત્પન્ના યજ્ઞાધારાસ્તતઃ સુરાઃ ॥ ૭॥

અતોઽશ્વમેધયજ્ઞૈશ્ચ યજધ્વં શતસઙ્ખ્યકૈઃ ।
બલિરિન્દ્રો મહાબાહુર્ભવિતા નાત્ર સંશયઃ ॥ ૮॥

દ્વેષભાવં ચ દેવાનાં સદા સઞ્છાદ્ય યત્નતઃ ।
(Page ખં. ૧ અ. ૪૬ પાન ૧૦૩)
તેન સ્વર્ગભુજો દૈત્યા યૂયં સર્વત્ર પૂજિતાઃ ॥ ૯॥

ભવિષ્યથ મહાભાગાસ્તસ્માત્ કુરુત મદ્વચઃ ।
સર્વે હૃષ્ટાશ્ચ તં તત્ર સાધુ સાધ્વબ્રુવન્ સ્થિતાઃ ॥ ૧૦॥

તતસ્તે બલિરાજં ચ મુખ્યં કૃત્વા મહાબલાઃ ।
ત્વરિતા અશ્વમેધેષુ દીક્ષિતં ચક્રુરાદરાત્ ॥ ૧૧॥

બલિર્વિરોચનાજ્જાતો વિષ્ણુભક્તિપરાયણઃ ।
અધર્મે ન રુચિસ્તસ્ય જાયતે હિ કદાચન ॥ ૧૨॥

આદૌ ત્યક્ત્વા ગણેશાનં વિષ્ણું સ્મૃત્વા મહાસુરઃ ।
આદ્યં તં યજ્ઞમારેભે વિષ્ણુભક્તતયા ખલઃ ॥ ૧૩॥

તસ્ય ચેષ્ટિતમાજ્ઞાય વિઘ્નઃ પરમહર્ષિતઃ ।
ઉવાચ સદસિ હ્યાદૌ પૂજિતો ન ગણાધિપઃ ॥ ૧૪॥

ભુક્તિમુક્તિપ્રદાતા યઃ સર્વસિદ્ધિકરો વિભુઃ ।
સિદ્ધિમિચ્છન્તિ તં ત્યક્ત્વા તેઽસિદ્ધાઃ પ્રભવન્તિ હિ ॥ ૧૫॥

વિષ્ણોર્બલેન દૈત્યસ્ય ભવેત્ સિદ્ધિશ્ચ કીદૃશી ।
ભક્ષયિષ્યામિ તત્સર્વં કર્મ તેન મખે કૃતમ્ ॥ ૧૬॥

ઇત્યુક્ત્વા સ સ્વયં વિઘ્ન આયયૌ ક્રોધસંયુતઃ ।
પ્રવિશ્ય દેવરાજસ્ય હૃદયે સંસ્થિતોઽભવત્ ॥ ૧૭॥

યજ્ઞાઃ સઙ્કલ્પિતાસ્તસ્ય વિપ્રૈસ્તુ શતસઙ્ખ્યકાઃ ।
આદ્યે યજ્ઞે સમારબ્ધે ઇન્દ્રશ્ચિન્તાતુરોઽભવત્ ॥ ૧૮॥

શતયજ્ઞપ્રભાવેણ બલિરિન્દ્રો ભવિષ્યતિ ।
તતઃ સ શરણં વિષ્ણું જગામ સુરનાયકઃ ॥ ૧૯॥

નત્વા સ્તુત્વા મહાતેજાઃ પ્રાર્થયામાસ સાદરમ્ ।
વિષ્ણું દેવવરં તત્ર બલિયજ્ઞવિનાશને ॥ ૨૦॥

એતસ્મિન્નન્તરે તત્ર વિઘ્નઃ કાલસ્વરૂપધૃક્ ।
બલવાન્ વિષ્ણુમાવિશ્ય સંસ્થિતો હૃદયેઽભવત્ ॥ ૨૧॥

બલેઃ પ્રચેષ્ટિતં પૂર્ણં કથિતં વજ્રપાણિના ।
તજ્જ્ઞાત્વા સકલં વિષ્ણુરિન્દ્રં પ્રોવાચ સત્વરમ્ ॥ ૨૨॥

વિષ્ણુરુવાચ ।
અદિત્યા કશ્યપેનાપિ તપસ્તપ્તં સુદારુણમ્ ।

શતવર્ષં મદર્થં ચ તસ્મિન્ કાલે સુરાધિપ ॥ ૨૩॥

તયોરહં પ્રસન્નાત્મા વરદશ્ચ પુરાऽભવમ્ ।
તાભ્યાં ત્વં પુત્રતાં યાહિ યાચિતં સર્વભાવતઃ ॥ ૨૪॥

ઓમિત્યુક્તં મયા તત્ર તં વરં સફલં પ્રભો ।
અધુનાऽહં કરિષ્યામિ બલેર્યજ્ઞસ્ય નાશને ॥ ૨૫॥

વિસ્મૃતા વિષ્ણુનાऽત્યન્તં બલેર્ભક્તિર્મહાદ્ભુતા ।
સ બલેનિગ્રહાર્થં ચ સ્વયમવોઘતોऽભવત્ ॥ ૨૬॥

સ વિષ્ણુઃ કશ્યપાજ્જાતો હ્યદિત્યાં વામનઃ પ્રભુઃ ।
બલેર્બલં નિરીક્ષ્યૈવ ન શશાક પ્રચાલિતુમ્ ॥ ૨૭॥

મનસિ ક્ષુભિતો વિષ્ણુઃ કશ્યપં પિતરં તદા ।
પપ્રચ્છ બલિનાશાય વદોપાયં મહામુને ॥ ૨૮॥

ષડક્ષરં મહામન્ત્રં વક્રતુણ્ડસ્ય તં દદૌ ।
તતોऽસૌ ચ વિદર્ભેષુ ગત્વા તપસિ સંસ્થિતઃ ॥ ૨૯॥

દશવર્ષં મહોગ્રં સ તપસ્તેપે સુદારુણમ્ ।
નિરાહારતયા દક્ષ ગણેશં હૃદિ ચિન્તયન્ ॥ ૩૦॥

ઉગ્રેણ તપસા તસ્ય પ્રત્યક્ષઃ સિંહવાહનઃ ।
ષડક્ષરપ્રભાવેણ તં યયૌ ભક્તવત્સલઃ ॥ ૩૧॥

ચતુર્બાહુધરઃ પૂર્ણઃ સિદ્ધિબુદ્ધિસમન્વિતઃ ।
એકદન્તો ગજાકારમુખઃ પાશાઙ્કુશાદિધૃક્ ॥ ૩૨॥

સિન્દૂરારુણદેહશ્ચ શૂર્પકર્ણો મહોદરઃ ।
કોટિસૂર્યસમાનેન તેજસા સુવિરાજિતઃ ॥ ૩૩॥

તં દૃષ્ટ્વા સહસોત્થાય વામનઃ પ્રણનામ સઃ ।
ખં ૧ અ ૪૩ પાન ૧૦૪
બદ્ધાઞ્જલિપુટો ભૂત્વા સ્તોતું સમુપચક્રમે ॥ ૩૪॥

વામન ઉવાચ ।
નમો વિઘ્નપતે તુભ્યં ભક્તવિઘ્નવિનાશિને ।
અભક્તવિઘ્નદાત્રે ચ ગણેશાય નમો નમઃ ॥ ૩૫॥

વક્રતુણ્ડાય સર્વેશ પાલકાય નમો નમઃ ।

નાનારૂપધરાયૈવ સર્વાન્તર્યામિણે નમઃ ॥ ૩૬॥

સર્વં ચરાચરં સ્વામિંસ્ત્વદાજ્ઞા વશવર્તિ ચ ।
વિભૂતિભિર્મહારાજ કુરુષે સર્વમઞ્જસા ॥ ૩૭॥

બ્રહ્મા પ્રજાપતીનાં ત્વં યજ્ઞાનાં વિષ્ણુરેવ ચ ।
ઈશ્વરાણાં સ્વયં શમ્ભુર્દેવાનાં ત્વં પુરન્દરઃ ॥ ૩૮॥

પ્રકાશાનાં રવિસ્ત્વં ચ ચન્દ્રોઽન્નેષુ ગણાધિપ ।
યમો યમવતાં ત્વં વૈ વરુણો યાદસાં પ્રભો ॥ ૩૯॥

વાયુર્બલવતાં ત્વં ચ નિધીનાં ધનપઃ સ્વયમ્ ।
અગ્નિર્વૈ દાહકાનાં ત્વં રક્ષસાં નિરૃતિઃ સ્વયમ્ ॥ ૪૦॥

નાગાનાં શેષરૂપોઽસિ યોગિનાં શુક્ર એવ ચ ।
કુમારાણાં ત્વં ચ સનત્કુમારોઽસિ ન સંશયઃ ॥ ૪૧॥

ગુહઃ સેનાપતીનાં ત્વં મૃગાણાં સિંહવેષભૃત્ ।
એવં નાનાસ્વરૂપૈસ્ત્વં જગદ્રક્ષણતત્પરઃ ॥ ૪૨॥

ત્વાં સ્તોતું કઃ સમર્થઃ સ્યાદ્યોગરૂપં સનાતનમ્ ।
વેદાઃ શેષશ્ચ વેધા ચ શક્તા ન સ્તવનેઽભવન્ ॥ ૪૩॥

તત્ર મન્દમતિઃ ક્વાહં પારં ગન્તું તવ સ્તુતેઃ ।
તથાપિ ચ યથાબુદ્ધિ સંસ્તુતોઽસિ ચ વિઘ્નપ ॥ ૪૪॥

તવ દર્શનમાત્રેણ કૃતકૃત્યોઽસ્મિ સામ્પ્રતમ્ ।
ધન્યં જન્મ મદીયં વૈ યેન દૃષ્ટો ગજાનનઃ ॥ ૪૫॥

ધન્યૌ માતા પિતા મેઽદ્ય સ્થલં ધન્યં તપોઽપિ ચ ।
ષડક્ષરશ્ચ મન્ત્રોઽયં ધન્યો યેન ત્વમાગતઃ ॥ ૪૬॥

એવમુક્ત્વા નનર્તાઽસૌ ભક્તિભાવપરિપ્લુતઃ ।
રોમાઞ્ચિતશરીરોઽભૂદાનન્દાશ્રુ સૃજન્મુહઃ ॥ ૪૭॥

દેહભાવં પરિત્યજ્ય વામનો હર્ષસંયુતઃ ।
તદેકનિષ્ઠતાં પ્રાપ્તો મહાભાગઃ પ્રજાપતે ॥ ૪૮॥

તં તાદૃશં ગણાધીશો દૃષ્ટ્વા પ્રેમપરિપ્લુતમ્ ।
જગાદ પરમાત્માઽસૌ વામનં ભક્તવત્સલઃ ॥ ૪૯॥

ગણેશ ઉવાચ ।
શ ृणु વામન મે વાક્યં વરં વૃણુ હૃદીપ્સિતમ્ ।
તવ ભક્ત્યા તપોયુક્ત્યા સ્તુત્યા વૈ તુષ્ટિમાગતઃ ॥ ૫૦॥

દાસ્યામિ સકલં તુભ્યં યદ્યપિ સ્યાત્ સુદુષ્કરમ્ ।
ધન્યોઽસિ બાલભાવેઽપિ ભક્તિસ્તે મે પરાપદિ ॥ ૫૧॥

ત્વયા કૃતમિદં સ્તોત્રં સર્વદં પ્રભવિષ્યતિ ।
યઃ પઠેચ્છ્રાવયેદ્વાપિ તસ્ય સિદ્ધિર્ભવિષ્યતિ ॥ ૫૨॥

યં યં ચિન્તયતે કામં તં તં દાસ્યામિ દુર્લભમ્ ।
અન્તે મોક્ષં મહાવિષ્ણો સ્વાનન્દે પ્રદદામ્યહમ્ ॥ ૫૩॥

ઇતિ તસ્ય વચઃ શ્રુત્વા વક્રતુણ્ડસ્ય શોભનમ્ ।
વામનઃ પ્રણતો ભૂત્વા તં જગાદ ગજાનનમ્ ॥ ૫૪॥

પ્રસન્નો યદિ દેવેશ દેહિ ભક્તિં દૃઢાં ચ તે ।
બલિં દેવરિપું ઢુણ્ઢે મત્સાધ્યં કુરુ દૈત્યપમ્ ॥ ૫૫॥

યદાહં ત્વાં સ્મરિષ્યામિ તદાત્માનં પ્રદર્શય ।
યથા ન માં ભવેદ્વિઘ્નો વરં દેહિ ગજાનન ॥ ૫૬॥

તથેતિ તમથોક્ત્વાઽસૌ ગણેશોઽન્તર્દધે સ્વયમ્ ।
(Page  ખં. ૧ અ. ૪૭ પાન ૧૦૫)
વામનસ્તત્ર દેવેશં સ્થાપયામાસ હર્ષતઃ ॥ ૫૭॥

અદોષાખ્યં મહાક્ષેત્રં વિદર્ભે સ્થાનમુત્તમમ્ ।
વક્રતુણ્ડસ્ય સમ્ભૂતં નરાણાં સર્વસિદ્ધિદમ્ ॥ ૫૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે વામનવરપ્રદાનં નામ ષટ્ચત્વારિંશોઽધ્યાયઃ ॥ ૧.૪૬

## ૧.૪૭ વામનચરિતં નામ સપ્તચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
વરં લબ્ધ્વા સ સમ્પૂજ્ય વક્રતુણ્ડં ચ વામનઃ ।
કશ્યપં પ્રણતો ભૂત્વા યયૌ યજ્ઞં બલેરપિ ॥ ૧॥

તં દૃષ્ટ્વા સૂર્યસઙ્કાશં વેદાધ્યયનસંયુતમ્ ।
હ્રસ્વાકૃતિ મુનિશ્રેષ્ઠં વિસ્મિતા મુનયોઽભવન્ ॥ ૨॥

બલિરુત્થાય તં નત્વા પૂજયામાસ ભક્તિતઃ ।
પપ્રચ્છ કિં દદે તુભ્યં માં તદ્ બ્રૂહિ મહામુને ॥ ૩॥

તતઃ શુક્રેણ સર્વં તજ્જ્ઞાતં તસ્ય પ્રયોજનમ્ ।
ગણેશપૂજનં ચાદૌ ન કૃતં દુષ્ટબુદ્ધિના ॥ ૪॥

તેન વિઘ્નસ્વરૂપં ચ વિષ્ણુરૂપેણ સંસ્થિતમ્ ।
અધુના યાદૃશં ભાવિ તથા ભવતુ તાદૃશમ્ ॥ ૫॥

બલેર્વચનમાકર્ણ્ય વામનઃ પ્રાહ તં તતઃ ।
દેહિ ત્રિપદરૂપાં મે ભૂમિં દૈત્યપતે કિલ ॥ ૬॥

દદૌ બલિર્મહાભક્ત્યા તાં ભૂમિં સાદરો યથા ।
તથા વામનદેવોઽપિ ગણેશં મનસાઽસ્મરત્ ॥ ૭॥

વિરાડ્રૂપં તતો ધૃત્વા પાદં ચિક્ષેપ દેવપઃ ।
એકેન સકલં સ્વર્ગં પાદેનાવૃત્ય સત્વરઃ ॥ ૮॥

દ્વિતીયેન સ ભૂમિં વૈ સર્વામાવૃત્ય વામનઃ ।
ઉવાચ દૈત્યપં દેહિ તૃતીયસ્ય સ્થલં પ્રભો ॥ ૯॥

બલિર્વિસ્મયમાપન્નો ભ્રાન્તઃ શોકાકુલો ભવત્ ।
કિઞ્ચિન્નોવાચ તં તત્ર કિં દદામીતિ વિહ્વલઃ ॥ ૧૦॥

તતો વિષ્ણુઃ પ્રકોપેન તં બબન્ધ મહાસુરમ્ ।
વિપ્રસ્ય ત્વમૃણી જાતો નરકં ગચ્છ દૈત્યપ ॥ ૧૧॥

વિષ્ણોર્વચનમાકર્ણ્ય બલિર્વૈ દુઃખિતોઽભવત્ ।
નરકં વિષ્ણુભક્તાય દત્તે વૈ વિષ્ણુરદ્ભુતમ્ ॥ ૧૨॥

અહો મોહો મહાન્મેઽભૂદ્યેન વેદવિવર્જિતમ્ ।
કૃતં કર્મ વિના પૂજ્યં ગણેશં વિઘ્નનાયકમ્ ॥ ૧૩॥

તસ્યેદં હિ ફલં પ્રાપ્તં વિષ્ણુભક્તસ્ય વિષ્ણુતઃ ।
અતસ્તં શરણં યામિ સ રક્ષિષ્યતિ માં પ્રભુઃ ॥ ૧૪॥

એવં વિચાર્ય તસ્યૈવ મનસિ ધ્યાનમાદધે ।
ઢુણ્ઢિં તુષ્ટાવ દૈત્યેશઃ સર્વભાવસમન્વિતઃ ॥ ૧૫॥

બલિરુવાચ ।
નમસ્તે વિઘ્નરાજાય ભક્તાનાં વિઘ્નહારિણે ।
અભક્તાનાં વિશેષેણ વિઘ્નકર્ત્રે નમો નમઃ ॥ ૧૬॥

સર્વાકારાય દેવાય ગમ્યાગમ્યસ્વરૂપિણે ।
સ્વાનન્દપતયે તુભ્યં હેરમ્બાય નમો નમઃ ॥ ૧૭॥

નમો બ્રહ્મપતે તુભ્યં ગણાધ્યક્ષાય તે નમઃ ।
સિદ્ધિબુદ્ધિપતે તુભ્યં નમો વિશ્વમ્ભરાય તે ॥ ૧૮॥

અપારાય નમસ્તુભ્યં નાનામાયાશ્રયાય ચ ।
(Page ખં. ૧ અ. ૪૭ પાન ૧૦૬)
માયામોહહરાયૈવ ગણેશાય નમો નમઃ ॥ ૧૯॥

સર્વાન્તર્યામિણે તુભ્યં ચિન્તામણિસુરૂપિણે ।
સતતં બ્રહ્મભૂતાય નમસ્તે જગદાદયે ॥ ૨૦॥

અન્તે મધ્યે ચ સર્વત્ર સંસ્થિતાય નમો નમઃ ।
આદિમધ્યાન્તહીનાય સિંહવાહાય તે નમઃ ॥ ૨૧॥

અપરાધાનસઙ્ખ્યાતાન્ મદીયાન્ જગદીશ્વર ।
ક્ષન્ત્વા પાહિ ગણાધીશ પતન્તં નરકે ચ મામ્ ॥ ૨૨॥

ત્વન્માયામોહયોગેન મોહિતોઽહં ન સંશયઃ ।
તેન મત્સરભાવેન ત્વાં ત્યક્ત્વા વિષ્ણુમાશ્રિતઃ ॥ ૨૩॥

સકલં વિઘ્નસંયુક્તં જગદેતચ્ચરાચરમ્ ।
શિવવિષ્ણ્વાદિભિઃ સાર્ધં તવ માયાવિમોહિતમ્ ॥ ૨૪॥

યદિ ત્વાં શરણં ઢુણ્ઢે શિવવિષ્ણ્વાદયઃ પ્રભો ।
ગચ્છન્તિ મોહહીના વૈ નિર્વિઘ્નાસ્તે ભવન્તિ ચ ॥ ૨૫॥

અન્યથા ભ્રષ્ટરૂપાસ્તે પદહીના ભવન્તિ ચ ।
અતસ્ત્વં સર્વદેવાનાં ધારકો નાત્ર સંશયઃ ॥ ૨૬॥

સત્તારૂપા મહાવિઘ્નાસ્તેષાં સ્વામી ભવાન્ મતઃ ।
સર્વેષાં સ્થાપકાશ્ચૈવ તથોત્થાપનકારકાઃ ॥ ૨૭॥

અધુના ત્વત્પ્રસાદેન મયા બુદ્ધં ગજાનન ।

અતસ્ત્વાં શરણં યાતો દીનોઽનાથશ્ચ સામ્પ્રતમ્ ॥ ૨૮॥

રક્ષ રક્ષ ગણાધ્યાક્ષ નરકાન્માં દયાનિધે ।
ત્વત્સ્મૃત્યા ચૈવ ભવતિ જનઃ સર્વાર્થસિદ્ધિભાક્ ॥ ૨૯॥

એવં નાનાવિધૈઃ સ્તોત્રૈસ્તુષ્ટાવ દનુજેશ્વરઃ ।
તદૈવાકાશજાં વાણીં શુશ્રાવ પરમાદ્ભુતામ્ ॥ ૩૦॥

મા ભયં કુરુ દૈત્યેન્દ્ર રક્ષામિ શરણાગતમ્ ।
નરકાત્તે ભયં નાસ્તિ મત્સ્મૃતેઃ કરણાત્ કદા ॥ ૩૧॥

ત્વયા કૃતમિદં સ્તોત્રં નરકસ્ય હરં ભવેત્ ।
યઃ પઠેચ્છ્રાવયેદ્વાપિ નરકાત્તસ્ય નોભયમ્ ॥ ૩૨॥

ધર્માર્થકામમોક્ષાણાં સાધનં પ્રભવિષ્યતિ ।
મદ્ભક્તિવર્ધનં ચૈવ બલે ભવતિ નિશ્ચિતમ્ ॥ ૩૩॥

શ્રુત્વાઽઽકાશભવાં વાણીં બલિર્હૃષ્ટો બભૂવ હ ।
તમેવ ગણપં ચિત્તે ધ્યાયંસ્તત્રૈવ સંસ્થિતઃ ॥ ૩૪॥

એતસ્મિન્નન્તરે વિઘ્નો વિષ્ણું તત્યાજ વૈ યતઃ ।
તતો બુદ્ધિપ્રકાશશ્ચ વિષ્ણોર્જાતસ્તુ તત્ક્ષણાત્ ॥ ૩૫॥

વામનો મનસા તત્ર ધ્યાયતિ સ્મ પ્રજાપતે ।
મમ ભક્તો બલિઃ પૂર્ણસ્તસ્ય પ્રાપ્તં મહદ્ભયમ્ ॥ ૩૬॥

વિપ્રસ્ય ઋણમુગ્રં યત્તેનાયં નારકી ભવેત્ ।
અહો મયાતિમૂર્ખેણ મમ ભક્તઃ પ્રપીડિતઃ ॥ ૩૭॥

વેદબાહ્ય કૃતં કર્મ બલિના મત્સરાન્ મખે ।
ન પૂજિતો ગણાધ્યક્ષઃ ફલહીનોઽભવત્તતઃ ॥ ૩૮॥

અધુના ભક્તરક્ષાર્થં કિં કરોમિ વિચારતઃ ।
ગણેશં શરણં યામિ તતઃ સૌખ્યં ભવિષ્યતિ ॥ ૩૯॥

એવં વિચાર્ય દેવેશો ગણેશં હૃદિ સોઽસ્મરત્ ।
સ્મૃતિમાત્રેણ તસ્યાઽગ્રે પ્રકટોઽભૂદ્ગજાનનઃ ॥ ૪૦॥

તં દૃષ્ટ્વા પ્રણનામાદૌ પૂજયામાસ ભક્તિતઃ ।
સર્વે દેવગણાસ્તત્ર મુનયસ્તમપૂજયન્ ॥ ૪૧॥

એતસ્મિન્નન્તરે તત્ર બલિઃ પ્રોવાચ વામનમ્ ।
ગણેશદર્શનેનૈવ પ્રાપ્તબુદ્ધિર્મહાયશાઃ ॥ ૪૨॥

બલિરુવાચ ।
બ્રહ્મન્ દેહિ તૃતીયં તે પાદં શિરસિ ચાશુ મે ।
દેહોઽયં દાનરૂપેણ મયા દત્તો ન સંશયઃ ॥ ૪૩॥

તચ્છ્રુત્વા હર્ષિતો વિષ્ણુસ્તથેતિ સ ચકાર હ ।
(Page  ખં. ૧ અ. ૪૭ પાન ૧૦૭)
બ્રાહ્મણસ્યર્ણનિર્મુક્તં ભક્તં કૃત્વા ચ સંસ્થિતઃ ॥ ૪૪॥

તતસ્તં મુનિભિર્દેવૈઃ સહિતોઽસૌ જનાર્દનઃ ।
તુષ્ટાવ પ્રાઞ્જલિં બધ્વા ગણેશં સર્વસિદ્ધિદમ્ ॥ ૪૫॥

વામન ઉવાચ ।
નમસ્તે ગણનાથાય સર્વેષાં પતયે નમઃ ।
નાનાગણવિભક્તાય જગત્કર્ત્રે નમોઽસ્તુ તે ॥ ૪૬॥

વિઘ્નાનાં પતયે તુભ્યં નમશ્ચન્દ્રાર્ધધારિણે ।
ત્રિનેત્રાય નમસ્તુભ્યં ભક્તસંરક્ષકાય ચ ॥ ૪૭॥

અમેયમાયયા દેવ તવેદં રચિતં જગત્ ।
તવ માયાવિમોહેન મોહિતાન્ રક્ષ વિઘ્નપ ॥ ૪૮॥

તવ માયાપ્રભાવં ચ કો જાનાતિ ગજાનન ।
વયં યોગિગણાશ્ચાન્યે ન તં વેત્તું ક્ષમાઃ કદા ॥ ૪૯॥

અતોઽપરાધં જાતં મે ક્ષન્તુમર્હસિ માનદ ।
તવ ભક્તા વયં નાથ દેવદેવ નમોઽસ્તુ તે ॥ ૫૦॥

બલિસ્ત્વયં મદીયશ્ચ ભક્તઃ પરમભાવિકઃ ।
મચ્છ્રેષ્ઠત્વેન દેવેશ જાતોઽસૌ મત્સરાન્વિતઃ ॥ ૫૧॥

તેન વેદવિરુદ્ધં ચ કૃતં કર્મ મહાદ્ભુતમ્ ।
ત્વાં વિના યજ્ઞમારેભે ફલહીનોઽભવત્ક્રતુઃ ॥ ૫૨॥

અધુના મુનિભિર્દેવૈઃ સહિતોઽહં ગજાનન ।
પ્રાર્થયામિ તદર્થં ત્વાં સફલં કુરુ દાનવમ્ ॥ ૫૩॥

ત્વં વિનાયકનામાઽસિ ત્વયા યત્કૃતમાદરાત્ ।

તદેવ માન્યતાં યાતિ વેદાદિષુ ન સંશયઃ ॥ ૫૪॥

વયં નાયકસંયુક્તા વેદબાહ્યં યદા પ્રભો ।
કુર્મશ્ચેદ્વૈ પદભ્રષ્ટાઃ ક્રિયન્તે ચ ત્વયા તદા ॥ ૫૫॥

યજ્ઞસ્ય ફલસંયુક્તમતો ભક્તં કુરુ પ્રભો ।
ઇત્યુક્ત્વા પાદયોસ્તસ્ય પપાત ગણપસ્ય સઃ ॥ ૫૬॥

તમુત્થાપ્ય ગણાધીશો જગાદ વચનં હરિમ્ ।
કિં કરોમિ પુરા ચૈવં વરદોઽહં બભૂવ તે ॥ ૫૭॥

ત્વદીયહસ્તતો દૈત્યં નરકે પાતયામ્યહમ્ ।
ઇતિ ક્રોધસમાવિષ્ટોઽધુના સ્મરતિ માં ખલઃ ॥ ૫૮॥

કાયેન મનસા વાચા દૈત્યો માં શરણં ગતઃ ।
ત્વં ચ પ્રાર્થયસે વિષ્ણો વાઞ્છિતં ચ કરોમિ તે ॥ ૫૯॥

અધુના માં પુરસ્કૃત્ય એતં યજ્ઞં સમાપય ।
તેનાઽયં સકલાનાં ચ યજ્ઞાનાં ફલમશ્નુતે ॥ ૬૦॥

અપરાધસ્ય માહાત્મ્યં કિઞ્ચિત્પશ્યતુ કેશવ ।
ઇન્દ્રે નિવૃત્તેસ્મિન્નેષ ઇન્દ્રઃ પશ્ચાદ્ ભવિષ્યતિ ॥ ૬૧॥

પાતાલે સ્થાપયસ્વૈનં નાત્ર કાર્યા વિચારણા ।
અધુના ફલહીનત્વં જનાર્દન કૃતં મયા ॥ ૬૨॥

ગણેશવચનં શ્રુત્વા સર્વે હર્ષસમન્વિતાઃ ।
સાધુ સાધુ મહારાજ ગજાનન કૃતં ત્વયા ॥ ૬૩॥

ઇત્યુક્તસ્તં પુરસ્કૃત્ય યજ્ઞં ચક્રે બલિસ્તતઃ ।
અન્તિમં ભાવયુક્તઃ સન્ કૃતકૃત્યોઽભવદ્યથા ॥ ૬૪॥

ગણેશોંઽતર્દધે તત્ર દેવાઃ સ્વં સ્વં પદં યયુઃ ।
એવં વામનમાહાત્મ્યં કથિતં તે પ્રજાપતે ॥ ૬૫॥

યઃશ ૃણોતિ નરો ભક્ત્યા વાઞ્છિતં લભતે ધ્રુવમ્ ।
શ્રાવયેચ્છ્રુણુયાદ્વા યસ્તસ્ય સર્વં ન દુર્લભમ્ ॥ ૬૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે વામનચરિતં નામ સપ્તચત્વારિંશોઽધ્યાયઃ ॥ ૧.૪૭

(Page ખં. ૧ અ. ૪૮ પાન ૧૦૮)

## ૧.૪૮ ઋચીકગૃહસ્થાશ્રમવર્ણનં નામ અષ્ટચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શૌનક ઉવાચ ।
ત્વયા પ્રકથિતં સૂત વક્રતુણ્ડસ્ય ધીમતા ।
મત્સરાસુરનાશાખ્યં ચરિત્રં સર્વસિદ્ધિદમ્ ॥ ૧॥

સ સ્થિતઃ કુત્ર તત્ ક્ષેત્રસ્થાનં બ્રૂહિ મહાત્મનઃ ।
આદૌ તસ્યાવતારસ્ય તિથિમુત્સવવર્ધિનીમ્ ॥ ૨॥

સૂત ઉવાચ ।
પ્રાચીદિગન્તસંસ્થાને સ્થાપિતોઽસૌ મહર્ષિભિઃ ।
દેવૈશ્ચ ગણસંયુક્તૈર્મહોત્સવપરાયણૈઃ ॥ ૩॥

ભાદ્રશુક્લચતુર્થ્યાં વૈ પ્રકટોઽભૂત્સ દેવરાટ્ ।
વક્રતુણ્ડઃ પ્રસન્નાત્મા સા તિથિઃ પરમા મતા ॥ ૪॥

મધ્યાહ્નસમયે તસ્ય પૂજનં સુખદાયકમ્ ।
અપારસિદ્ધિદં પ્રોક્તમાદ્યન્તે સ્વલ્પસિદ્ધિદમ્ ॥ ૫॥

દ્વીપે દ્વીપે ચ ખણ્ડેષુ સ્વસ્વપૂર્વદિગન્તરે ।
પ્રતિમા વક્રતુણ્ડસ્ય સ્થાપિતા મુનિભિઃપુરા ॥ ૬॥

તત્ર ક્ષેત્રં સમાખ્યાતં દશયોજનમાત્રકમ્ ।
ચતુરસ્રં મહાપુણ્યં ભુક્તિમુક્તિપ્રદં પરમ્ ॥ ૭॥

મધ્યે સ સંસ્થિતો દેવો વક્રતુણ્ડો ગણેશ્વરઃ ।
વામાઙ્ગે સિદ્ધિરાદ્યા સા બુદ્ધિર્વૈ દક્ષિણાઙ્ગકે ॥ ૮॥

સમ્મુખે સિંહરૂપં ચ વાહનં તસ્ય શોભનમ્ ।
અષ્ટદિક્ષુ સ્થિતાસ્તસ્ય સિદ્ધયોઽષ્ટૌ ચ શૌનક ॥ ૯॥

ગણા અષ્ટૌ તથા જ્ઞેયાશ્ચતુર્દિક્ષુ ક્રમેણ તે ।
શિવો વિષ્ણૂ રવિઃ શક્તિર્ભક્તિયુક્તાઃ સ્થિતા ઇમે ॥ ૧૦॥

બ્રહ્માદ્યા દેવતાઃ સર્વાસ્તત્પશ્ચાત્ પૂર્વતઃ સ્થિતાઃ ।
ગઙ્ગાદ્યાઃ સરિતઃ સર્વા દક્ષિણે સંસ્થિતાઃ પ્રભો ॥ ૧૧॥

ક્ષેત્રાણિ કાશિકાદીનિ પશ્ચિમે સંસ્થિતાનિ ચ ।

વસિષ્ઠાદ્યા મુનિશ્રેષ્ઠાઃ સંસ્થિતાસ્તત્ર ચોત્તરે ॥ ૧૨॥

શેષાદ્યા નાગભૂપાશ્ચ ગન્ધર્વાઃ પર્વતાસ્તથા ।
સિદ્ધા અપ્સરસશ્ચૈવ વિદ્યાધ્રાઃ કિન્નરા ગણાઃ ॥ ૧૩॥

નાનાજાતિષુ યે શ્રેષ્ઠા અભવંસ્તત્ર સંસ્થિતાઃ ।
ન વક્તું શક્યતે સ્વામિન્ મયા વર્ષશતૈરપિ ॥ ૧૪॥

સેવાર્થં વક્રતુણ્ડસ્ય લાલસાધારિણઃ પ્રભોઃ ।
હૃષ્ટાઃ પ્રમુદિતાસ્તત્ર પરસ્પરહિતે રતાઃ ॥ ૧૫॥

વક્રતુણ્ડચરિત્રાણિ કથયન્તિ પરસ્પરમ્ ।
હૃષ્ટરોમાણ એવં તે ભવન્તો ભાવતઃ પુનઃ ॥ ૧૬॥

સમુદ્રે સ્નાનકર્તારસ્તત્ર તીર્થાનિ ચક્રિરે ।
સ્વસ્વનામ્નાઙ્કિતાન્યેવ સ્વલ્પદેહધરા મુને ॥ ૧૭॥

ગણેશતીર્થં તત્રૈવ વક્રતુણ્ડસ્ય હર્ષદમ્ ।
કૃતકૃત્યા ભવન્ત્યત્ર સ્નાનમાત્રેણ જન્તવઃ ॥ ૧૮॥

યાત્રામાત્રેણ તત્રૈવ જન ઈપ્સિતમાપ્નુયાત્ ।
ક્ષેત્રે મરણતો જન્તુર્બ્રહ્મભૂતશ્ચ જાયતે ॥ ૧૯॥

દૂરે સ્થિત્વા નરો યસ્તુ સ્મરણં પ્રકરોતિ ચેત્ ।
તસ્યાપિ શુક્લગત્યા સા મુક્તિર્ભવતિ શાશ્વતી ॥ ૨૦॥

વક્રતુણ્ડસ્ય યે ભક્તા યત્ર કુત્ર સ્થિતા મુને ।
બ્રહ્મભૂતા ન સન્દેહઃ પાવના દર્શનાન્નૃણામ્ ॥ ૨૧॥

સઙ્ક્ષેપેણ મયા તસ્ય સ્થાનં તે કથિતં મુને ।
વિસ્તરેણ ન શેષોઽપિ બ્રહ્મવિષ્ણુમહેશ્વરાઃ ॥ ૨૨॥

વેદાઃ સસ્મૃતયઃ સર્વે સ્કન્દો યોગિન એવ ચ ।
અયુતાયુતવર્ષૈસ્તે કથિતું ન ક્ષમાઃ કદા ॥ ૨૩॥

મુદ્ગલેન યથા પ્રોક્તં દક્ષાગ્રે તન્મયા તથા ।
કથિતં ભાવયુક્તેન કિમન્યચ્છ્રોતુમિચ્છસિ ॥ ૨૪॥

શૌનક ઉવાચ ।
સૂત સૂત મહાભાગ ધન્યં ક્ષેત્રસમુદ્ભવમ્ ।
માહાત્મ્યં શ્રુતમસ્માભિર્બ્રહ્મસાયુજ્યદાયકમ્ ॥ ૨૫॥

અધુના બ્રૂહિ ધર્મજ્ઞ યદ્દક્ષેણ ચ સંશ્રુતમ્ ।
(Page ખં. ૧ અ. ૪૮ પાન ૧૦૯)
મુદ્ગલાત્તેન કથિતમગ્રે યત્ કીદૃશં ચ તત્ ॥ ૨૬॥

સૂત ઉવાચ ।
ક્ષેત્રસ્ય ચરિતં શ્રુત્વા દક્ષો હર્ષસમન્વિતઃ ।
ઉવાચ મુદ્ગલં વિપ્રં ભક્તિનમ્રાત્મકન્ધરઃ ॥ ૨૭॥

દક્ષ ઉવાચ ।
ઢુણ્ઢિરાજાવતારસ્ય ચરિતં વદ વિસ્તરાત્ ।
વક્રતુણ્ડઃ સ્વયં સાક્ષાત્ કથં શઙ્કરદેહજઃ ॥ ૨૮॥

મુદ્ગલ ઉવાચ ।
શ ૃણુ દક્ષ મહાભાગ કથયામિ પુરાતનમ્ ।
ઇતિહાસં ગણેશસ્ય ગુણયુક્તં મહાદ્ભુતમ્ ॥ ૨૯॥

યાજ્ઞવલ્ક્યમુનીન્દ્રેણ કથિતં કૌશિકાય યત્ ।
તદહં સમ્પ્રવક્ષ્યામિ બ્રાહ્મણત્વપ્રકાશકમ્ ॥ ૩૦॥

ભાર્ગવો મુનિમુખ્યો ય ઋચીકસ્તપસિ સ્થિતઃ ।
બહુકાલે વ્યતિક્રાન્તે તપસા જીર્ણતાં યયૌ ॥ ૩૧॥

વૃદ્ધત્વં પરિપૂર્ણં ચ પ્રાપ્તં તસ્ય મહાત્મનઃ ।
વનેષુ મૃગયૂથાનિ સ પશ્યન્ વિસ્મિતોઽભવત્ ॥ ૩૨॥

મૃગીસંસક્તચિત્તશ્ચ મૃગઃ સ્વાધીનતાં ગતઃ ।
પુત્રપૌત્રાદિસંયુક્તો બભ્રામ વનગોચરઃ ॥ ૩૩॥

એકૈકાશ્રિતચિત્તાસ્તે ક્રીડાં ચક્રુઃ પરસ્પરમ્ ।
દૃષ્ટ્વા ભૃગુવરસ્તત્ર સકામઃ સમ્બભૂવ હ ॥ ૩૪॥

ઉવાચ સ્વયમેવેદં ધન્યં ગાર્હસ્થ્યમેવ ચ ।
ઇત્થં વિચાર્ય વિપ્રસ્તુ યયૌ ગાધિં નરાધિપમ્ ॥ ૩૫॥

સ દૃષ્ટ્વા સહસોત્થાય મુનિં ગાધિરપૂજયત્ ।
ભુક્ત્વાઽયાચત તત્કન્યાં ભાર્યાર્થં નૃપસત્તમમ્ ॥ ૩૬॥

રાજા વૃદ્ધં સમાલોક્ય તં જગાદ મહામુનિમ્ ।

શ્યામકર્ણયુતાશ્વાનાં સહસ્રં દેહિ મે મુને ॥ ૩૭॥

શુલ્કં ગ્રાહ્યં મયા ચૈવં નિશ્ચયઃ પ્રાક્કૃતો મુને ।
અતસ્ત્વાં પ્રાર્થયે વિપ્ર પશ્ચાત્કન્યાં દદામિ તે ॥ ૩૮॥

શ્રુત્વા મુનિર્ગતઃ સદ્યો વરુણસ્ય ગૃહં પ્રતિ ।
ગૃહીત્વાઽશ્વસહસ્રં ચ તસ્માત્તં પ્રયયૌ દદૌ ॥ ૩૯॥

રાજા કન્યાં દદૌ તસ્મૈ ભાર્ગવાય મહાત્મને ।
વિધિવદ્ભયભીતઃ સ તાં પ્રગૃહ્ય યયૌ વનમ્ ॥ ૪૦॥

રાજપત્ની સુતાં પ્રાહ ત્વદીયં ભાગ્યમીદૃશમ્ ।
અસ્માભિઃ કિં પ્રકર્તવ્યં વનવાસં સુતે કુરુ ॥ ૪૧॥

વિલપ્ય દ્રવ્યવસ્ત્રાદીન્ દત્વા પુત્રીકરે તદા ।
સ્વગેહં સા જગામાપિ વને પ્રસ્થાપ્ય તાં મુને ॥ ૪૨॥

રાજપુત્રી મહાભાગા ઋચીકં પ્રાપ્ય સંસ્થિતા ।
સેવામનલસત્વેન કૃત્વા તદ્ભક્તિતત્પરા ॥ ૪૩॥

તાં દૃષ્ટ્વા શીલસંયુક્તાં પ્રસન્નો મુનિસત્તમઃ ।
તદર્થં તપસા સ્વેન નિર્મમે નગરં વને ॥ ૪૪॥

ચાતુર્વર્ણ્યસમાયુક્તં હેમરત્નવિભૂષિતમ્ ।
દાસીદાસાદિસંયુક્તં નાનાવિભવદં પરમ્ ॥ ૪૫॥

સ્વયં તપઃપ્રભાવેણ યૌવનં રૂપમાદધે ।
રેમે તયા યથાન્યાયં દેવેન્દ્રેણ સમઃ પ્રભો ॥ ૪૬॥

નિઃસ્પૃહો ભોગરાગેષુ દૃષ્ટ્વા સ્ત્રીસુખમલ્પકમ્ ।
માનસે ધારયામાસ વ્યર્થં પત્નીભવં સુખમ્ ॥ ૪૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે ઋચીકગૃહસ્થાશ્રમવર્ણનં નામ અષ્ટચત્વારિંશોઽધ્યાયઃ ॥ ૧.૪૮
(Page ખં. ૧ અ. ૪૯ પાન ૧૧૦)

## ૧.૪૯ યાજ્ઞવલ્ક્યવિશ્વામિત્રસમાગમોનામૈકોનપઞ્ચાશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।

એકદા રાજપત્ની સા વનં શોકસમાકુલા ।
આયયૌ દર્શનાર્થં તાં પુત્રીં વસ્ત્રધનાન્વિતા ॥ ૧॥

ઋચીકસ્યાશ્રમં તત્ર ન દદર્શ રથે સ્થિતા ।
નગરં હેમશોભાઢ્યં દૃષ્ટ્વા સા વિસ્મિતાઽભવત્ ॥ ૨॥

કસ્યેદં નગરં દિવ્યં દેવૈર્વા નિર્મિતં ભવેત્ ।
ક્વ ગતો મુનિશાર્દૂલો જામાતા મે સ ભાર્ગવઃ ॥ ૩॥

એવં શોકસમાયુક્તા વિચારમકરોદ્ હૃદિ ।
દદર્શ પુરુષં કઞ્ચિત્તં પપ્રચ્છ ભયાતુરા ॥ ૪॥

કસ્યેદં નગરં બ્રૂહિ સ જગાદ ચ તાં મુને ।
ઋચીકસ્ય પુરં દેવિ વયં તસ્ય પ્રમાર્જકાઃ ॥ ૫॥

પુનસ્તં વિસ્મિતા રાજ્ઞી જગાદ વદ સામ્પ્રતમ્ ।
ઋષિપત્નીં ચ મે પુત્રીમાગતાં જનનીં પુરે ॥ ૬॥

તથેતિ પુરુષો ગત્વા કથયામાસ તાં તતઃ ।
સા સ્વમાતરમાગમ્ય નિનાય સ્વગૃહં પુરે ॥ ૭॥

જામાતરં શ્રિયા યુક્તં દૃષ્ટ્વા વિસ્મિતમાનસા ।
ઉવાચ સ્વસુતાં રાજ્ઞી પુત્રાર્થં ભાવસંયુતા ॥ ૮॥

મમ પુત્રાર્થમેવં ચ તવ પુત્રાર્થમાદરાત્ ।
યાચસ્વ સ્વામિનં પુત્રિ સમર્થં મુનિપુઙ્ગવમ્ ॥ ૯॥

ઋષિપત્ની પતિં તત્ર યાચયામાસ તત્તથા ।
દ્વૌ ચરૂ હ્યગ્નિકુણ્ડે સ ચકાર સુતલિપ્સયા ॥ ૧૦॥

દ્વિવિધં સ પુરોડાશં બ્રહ્મક્ષત્રપ્રકાશકમ્ ।
અતુલં તેજ આવાહ્ય દદૌ પત્નીકરે મુનિઃ ॥ ૧૧॥

જગાદ તાં મુનિશ્રેષ્ઠો ભક્ષિતવ્યસ્ત્વયા હ્યયમ્ ।
તવ માત્રા તથાઽન્યો વૈ ભક્ષિતવ્યઃ શુચિસ્મિતે ॥ ૧૨॥

તદા પુત્રસમાયુક્તે યુવાં કિલ ભવિષ્યથઃ ।
એવમુક્ત્વા મુનિસ્તીર્થે માધ્યાહ્નાર્થં યયૌ કિલ ॥ ૧૩॥

પુત્ર્યા માત્રે સ વૃત્તાન્તઃ કથિતઃ સાઽબ્રવીત્ સુતામ્ ।
ત્વદીયો ભક્ષિતવ્યો મે મદીયં ત્વં પ્રભુઙ્ક્ષ્વ વૈ ॥ ૧૪॥

તથા પુત્ર્યા કૃતં સર્વં ગતા માતા સ્વમાલયમ્ ।
રાજ્ઞી ગર્ભવતી જાતા બ્રાહ્મણી ચ પ્રજાપતે ॥ ૧૫॥

એકદા મુનિના દૃષ્ટા સ્ત્ર્યુગ્રતેજોધરા બભૌ ।
ઉવાચ ભાર્ગવઃ પત્નીં કિં કૃતઃ ક્ષાત્ર આદરઃ ॥ ૧૬॥

સોવાચ ભયભીતા તં વ્યતિક્રમમમું ચરોઃ ।
તામુવાચ મુનિસ્તત્ર વિસ્મિતો માનસેઽભવત્ ॥ ૧૭॥

તવ ભ્રાતા તપસ્વી ચ ભવિષ્યતિ ન સંશયઃ ।
તવ પુત્રો ધનુર્ધારી દારુણઃ પ્રભવિષ્યતિ ॥ ૧૮॥

સોવાચ સ્વામિનં ભીતા દ્વિજં પુત્રં તુ મે પ્રભો ।
દેહિ નોચેજ્જીવઘાતં કરિષ્યામિ ન સંશયઃ ॥ ૧૯॥

તતો મુનિઃ સ્વયં પ્રાહ પુત્રપુત્રો ભવેત્તથા ।
ગર્ભં વિજ્ઞાપ્ય વિષ્ણું વૈ તપસા સ તથાઽકરોત્ ॥ ૨૦॥

તતસ્તસ્યાઽભવત્પુત્રો જમદગ્નિર્મહાતપાઃ ।
તસ્ય પુત્રત્વમાપેદે રામઃ શસ્ત્રભૃતાંવરઃ ॥ ૨૧॥

નવમે ગાધિપત્ની સા માસે પુત્રં તપોનિધિમ્ ।
વિશ્વામિત્રં મહાભાગં સુષુવે પ્રેમવિહ્વલા ॥ ૨૨॥

સ તુ યૌવનમાપન્નં સંસ્થાપ્ય વનમાદરાત્ ।
ગાધિર્યયૌ સ્વરાજ્યે ચ તપસે કૃતનિશ્ચયઃ ॥ ૨૩॥

તદ્રાજ્યમકરોત્ સર્વ વિશ્વામિત્રઃ પ્રતાપવાન્ ।
એકદા મૃગયાર્થં વૈ વનેષુ પ્રજગામ હ ॥ ૨૪॥

મૃગયિત્વામૃગાન્ રાજા ક્ષુધિતસ્તૃષિતોઽભવત્ ।
ભ્રમન્ સમાયયૌ સોઽપિ વસિષ્ઠાશ્રમમુત્તમમ્ ॥ ૨૫॥

પ્રવિશ્ય તત્ર તં રાજા નનામ ભક્તિસંયુતઃ ।
(Page ખં. ૧ અ. ૪૯ પાન ૧૧૧)
સસૈન્યો ભોજિતસ્તેન કામધેનુબલેન સઃ ॥ ૨૬॥

ભુક્ત્વા તં પ્રાર્થયામાસ નન્દિનીં દેહિ મે મુને ।
વિશ્વામિત્રસ્તતસ્તસ્મૈ ન દદૌ તાં મહામુનિઃ ॥ ૨૭॥

તતો રાજા બલાન્નેતું દૂતાનાજ્ઞાપયત્ ખલઃ ।
ધેન્વા તે નાશિતાઃ સર્વે તતઃ સ્વયમુપાયયૌ ॥ ૨૮॥

કશાઘાતૈશ્ચ તાં ધેનું તાડયામાસુરાગ્રહાત્ ।
કેચિત્તતો મહત્સૈન્યં નિર્મમે તત્ર ધેનુકા ॥ ૨૯॥

તતો યુદ્ધમભૂદ્ઘોરં સૈન્યયોરુભયોર્મહત્ ।
નષ્ટં સૈન્યં ચ સમ્પૂર્ણં વિશ્વામિત્રસ્ય તત્ક્ષણાત્ ॥ ૩૦॥

સોઽપિ ભગ્નો ગૃહં ગત્વા રાજ્યં ન્યસ્ય યયૌ વનમ્ ।
પ્રધાનેષુ તપસ્તેપે શઙ્કરસ્ય મહાત્મનઃ ॥ ૩૧॥

શતવર્ષેષુ પૂર્ણેષુ પ્રસન્નશ્ચ દદૌ શિવઃ ।
અસ્ત્રવિદ્યાં સુસમ્પૂર્ણાં તાં પ્રાપ્ય સ્વગૃહં યયૌ ॥ ૩૨॥

પુનર્વસિષ્ઠમાગમ્ય શસ્ત્રાસ્ત્રૈર્બલસંયુતઃ ।
વિશ્વામિત્રો મમાર્દાસાવગ્ન્યસ્ત્રેણ તદાશ્રમમ્ ॥ ૩૩॥

વસિષ્ઠસ્તં તતસ્તત્ર યોધયામાસ શૌનક ।
બ્રહ્મદણ્ડધરઃ શ્રીમાન્ સર્વાસ્ત્રાણિ વ્યમર્દયત્ ॥ ૩૪॥

બ્રહ્મદણ્ડેન તસ્યાપિ કૃતસ્તેન પરાજયઃ ।
વિશ્વામિત્રઃ પલાયિષ્ટ ભયભીતઃ સમન્તતઃ ॥ ૩૫॥

તતઃ સુસાન્ત્વિતો વિપ્રો વસિષ્ઠો બ્રાહ્મણૈસ્તદા ।
સ્વાશ્રમં પ્રવિવેશાથ વિશ્વામિત્રો ગૃહં યયૌ ॥ ૩૬॥

અહો બ્રાહ્મં બલં દીપ્તં ક્ષાત્રં તુચ્છં વિશેષતઃ ।
બ્રહ્મદણ્ડેન સર્વાણિ મમાસ્ત્રાણિ હતાનિ ચ ॥ ૩૭॥

એવં સ નિશ્ચયં કૃત્વા રાજ્યં ત્યક્ત્વા યયૌ વનમ્ ।
બ્રાહ્મણત્વપ્રસિદ્ધ્યર્થં તતાપ પરમં તપઃ ॥ ૩૮॥

ગાયત્રીમન્ત્રજાપ્યેન પુરશ્ચરણમાર્ગતઃ ।
નિરાહારેણ રાજર્ષિસ્તાપયામાસ વિષ્ટપમ્ ॥ ૩૯॥

એવં દશસહસ્રાણિ વર્ષાણિ જપતો યયુઃ ।
તતો જગાદ તં બ્રહ્મા વરં બ્રૂહિ મહામતે ॥ ૪૦॥

સ વવ્રે બ્રાહ્મણત્વં મે દેહિ દેવ નમોઽસ્તુ તે ।
તદા બ્રહ્મા પુનઃ પ્રાહ તપસ્વેતિ ચ ગાધિજમ્ ॥ ૪૧॥

દશવારં વિધૌ તત્ર સમાગત્ય ચ તં મુનિમ્ ।
અન્યં વરં દદાને સ ન જગ્રાહ સ બુદ્ધિમાન્ ॥ ૪૨॥

તપઃપ્રભાવતસ્તસ્ય વ્યાપ્તમાસીદ્દિગન્તરમ્ ।
દેવાદ્યા અભવન્સર્વે તદાજ્ઞાવશવર્તિનઃ ॥ ૪૩॥

સ્વપ્રતાપેન રાજર્ષિર્બ્રાહ્મણાન્ પ્રાહ ગાધિજઃ ।
અહં બ્રહ્મર્ષિમુખ્યો વૈ જાતસ્તુ તપસો બલાત્ ॥ ૪૪॥

ભયભીતાશ્ચ તે સર્વે તથેત્યૂચુઃ પ્રણમ્ય તમ્ ।
વસિષ્ઠો મુનિવર્યઃ સ તં રાજર્ષિં જગાદ હ ॥ ૪૫॥

વિશ્વામિત્રઃ સઙ્ક્ષુભિતો વસિષ્ઠહનનાય ચ ।
નાનાયત્નાંશ્ચકારાપિ ન મમાર મહામુનિઃ ॥ ૪૬॥

તતોઽતિદુઃખિતો ભૂત્વા સંસ્થિતઃ સ્વાશ્રમે મુનિઃ ।
વિશ્વામિત્રો મહાભાગસ્તપસ્તેજોવિરાજિતઃ ॥ ૪૭॥

તમાયયૌ મહાતેજા યાજ્ઞવલ્ક્યઃ પ્રતાપવાન્ ।
બ્રહ્મણોંઽગસમુત્પન્નઃ સાક્ષાદ્યોગીશ્વરો મહાન્ ॥ ૪૮॥

તં નનામ યથાન્યાયં પૂજયામાસ ભક્તિતઃ ।
વિશ્વામિત્રો મહાતેજા ઉવાચ પ્રકૃતાઞ્જલિઃ ॥ ૪૯॥

અદ્ય મે સફલં જન્મ તપઃસ્વાધ્યાય એવ ચ ।
યેન તે દર્શનં જાતં બ્રહ્મભૂતસ્ય માનદ ॥ ૫૦॥

(Page ખં. ૧ અ. ૫૦ પાન ૧૧૨)
કિમર્થમાગતો બ્રહ્મસ્તદ્વદસ્વ મહામુને ।
તવાજ્ઞાં કર્તુમિચ્છામિ દાસોઽહં શાધિ માં પ્રભો ॥ ૫૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે યાજ્ઞવલ્ક્યવિશ્વામિત્રસમાગમોનામૈકોનપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૧.૪૯

## ૧.૫૦ દિવોદાસમહિમવર્ણનં નામ પઞ્ચાશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।

વિશ્વામિત્રસ્ય ભાવેન સન્તુષ્ટો મુનિપુઙ્ગવઃ ।
તમુવાચ મહાયોગી યાજ્ઞવલ્ક્યો મહામુનિઃ ॥ ૧॥

યાજ્ઞવલ્ક્ય ઉવાચ ।
દુઃખિતં ત્વાં વિદિત્વાહમાગતો મુનિપુઙ્ગવ ।
ન કાર્યમપરં કિઞ્ચિજ્જાનીહિ ત્વં મહામતે ॥ ૨॥

વદ કિં કારણં બ્રહ્મન્ દુઃખસ્ય તવ તાપસ ।
પશ્ચાત્તન્નાશયિષ્યામિ યુક્ત્યા જ્ઞાનોપદેશતઃ ॥ ૩॥

વિશ્વામિત્ર ઉવાચ ।
તપસ્તમં મયા ઘોરં બ્રહ્મા મે ન દદૌ વરમ્ ।
વસિષ્ઠો માં ચ રાજર્ષિં જગાદ જનસન્નિધૌ ॥ ૪॥

કેનોપાયેન યોગીન્દ્ર બ્રાહ્મણોઽહં ભવામિ ચ ।
સર્વમાન્યો મહાભાગસ્તં કરિષ્યામિ યત્નતઃ ॥ ૫॥

તતસ્તં મુનિશાર્દૂલો યાજ્ઞવલ્ક્ય ઉવાચ હ ।
ન ચિન્તાં કુરુ રાજર્ષે બ્રહ્મર્ષિસ્ત્વં ભવિષ્યસિ ॥ ૬॥

અભિમાનં મહાઘોરં ત્યજ ત્વં મે સુવાક્યતઃ ।
મત્સરં ત્યજ દુષ્ટં ચ તતઃ ક્ષેમં ભવિષ્યતિ ॥ ૭॥

કથાં શ ृણુ મહારમ્યાં કાશીવિશ્વેશસંશ્રિતામ્ ।
યેન ત્વં નિર્મલો ભૂત્વા બ્રાહ્મણોઽપિ ભવિષ્યસિ ॥ ૮॥

કાશીવિશ્વેશ્વરેણૈવ ન ત્યક્તા પ્રલયેઽપિ ચ ।
ન વિયોગઃ ક્ષણં તસ્યાઃ કાશ્યાઃ શમ્ભોઃ કદાચન ॥ ૯॥

તેનાહઙ્કારસંયુક્તૌ જાતૌ કાશીમહેશ્વરૌ ।
વિઘ્નઃ સમભવત્તત્ર દારુણઃ પ્રવિયોગકૃત્ ॥ ૧૦॥

મુદ્ગલ ઉવાચ ।
યાજ્ઞવલ્ક્યવચઃ શ્રુત્વા હર્ષિતઃ કૌશિકો મુનિઃ ।
ઉવાચ તં મહાભાગં પ્રેમયુક્તેન ચેતસા ॥ ૧૧॥

વિશ્વામિત્ર ઉવાચ ।
કીદૃશં વિઘ્નરૂપં ચાવિમુક્તસ્ય શિવસ્ય યત્ ।
સમુત્પન્નં મહાભાગ તદ્વદ ત્વં વિશેષતઃ ॥ ૧૨॥

યાજ્ઞવલ્ક્ય ઉવાચ ।
ષષ્ટિવર્ષાણિ પર્જન્યો ન વવર્ષ મહીતલે ।
તેન નષ્ટં જગત્સર્વં ભૂમિસ્થં સચરાચરમ્ ॥ ૧૩॥

પ્રજાક્ષયં તતો દૃષ્ટ્વા બ્રહ્મા લોકપિતામહઃ ।
આયયૌ રાજશાર્દૂલં દિવોદાસં તપઃસ્થિતમ્ ॥ ૧૪॥

રાજ્યં ત્યક્ત્વા સ રાજર્ષિસ્તતાપ પરમં તપઃ ।
મોક્ષાર્થં ભક્તિભાવેન સૂર્યવંશસમુદ્ભવઃ ॥ ૧૫॥

તપસા યોગભાવેન બભૌ સૂર્ય ઇવાપરઃ ।
તં બ્રહ્મા સ્વયમેવેદં વચનં પ્રજગાદ હ ॥ ૧૬॥

બ્રહ્મોવાચ ।
દિવોદાસ મહાભાગ શ ૃણુ મે વચનં હિતમ્ ।
કાશીરાજ્યં ગૃહાણ ત્વં મયા દત્તં મહામતે ॥ ૧૭॥

બ્રહ્માણં સ ઉવાચાથ ન રાજ્યં પરિપાલયે ।
મોક્ષાર્થી વાસનાહીનો મોક્ષં દેહિ પ્રજાપતે ॥ ૧૮॥

તં પુનઃપ્રત્યુવાચેદં બ્રહ્મા લોકહિતાય ચ ।
કુરુ રાજ્યં મહાભાગ મયા દત્તં મહામતે ॥ ૧૯॥

ત્વયિ રાજ્યે સ્થિતે વૃષ્ટિર્ભવિષ્યતિ મહાદ્ભુતા ।
(Page ખં. ૧ અ. ૫૦ પાન ૧૧૩)
અન્યથા લોકનાશઃ સ્યાત્તસ્માત્ કુરુ વચો મહત્ ॥ ૨૦॥

લોકસંરક્ષણાર્થાય દયાયુક્તો મહામતિઃ ।
રાજ્યં જગ્રાહ કાશ્યાશ્ચ દેવવર્જિતમુત્તમમ્ ॥ ૨૧॥

દેવાનામખિલં રાજ્યં સદા સ્વર્ગેષુ વર્તતે ।
મનુષ્યાણાં પૃથિવ્યાં વૈ પાતાલે નાગરક્ષસામ્ ॥ ૨૨॥

અતો દેવતયા શમ્ભું પૂજયિષ્યામિ માનદ ।
સર્વૈઃ સ્વધર્મે સ્થાતવ્યં મયિ રાજ્યં પ્રશાસતિ ॥ ૨૩॥

તથેતિ તમુવાચાથ બ્રહ્મા લોકપિતામહઃ ।
કાશીરાજ્યં દદૌ તસ્મૈ દિવોદાસાય ધીમતે ॥ ૨૪॥

તતો બ્રહ્મા યયૌ કાશ્યાં શઙ્કરં પ્રણિપત્ય સઃ ।

ઉવાચ તં વિશેષજ્ઞો મન્દરં ગચ્છ શઙ્કર ॥ ૨૫॥

મરીચિના તપસ્તેપે તસ્મૈ દેહિ વરં શિવ ।
નો ચેન્મરિષ્યતિ સ વૈ તસ્માદ્ગચ્છ જગદ્ગુરો ॥ ૨૬॥

બ્રહ્મણો ગિરમાકર્ણ્ય તેન સાર્ધં યયૌ શિવઃ ।
દેવર્ષિગણસંયુક્તો વરાર્થં બ્રાહ્મણસ્ય ચ ॥ ૨૭॥

તં દૃષ્ટ્વેતિ વરં બ્રૂહિ શિવો વચનમબ્રવીત્ ।
સ ઉવાચ શિવં તત્ર મુક્તિં દેહિ સદાશિવ ॥ ૨૮॥

ઇત્યુક્ત્વા તપસો દુઃખાજ્જહૌ પ્રાણાન્ મહામુનિઃ ।
પ્રાપ્તઃ શિવસ્ય સારૂપ્યં કૈલાસં સ ગતો મુનિઃ ॥ ૨૯॥

એતસ્મિન્નન્તરે શમ્ભું બ્રહ્મોવાચ કૃતાઞ્જલિઃ ।
વસ ત્વં મન્દરે શમ્ભો ત્યજ કાશીં મહાપુરીમ્ ॥ ૩૦॥

અનાવૃષ્ટિભવં દુઃખં તન્નિવૃત્યર્થમાદરાત્ ।
રાજ્યં દત્તં મયા દેવ દિવોદાસાય શઙ્કર ॥ ૩૧॥

તેનાપિ કથિતં દેવરાજ્યં પૃથ્વ્યાં ન ચેદ્ભવેત્ ।
તદા રાજ્યં કરિષ્યામિ નાન્યથાઽહં કદાચન ॥ ૩૨॥

મયા લોકસ્ય રક્ષાર્થં દત્તં રાજ્યં ચ તસ્ય હિ ।
ક્ષમસ્વ ચાપરાધં મે મહાદેવ નમોઽસ્તુ તે ॥ ૩૩॥

તથેતિ શિવ ઊચે તં નિઃશ્વસ્ય પરમં પ્રભુઃ ।
પાર્વત્યા ગણસંયુક્ત ઉવાસ સ ચ મન્દરે ॥ ૩૪॥

અવિમુક્તં મહાક્ષેત્રં દૈવેન ત્યાજિતં મમ ।
અધુના મુક્તતા કેન કર્મણા ભવિતા મમ ॥ ૩૫॥

ન બ્રહ્મણો વચો મિથ્યા ભવિષ્યતિ કદાચન ।
અધુના કિં કરિષ્યામિ કાશીવિરહદુઃખિતઃ ॥ ૩૬॥

અહં વિશ્વેશ્વરશ્ચાઽસ્મિ મદધીનં ન કિઞ્ચન ।
વિશ્વનાથેતિ નામેદં વ્યર્થરૂપં ન સંશયઃ ॥ ૩૭॥

અખિલપ્રાણિતુલ્યોઽહં કૃતો યેન મહાત્મના ।
શરણં વિઘ્નરાજં તં ગચ્છામિ ન ચ સંશયઃ ॥ ૩૮॥

મમાપિ વિઘ્નરૂપં યત્ સમુત્પન્નં મહાદ્ભુતમ્ ।
અહઙ્કારવિહીનોઽહં કૃતસ્તેન મહાત્મના ॥ ૩૯॥

ઇત્યેવં નિશ્ચયં કૃત્વા શિવસ્તત્રાચલે તપઃ ।
તતાપ ગણપં ધ્યાત્વા કાશીપ્રાપ્ત્યર્થમાદરાત્ ॥ ૪૦॥

કાશી ચ દુઃખસંયુક્તા શ્રુત્વા શમ્ભોર્વિનિર્ગતિમ્ ।
તપસ્તતાપ વિઘ્નેશં ધ્યાત્વા નિશ્ચલચતેસા ॥ ૪૧॥

અહઙ્કારવિનિર્મુક્તા કાશી દુઃખિતમાનસા ।
શિવપ્રાપ્ત્યર્થમતુલં તતાપ પરમં તપઃ ॥ ૪૨॥

દિવોદાસસ્તુ તદ્રાજ્યમકરોદ્ધર્મતઃ સ્વયમ્ ।
તતો વૃષ્ટિઃ સમુત્પન્ના સર્વેષાં સુખદાયિકા ॥ ૪૩॥

સકલં વૃષ્ટિયોગેન જગત્સ્થાવરજઙ્ગમમ્ ।
મોદયુક્તં તદા જાતં તસ્મિન્ રાજ્યં પ્રશાસતિ ॥ ૪૪॥

સ્વસ્વધર્મરતાઃ સર્વે વર્ણાશ્રમવિભાગશઃ ।
પાપલેશો ન તત્રાસીત્તસ્મિન્ રાજ્યં પ્રશાસતિ ॥ ૪૫॥

(Page ખં. ૧ અ. ૫૦ પાન ૧૧૪)
હૃષ્ટપુષ્ટજનાઃ સર્વે વૃક્ષાઃ પુષ્પફલાન્વિતાઃ ।
ઘટદુગ્ધાસ્તદા ગાવસ્તસ્મિન્ રાજ્યં પ્રશાસતિ ॥ ૪૬॥

સ્વાહાસ્વધાયુતા દેવાઃ પિતરશ્ચ મુદા યુતાઃ ।
યજ્ઞાદયો બભૂવુશ્ચ તસ્મિન્ રાજ્યં પ્રશાસતિ ॥ ૪૭॥

એવં નાનાવિધૈર્ભોગૈર્યુતાઃ સર્વે મહામુને ।
દિવોદાસઃ સ્વયં રાજા નિત્યયાત્રાં ચકાર હ ॥ ૪૮॥

આદૌ ઢુણ્ઢિં પુપૂજાઽસૌ પશ્ચાદ્વિશ્વેશ્વરં મુને ।
જગદમ્બાં ચ કાશીં વૈ મણિકાર્ણિં તતઃ પરમ્ ॥ ૪૯॥

ભાગીરથીં માધવં ચ જૈગીષવ્યગુહાં તતઃ ।
કાલભૈરવમેવં ચ દણ્ડપાણિં મહાબલમ્ ॥ ૫૦॥

જનૈઃ સ મતિમાન્ રાજા કારયામાસ સર્વદા ।
ધર્મહીનં જનં હન્તું દણ્ડપાણિરિવ સ્થિતઃ ॥ ૫૧॥

અશીતિવર્ષસાહસ્રં ગતં તત્ર મહામુને ।

ન કિઞ્ચિત્સ્વલ્પપાપસ્ય પ્રવેશોઽપિ બભૂવ હ ॥ ૫૨॥

તતો દેવા વિચારં તે ચક્રુઃ સ્વર્ગેષુ વિસ્મિતાઃ ।
પૃથિવ્યાં દેવરાજ્યં તુ વિનષ્ટં તેન કારિતમ્ ॥ ૫૩॥

અતો વયં કિમર્થં ચ સ્થાસ્યામઃ પૃથિવીતલે ।
સ્પર્ધતે નઃ સ રાજર્ષિશ્છલયામસ્તતો વયમ્ ॥ ૫૪॥

તત ઇન્દ્રોઽગ્નિમાહૂય જગાદ ક્રોધસંયુતઃ ।
દિવોદાસસ્ય રાજ્યે તે સ્થાનં માસ્તુ બહિસ્ત્વિતિ ॥ ૫૫॥

ઇન્દ્રસ્ય વચનં શ્રુત્વા વહ્નિરન્તર્દધે તદા ।
પૃથિવ્યાં વહ્નિહીનાસ્તે જનાઃ સર્વે તમન્વયુઃ ॥ ૫૬॥

તાન્ દૃષ્ટ્વા સ દિવોદાસો વહ્નિરૂપેણ સંસ્થિતઃ ।
પૃથિવ્યાં યત્ર કુત્રાપિ તપો બલસમન્વિતઃ ॥ ૫૭॥

એવં નાનાવિધૈર્ભાવૈર્દેવાઃ સર્વે ક્રમેણ ચ ।
ગતાસ્તત્ર સ્વયં રાજા તેષાં રૂપધરો બભૌ ॥ ૫૮॥

વાય્વાદિરૂપમાસ્થાય સ રાજા દેવકૃત્યવિત્ ।
પૃથિવ્યાં યે જનાઃ સર્વે ન તં જાનન્તિ કૌશિક ॥ ૫૯॥

એવં બહૌ ગતે કાલે દેવાઃ સર્વે વિસિસ્મિરે ।
દેવકૃત્યં કૃતં સર્વં રાજ્ઞાપ્યાશ્ચર્યમુત્તમમ્ ॥ ૬૦॥

તતો દેવગણાઃ સર્વે બ્રહ્માણં શરણં યયુઃ ।
દિવોદાસસ્ય મોહાર્થં પૃથ્વી ત્યક્તા ચ નિર્જરૈઃ ॥ ૬૧॥

સ તપોબલયુક્તસ્તુ દેવાનાં કૃત્યમાદરાત્ ।
સ્વયં દેવસ્વરૂપૈસ્તૈશ્ચકાર પરમાદ્ભુતમ્ ॥ ૬૨॥

વયં વિહારહીનાશ્ચ કિં કુર્મો વદ ભો વિમો ।
તેષાં વચનમાકર્ણ્ય બ્રહ્મા પ્રોવાચ તાંસ્તદા ॥ ૩૩॥

ભવદ્ભિસ્તત્ર ગન્તવ્યં પ્રાર્થનીયો નરાધિપઃ ।
સ દાસ્યતિ સ્વકં સ્થાનં દેવાનાં નાત્ર સંશયઃ ॥ ૬૪॥

તતો દેવા દિવોદાસમાયયુશ્ચેન્દ્રમુખ્યકાઃ ।
તાન્ દૃષ્ટ્વા સહસોત્થાય નનામ વિનયાન્વિતઃ ॥ ૬૫॥

તમુત્થાપ્ય તતો દેવાસ્તુષ્ટુવુસ્તં નરાધિપમ્ ।
સોઽપિ દેવાન્ પ્રતુષ્ટાવ સ્વપદાનિ દદૌ તતઃ ॥ ૬૬॥

સ્વયં નરસ્વરૂપેણ ચૈકદેહેન સંસ્થિતઃ ।
અગ્ન્યાદયો નિજસ્થાને દેવાઃ સર્વે સુસંસ્થિતાઃ ॥ ૬૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે દિવોદાસમહિમવર્ણનં નામ પઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૧.૫૦
(Page ખં. ૧ અ. ૫૧ પાન ૧૧૫)

## ૧.૫૧ કાશીશિવવરપ્રદાનં નામૈકપઞ્ચાશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

યાજ્ઞવલ્ક્ય ઉવાચ ।
તતઃ શમ્ભુઃ પરાં ચિન્તામાપેદે મનસા મુને ।
દેવા હતોદ્યમા જાતાસ્તપસા તસ્ય ધીમતઃ ॥ ૧॥

સ્વધર્મપર એવાયં તપસા ચ સમન્વિતઃ ।
નોચ્ચાલિતું ભવેચ્છક્યઃ કિં ભવિષ્યતિ વૈ તતઃ ॥ ૨॥

મયા કાશી કદા લભ્યા દગ્ધોઽહં વિરહાગ્નિના ।
મરિષ્યામિ ન સન્દેહો વિલલાપ મહેશ્વરઃ ॥ ૩॥

અસ્થિચર્માવશેષોઽપિ શુશોચ બહુધા શિવઃ ।
તં દેવા મુનયઃ સર્વે સાન્ત્વયામાસુરાદરાત્ ॥ ૪॥

દેવર્ષય ઊચુઃ ।
મા કુરુષ્વ વૃથા ચિન્તાં ત્વં સમર્થો મહેશ્વર ।
તવ પ્રસાદયોગેન ગચ્છામઃ કાશિકાં વયમ્ ॥ ૫॥

નાનાસિદ્ધિભિરાલોભ્ય લોકાંસ્તત્ર સમન્તતઃ ।
તત્પાપભાગિનં ભૂપં દિવોદાસં ચ કુર્મહે ॥ ૬॥

તતસ્ત્વયા વિશેષેણ કાશી ગ્રાહ્યા સદાશિવ ।
એવમુક્ત્વા યયુસ્તત્ર દેવાઃ સર્વે પ્રહર્ષિતાઃ ॥ ૭॥

તત્રાભવન્ ગતાઃ કાશ્યાં નાનારૂપધરાઃ સુરાઃ ।
જનાન્ સમ્મોહયામાસુઃ સિદ્ધિં કૃત્વા વિશેષતઃ ॥ ૮॥

ધમશીલા જનાઃ સર્વે તેષાં વાક્યં ન ચક્રિરે ।
એકવર્ષં પ્રયત્નં તે કૃત્વા શાન્તિં પ્રલેભિરે ॥ ૯॥

તતઃ સદાશિવસ્તત્ર પ્રેરયામાસ ભૈરવાન્ ।
તેઽપિ યત્નૈશ્ચ વિવિધૈર્ન સમર્થા બભૂવિરે ॥ ૧૦॥

એવં ક્રમેણ આદિત્યા વસવશ્ચર્ષયઃ પરાઃ ।
યોગિન્યશ્ચ ગણાઃ સર્વે હતોદ્યોગાસ્તથાઽભવન્ ॥ ૧૧॥

તતો બ્રહ્માણમાબોધ્ય પ્રેષયામાસ શઙ્કરઃ ।
દશાશ્વમેધાશ્ચ કૃતાસ્તેન શાન્તિં જગામ સઃ ॥ ૧૨॥

તતસ્તુ શઙ્કરસ્તત્ર ધ્યાનનિષ્ઠો બભૂવ હ ।
ચરણે વિઘ્નરાજસ્ય સર્વાશાપૂરકે પરે ॥ ૧૩॥

સવિઘ્નં માં ગણાધ્યક્ષ નિર્વિઘ્નં કુરુ સર્વદા ।
દાસોઽહં તેઽવિમુક્તસ્ય સંરક્ષ વિરહાત્પ્રભો ॥ ૧૪॥

એવં નિશ્ચિતચિત્તસ્તુ વર્ષમેકં ગજાનનમ્ ।
ધ્યાનેન તોષયામાસ શઙ્કરઃ કાર્યસિદ્ધયે ॥ ૧૫॥

દૃષ્ટ્વાઽહઙ્કારનિર્મુક્તમત્યન્ત શઙ્કરં પ્રભુઃ ।
દર્શયામાસ રૂપં સ્વં યોગિધ્યેયમનુત્તમમ્ ॥ ૧૬॥

સિંહારૂઢં ચતુર્બાહું પાશાઙ્કુશધરં પ્રભુમ્ ।
વરદાભયહસ્તં ચ સિદ્ધિબુદ્ધિસમન્વિતમ્ ॥ ૧૭॥

રક્તવર્ણં સુશોભાઢ્યં ગજવક્ત્રં મહોદરમ્ ।
વિવિધૈઃ શેષનાભિં તં ભૂષણૈઃ સુવિરાજિતમ્ ॥ ૧૮॥

ચિન્તામણિધરં પૂર્ણં તેજોરાશિં મહાપ્રભમ્ ।
દૃષ્ટ્વા દેવં મુદા યુક્તઃ શઙ્કરઃ પ્રણનામ હ ॥ ૧૯॥

તતસ્તં પૂજયામાસ તુષ્ટાવ સ યથામતિ ।
દેવદેવં ગણાધ્યક્ષં વક્રતુણ્ડં વિધાનતઃ ॥ ૨૦॥

શિવ ઉવાચ ।
નમસ્તે વક્રતુણ્ડાય સર્વસિદ્ધિપ્રદાય ચ ।
નિરાકારાય દેવાય સાકારાય નમો નમઃ ॥ ૨૧॥

નમઃ સર્વપ્રબોધાય નમઃ સર્વપ્રિયઙ્કર ।

ગણાનાં પતયે તુભ્યં ગણેશાય નમો નમઃ ॥ ૨૨॥

બ્રહ્મણે સૃષ્ટિકર્ત્રે તે પાલકાય ચ વિષ્ણવે ।
સંહર્ત્રે તે હરાયૈવ ગુણેશાય નમો નમઃ ॥ ૨૩॥

બ્રહ્માકારાય વૈ તુભ્યં બ્રહ્મભૂતાય તે નમઃ ।
નમઃ પ્રપઞ્ચરૂપાય પ્રપઞ્ચાનાં પ્રચાલક ॥ ૨૪॥

અનન્તગુણધારાય હ્યનન્તવિભવાય તે ।
અનન્તોદરરૂપાય હેરમ્બાય નમો નમઃ ॥ ૨૫॥

(Page ખં. ૧ અ. ૫૧ પાન ૧૧૬)
કારણાનાં પરાયૈવ કારણાય નમો નમઃ ।
અકારણાય વૈ તુભ્યં સિંહવાહાય તે નમઃ ॥ ૨૬॥

અહં જીવસમાનશ્ચ સઞ્જાતો નાત્ર સંશયઃ ।
અવિમુક્તં વિમુક્તં મે જાતં દેવ દયાનિધે ॥ ૨૭॥

અતસ્ત્વાં શરણં યાતો નિર્વિઘ્નં કુરુ માં પ્રભો ।
દેહિ કાશીં ગણાધ્યક્ષ અવિમુક્તતયા ચ મે ॥ ૨૮॥

ત્વયા પુરા વરો દત્તઃ સ્મરણેન ત્વદગ્રતઃ ।
સ્થાસ્યામિ પુત્રભાવેન તં પાલય ગજાનન ॥ ૨૯॥

ઇત્યુક્ત્વા પાદયોસ્તસ્ય પ્રણનામ મહેશ્વરઃ ।
તમુત્થાપ્ય ગણાધ્યક્ષ ઉવાચ પ્રહસન્નિવ ॥ ૩૦॥

વક્રતુણ્ડ ઉવાચ ।
ત્વયા કૃતમિદં સ્તોત્રં સર્વસિદ્ધિકરં ભવેત્ ।
પઠતે શ્ૃણ્વતે ચૈવ ભુક્તિમુક્તિપ્રદં શિવ ॥ ૩૧॥

અન્યદ્યત્પ્રાર્થિતં સર્વં કરિષ્યામિ સદાશિવ ।
અવિમુક્તં પ્રદાસ્યામિ સાર્થકં તે ચ સામ્પ્રતમ્ ॥ ૩૨॥

ઇત્યુક્ત્વા નિર્મમે દેહાદ્બ્રાહ્મણં સર્વસુન્દરમ્ ।
સર્વજ્ઞં ચ ગુણેશસ્ય તેજોયુક્તં પ્રભાવિણમ્ ॥ ૩૩॥

આજ્ઞાપયચ્ચ તં દેવો ગચ્છ ત્વં શિવસિદ્ધયે ।
કાશ્યાં તું બુદ્ધિસમ્મોહં જનાનાં કુરુ સત્વરમ્ ॥ ૩૪॥

મોહયિત્વા દિવોદાસં કાશીરાજ્યં શિવાય ચ ।

મમાજ્ઞયા દેહ્યદ્ય ત્વં સર્વપૂજ્યો ભવિષ્યસિ ॥ ૩૫॥

ઢુણ્ઢિં જ્યોતિર્વિદં ત્વાં તુ વદિષ્યન્તિ જના દ્વિજાઃ ।
ત્વદીયવંશગાઃ સર્વે ભવિષ્યન્તિ ન સંશયઃ ॥ ૩૬॥

ઇતિ શ્રુત્વા દ્વિજો ઢુણ્ઢિં પ્રણનામ મુદા યુતઃ ।
યયૌ પ્રદક્ષિણીકૃત્ય કાશીં સ ગણપં સ્મરન્ ॥ ૩૭॥

તતો વિષ્ણું સમાહૂય તં જગાદ ગજાનનઃ ।
બૌદ્ધરૂપેણ વિષ્ણો ત્વં કાશીં ગચ્છ મદાજ્ઞયા ॥ ૩૮॥

દ્વિજેન ઢુણ્ઢિના સર્વં મોહિતં નગરં ભવેત્ ।
કુરુ ત્વમધુના ભ્રષ્ટં મમ વાક્યાજ્જનાર્દન ॥ ૩૯॥

પ્રણમ્ય તં તદા વિષ્ણુર્ગણેશં બૌદ્ધરૂપધૃક્ ।
યયૌ કાશીં મહાભાગો વક્રતુણ્ડં હૃદિ સ્મરન્ ॥ ૪૦॥

તૌ યથા ગણરાજેન કથિતં ચક્રતુસ્તથા ।
મોહયુક્તં પુનર્ભ્રષ્ટં નગરં સર્વમઞ્જસા ॥ ૪૧॥

અન્યચ્છૃણુ ચરિત્રં ત્વં વિશ્વામિત્ર તપોધન ।
કાશીધ્યાનયુતા તત્ર સંસ્થિતા ગણપસ્ય તુ ॥ ૪૨॥

સહસ્રં તત્ર વર્ષાણાં ગતમેકં મહામુને ।
તસ્યાસ્તપઃપ્રભાવેણ સન્તુષ્ટોઽભૂદ્ગજાનનઃ ॥ ૪૩॥

વરં દાતું સમાયાતઃ કાશ્યૈ મૂર્તિધરઃ પ્રભુઃ ।
સિંહારૂઢઃ પ્રસન્નાત્મા નાનાભૂષણભૂષિતઃ ॥ ૪૪॥

તં દૃષ્ટ્વા સહસોત્થાય કાશી પરમપાવની ।
પાદયોઃ પ્રણનામાથ કર્ષિતા વિહ્વલા ભૃશમ્ ॥ ૪૫॥

પુનરુત્થાય તં દેવં પૂજયામાસ ભક્તિતઃ ।
તુષ્ટાવ સુસ્થિરા ભૂત્વા નિબદ્ધકરસમ્પુટા ॥ ૪૬॥

કાશ્યુવાચ ।
નમસ્તે ગણનાથાય નમસ્તેઽનન્તરૂપિણે ।
નમસ્તે સર્વદાત્રે વૈ માયાધારાય તે નમઃ ॥ ૪૭॥

ગજવક્ત્રધરાયૈવ શૂર્પકર્ણાય તે નમઃ ।
સર્વભૂષાય વૈ તુભ્યં વક્રતુણ્ડ નમોઽસ્તુ તે ॥ ૪૮॥

નિરાકારાય નિત્યાય નિર્ગુણાય ગુણાત્મને ।
વેદવેદ્યાય સતતં બ્રહ્મણે તે નમો નમઃ ॥ ૪૯॥

બ્રહ્મણાં બ્રહ્મદાત્રે ચ સિંહારૂઢાય તે નમઃ ।
સિદ્ધિબુદ્ધિપતે તુભ્યં નમઃ સર્વાભયઙ્કર ॥ ૫૦॥

અનાથાય ચ નાથાય સર્વેષાં પાલકાય ચ ।
ભક્તેભ્યઃ સર્વદાત્રે તે વિઘ્નહર્ત્રે નમોઽસ્તુ તે ॥ ૫૧॥

(Page ખં. ૧ અ. ૫૨ પાન ૧૧૭)
વિઘ્નકર્ત્રે હ્યભક્તાનાં ભુક્તિમુક્તિપ્રદાય ચ ।
યોગિનાં હૃદિ સંસ્થાય યોગગમ્યાય તે નમઃ ॥ ૫૨॥

મનોવાણીવિહીનાય શાન્તિરૂપાય તે નમઃ ।
શાન્તેભ્યઃ શાન્તિદાત્રે ચ ગણેશાય નમો નમઃ ॥ ૫૩॥

કિં સ્તૌમિ ત્વાં ગણાધ્યક્ષ યત્ર વેદાઃ સશાસ્ત્રકાઃ ।
શાન્તિં પ્રાપ્તા મહાભાગા અતસ્ત્વાં પ્રણમામિ વૈ ॥ ૫૪॥

રક્ષ રક્ષ ચ દાસીં તે વિરહેણ પ્રપીડિતામ્ ।
અવિમુક્તા શિવેનૈવં નામ વ્યર્થં બભૂવ મે ॥ ૫૫॥

શિવહીના કૃતા દેવ દૈવં તુ પરમાદ્ભુતમ્ ।
અતસ્તે શરણં પ્રાપ્તા શઙ્કરં દર્શયસ્વ મામ્ ॥ ૫૬॥

ઇત્યુક્ત્વા પતિતા તસ્ય પાદયુગ્મે મહામુને ।
તામુત્થાપ્ય ગણાધીશો જગૌ મધુરયા ગિરા ॥ ૫૭॥

ગણેશ ઉવાચ ।
મા શોકં કુરુ કલ્યાણિ શઙ્કરં દર્શયામિ તે ।
અવિમુક્તમિદં નામ સાર્થકં પ્રભવિષ્યતિ ॥ ૫૮॥

ત્વયા કૃતમિદં સ્તોત્રં વિયોગહરણં ભવેત્ ।
યઃ પઠિષ્યતિ ભક્ત્યા ચ શ્રોષ્યતે તસ્ય સુન્દરિ ॥ ૫૯॥

યં યમિચ્છતિ ભાવેન તં તં દાસ્યામિ સર્વગઃ ।
બ્રહ્મભૂયકરં સ્તોત્રં ભવિષ્યતિ ન સંશયઃ ॥ ૬૦॥

ઇત્યુક્ત્વા ગણનાથશ્ચ તત્રૈવાન્તરધીયત ।

તમેવ સાપિ ધ્યાયન્તી સ્થિતા કાલપ્રતીક્ષિકા ॥ ૬૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે કાશીશિવવરપ્રદાનં નામૈકપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૧.૫૧

## ૧.૫૨ નારાયણસમ્પ્રશ્નવર્ણનં નામ દ્વિપઞ્ચાશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

યાજ્ઞવલ્ક્ય ઉવાચ ।
એતસ્મિન્નન્તરે તત્ર યયૌ જ્યોતિર્વિદુત્તમઃ ।
ઢુણ્ઢિનામા દ્વિજો યસ્તુ પુરા પ્રોક્તો મયાઽનઘ ॥ ૧॥

સર્વં તન્નગરં તેન મોહિતં તત્ક્ષણાન્ મુને ।
પશ્ચાત્સમાગતો બુદ્ધો વિષ્ણુર્ભ્રષ્ટં તથાઽકરોત્ ॥ ૨॥

ઢુણ્ઢિના સ દિવોદાસો બોધિતઃ સ ચ ત્યક્તવાન્ ।
રાજ્યં બૌદ્ધેન સન્તસ્થૌ પ્રતીક્ષન્ શિવદર્શનમ્ ॥ ૩॥

તાભ્યામાકારિતઃ શમ્ભુઃ પ્રયયૌ ગણપં પુરઃ ।
કૃત્વા સમ્પૂજ્ય તં કાશ્યામાદૌ ચક્રે હિ વાસિનમ્ ॥ ૪॥

સ્વયં દેવગણૈઃ પશ્ચાદૃષિભિશ્ચ વિવેશ હ ।
નનામ ચરણે કાશી વિઘ્નપસ્ય શિવસ્ય ચ ॥ ૫॥

યથાસ્થાનં સ્થિતાઃ સર્વે દેવા ઋષિગણાઃ સુખમ્ ।
દિવોદાસાય મોક્ષં સ શઙ્કરઃ પ્રદદૌ તતઃ ॥ ૬॥

તતઃ કદાચિદ્દેવેશો જગાદ ગિરિશં વચઃ ।
તુભ્યં દત્તા મયા કાશી કૃતં સર્વં યથાયથમ્ ॥ ૭॥

અધુનાઽહં મહાદેવ યાસ્યે સ્વં ધામ શોભનમ્ ।
યદા મે સ્મરણં કુર્યાસ્તદા દ્રક્ષ્યસિ માં શિવ ॥ ૮॥

ઇત્યુક્ત્વા ઢુણ્ઢિવિપ્રેણ સહિતોઽસૌ ગજાનનઃ ।
અન્તર્ધાનં યયૌ તત્ર દેવાનાં પશ્યતાં મુને ॥ ૯॥

તતઃ સ્વયં વિશ્વનાથસ્તસ્ય મૂર્તિં વિધાય સઃ ।
સ્થાપયામાસ યત્નેન દેવૈશ્ચ બ્રાહ્મણૈઃ સહ ॥ ૧૦॥

વિધિવત્પૂજયામાસ ચોપચારૈર્મનોરમૈઃ ।

સર્વૈઃ કૃત્વા નમસ્કારં પ્રાદક્ષિણ્યં ચકાર સઃ ॥ ૧૧॥

સર્વાન્ જગાદ વિશ્વેશો હિતં શૃણુત મે વચઃ ।
આદૌ ઢુણ્ઢિં સમભ્યર્ચ્ય યે માં તોષ્યતિ તત્ત્વતઃ ॥ ૧૨॥

તેભ્યો ભુક્તિં તથા મુક્તિં દાસ્યામિ ત્વન્યથા ન ચ ।
કાશીવાસફલસ્યાઽપિ દાતાઽયં વક્રતુણ્ડકઃ ॥ ૧૩॥

વેદાદીનાં રહસ્યં યદન્વિષ્ટં તુ મયા બહુ ।
તન્મૂલોઽયં હૃદિ પ્રાપ્તઃ સાક્ષાદ્બ્રહ્મપતિઃ પ્રભુઃ ॥ ૧૪॥

અતોઽયં ઢુણ્ઢિરાજેતિ નામ્ના ખ્યાતો મયા કૃતઃ ।
ધર્માર્થકામમોક્ષાણાં દાતા ક્ષેત્રે ન સંશયઃ ॥ ૧૫॥

એવમુક્ત્વા મહાદેવો નિત્યં પૂજાપરાયણઃ ।
ઢુણ્ઢિરાજસ્ય સેવાયાં સાવધાનો બભૂવ હ ॥ ૧૬॥

તથા ત્વમપિ દેવેશં વિઘ્નરાજં ભજ પ્રભો ।
ત્યક્ત્વાહઙ્કારભાવં તુ બ્રાહ્મણઃ પ્રભવિષ્યસિ ॥ ૧૭॥

મુદ્ગલ ઉવાચ ।
યાજ્ઞવલ્ક્યવચઃ શ્રુત્વા વિશ્વામિત્રો મહાતપાઃ ।
જગાદ તં મહાભાગં વિનયેન સમન્વિતઃ ॥ ૧૮॥

વિશ્વામિત્ર ઉવાચ ।
યાજ્ઞવલ્ક્ય મહાભાગ ત્વયાઽહં બોધિતઃ ખલુ ।
અધુના વદ મે જ્ઞાનં સર્વજ્ઞોઽસિ મહામુને ॥ ૧૯॥

અહઙ્કારો મયા ત્યાજ્યઃ કેન માર્ગેણ તદ્વદ ।
કીદૃશો મે શરીરેઽસૌ વદ તિષ્ઠતિ સામ્પ્રતમ્ ॥ ૨૦॥

ગણેશાનમહં કેન ભજેયં વિધિના વદ ।
સ્વરૂપં ચ કથં તસ્ય યોગીન્દ્રોઽસિ યતઃ સ્વયમ્ ॥ ૨૧॥

યાજ્ઞવલ્ક્ય ઉવાચ ।
શૃણુ ત્વં કૌશિક બ્રહ્મન્નહઙ્કારં વદામિ તે ।
તપસા બ્રાહ્મણત્વં વૈ પ્રાપ્સ્યામિ ન હિ સંશયઃ ॥ ૨૨॥

એનમેવ વિજાનીહ્યહઙ્કારં તુ મહામતે ।
તસ્ય ત્યાગે વિધિં વક્ષ્યે તં શૃણુષ્વ યથાયથમ્ ॥ ૨૩॥

પ્રાપ્તયે બ્રાહ્મણત્વસ્ય તપેયં તપ ઉત્તમમ્ ।
યદા દાસ્યતિ દેવોઽસૌ તદા બ્રાહ્મણતા ભવેત્ ॥ ૨૪॥

યદા ન દત્તા દેવેન રાજર્ષિત્વં તદા ખલુ ।
અસ્તુ મે સતતં તચ્ચ કોઽહં મે કીદૃશં તપઃ ॥ ૨૫॥

અહં સદા પરાધીનો દેહધારી ન સંશયઃ ।
કરોમિ યત્નમત્યન્તં દૈવં ચેત્પ્રભવિષ્યતિ ॥ ૨૬॥

અનેન વિધિના વિપ્ર તપસ્વ ત્વં મહામુને ।
તદા પ્રભવિતા સર્વં ગતાહઙ્કારભાવતઃ ॥ ૨૭॥

અન્યત્ત્વં શ◌ૃણુ મે વાક્યં મત્સરં ત્યજ કૌશિક ।
શરણં ગણરાજં તં યાહિ તેન સુખં ભવેત્ ॥ ૨૮॥

ન મત્સમં તપઃ કસ્ય સ્પર્ધસે તેન વૈ દ્વિજાન્ ।
મત્સરેણ સમાવિષ્ટઃ કુતસ્ત્વં બ્રાહ્મણો ભવેઃ ॥ ૨૯॥

ત્વયા મત્સરભાવેન વસિષ્ઠસ્ય મહાત્મનઃ ।
પુત્રાણાં ચ શતં પૂર્ણં નાશિતં રક્ષસા યથા ॥ ૩૦॥

અપરા સૃષ્ટિરારબ્ધા ત્રિશઙ્ક્વર્થં પુરા ત્વયા ।
વસિષ્ઠહનને યત્નં નાનારૂપં કરોષિ વૈ ॥ ૩૧॥

તં મત્સરં ત્યજ ત્વં વૈ વિધિં ચ શણુ તત્ત્વતઃ ।
નીચોઽહં સર્વવિપ્રેભ્યસ્તપસ્વિભ્યો ન સંશયઃ ॥ ૩૨॥

મયા કિંવા તપઃ કાર્યમેભ્યશ્ચાધિકમાદરાત્ ।
એષાં તપઃપ્રભાવોઽપિ મનસા ગમ્યતે ન ચ ॥ ૩૩॥

એવં જ્ઞાત્વા તપસ્વ ત્વં બ્રાહ્મણઃ પ્રભવિષ્યસિ ।
અન્યથા યુગસાહસ્રં તપસ્તપ્ત્વા મરિષ્યાસિ ॥ ૩૪॥

(Page ખં. ૧ અ. ૫૩ પાન ૧૧૯)
સર્વેભ્યો નમનં વિપ્ર હૃદિ ભાવસમન્વિતમ્ ।
કર્તવ્યં ચ ત્વયા નિત્યં રાજર્ષિવન્મહામતે ॥ ૩૫॥

એવમુક્ત્વા મહાયોગી વક્રતુણ્ડપ્રભાવજામ્ ।
કથાં સંશ્રાવયામાસ પૂર્વજાતાં મહાયશાઃ ॥ ૩૬॥

કથાં શ્રુત્વા મહાભાગો વિશ્વામિત્રઃ સુવિસ્મિતઃ ।

ઉવાચ તં નમસ્કૃત્ય યાજ્ઞવલ્ક્યં તપોધનમ્ ॥ ૩૭॥

વિશ્વામિત્ર ઉવાચ ।
વક્રતુણ્ડસ્ય યોગીન્દ્ર ચરિત્રં સંશ્રુતં મયા ।
અધુના વદ મે બ્રહ્મન્ તસ્યાનુભવરૂપકમ્ ॥ ૩૮॥

યાજ્ઞવલ્ક્ય ઉવાચ ।
શૃણુ યત્નેન માહાત્મ્યં પુરાવૃત્તં કથાનકમ્ ।
કથયામિ ચ તે પ્રીત્યા મદીયં જ્ઞાનદાયકમ્ ॥ ૩૯॥

એકદાઽહં ગતો બ્રહ્મન્ વૈકુણ્ઠં સ્વર્ગમુત્તમમ્ ।
તત્ર નારાયણં નત્વાઽપૃચ્છં તં જગદીશ્વરમ્ ॥ ૪૦॥

કિં સારં સર્વભૂતેષુ કસ્યાધારેણ સંસ્થિતમ્ ।
મહ્યં વદ મહાભાગ સાક્ષાત્ત્વં જગદીશ્વરઃ ॥ ૪૧॥

ઇદં સર્વં ત્વદાધારં ભાસતે હૃદિ સર્વદા ।
તથાપિ પ્રષ્ટુમિચ્છામિ શ્રવણાર્થં યથાયથમ્ ॥ ૪૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે યાજ્ઞવલ્ક્ય -
નારાયણસમ્પ્રશ્નવર્ણનં નામ દ્વિપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૧.૫૨

## ૧.૫૩ નારાયણ-યાજ્ઞવલ્ક્યસંવાદો નામ ત્રિપઞ્ચાશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

નારાયણ ઉવાચ ।
ગણેશાધારમેતત્ત્વં જાનીહિ બ્રાહ્મણોત્તમ ।
હૃદિ બુદ્ધિપ્રદાતૃત્વાદ્બહિઃ સિદ્ધિપ્રદાનતઃ ॥ ૧॥

અતોઽસ્માભિઃ સદા દેવ આદૌ પૂજ્યો મહામુને ।
આદૌ સ એવ મધ્યેઽપિ તિષ્ઠત્યન્તે ન સંશયઃ ॥ ૨॥

ગુણરૂપા વયં સર્વે બ્રહ્માકારો ગણેશ્વરઃ ।
સિદ્ધિબુદ્ધિપતિઃ સો હિ સર્વપૂજ્યશ્ચ ભો મુને ॥ ૩॥

સ્વાનન્દો યસ્ય લોકોભૂદ્ભાવાભાવવિવર્જિતઃ ।
અગમ્યો મુનિદેવાનાં દ્વન્દ્વહીનઃ પરાત્પરઃ ॥ ૪॥

એવં ગણપતિં જ્ઞાત્વા મુચ્યતે સર્વબન્ધનાત્ ।
તદાધારમિદં સર્વં જગદ્બ્રહ્મ મહામતે ॥ ૫॥

સર્વૈરપ્યેકદા તત્ત્વૈર્મત્સરેણ સમન્વિતૈઃ ।
વાદઃ કૃતો મહાભાગ અહં શ્રેષ્ઠ ઇતિ ધ્રુવમ્ ॥ ૬॥

મદાધારમિદં સર્વં પાલયામિ સૃજામ્યહમ્ ।
હરામિ માયયા તસ્માત્ સ્વેચ્છારૂપોઽહમેવ ચ ॥ ૭॥

એવં પરસ્પરં સર્વે તત્ત્વાત્માનો મહાબલાઃ ।
વિવાદં ચક્રિરે તત્ર સામર્થ્યેન વિમોહિતાઃ ॥ ૮॥

તતસ્તત્ર ગુણાધીશો બ્રાહ્મણસ્ય ચ વેષભૃત્ ।
આયયૌ વાદશાન્ત્યર્થં જ્ઞાનદાનાર્થમાદરાત્ ॥ ૯॥

તં દૃષ્ટ્વા વિસ્મિતા દેવાઃ કોઽયમત્ર સમાગતઃ ।
આત્માકારા વયં સર્વે તત્રાસ્ય ચ ગતિઃ કથમ્ ॥ ૧૦॥

તતસ્તં સર્વતત્ત્વાનિ પપ્રચ્છુઃ કો ભવાનિતિ ।
કથં માર્ગસ્ત્વયા પ્રાપ્તો બ્રહ્માકારેષુ વર્ત્મસુ ॥ ૧૧॥

તતસ્તાન્ સ દ્વિજો હૃષ્ટો જગૌ વૈ યોગમાયયા ।
મયા માર્ગઃ કૃતો હ્યત્ર બ્રાહ્મણેન સુયોગિના ॥ ૧૨॥

કિમર્થં વૈ યૂયમપિ વિવાદં કુરુથ સ્વયમ્ ।
તન્મે વદત તત્ત્વાનિ કરિષ્યામિ હિતં મહત્ ॥ ૧૩॥

(Page ખં. ૧ અ. ૫૩ પાન ૧૨૦)
તતો હૃષ્ટાનિ તત્ત્વાનિ તમૂચુઃ શ્રેષ્ઠભાવતઃ ।
કસ્તિષ્ઠતિ વદ પ્રાજ્ઞ તત્ત્વેષ્વસ્મત્સુ વૈ પ્રભો ॥ ૧૪॥

તેષાં વચનમાકર્ણ્ય તાનુવાચ દ્વિજોત્તમઃ ।
તત્ત્વાધારમિદં સર્વં વિદ્યતે નાત્ર સંશયઃ ॥ ૧૫॥

વિશ્વં ત્યક્ત્વા યૂયમપિ પશ્યતો મમ તિષ્ઠત ।
વિશ્વં વિદીર્યતે સર્વં યેન ત્યક્તં સ વૈ પ્રભુઃ ॥ ૧૬॥

ઇતિ શ્રુત્વા વચઃ સર્વૈસ્તથેતિ પ્રતિપાદ્ય તમ્ ।
ક્રમેણ ત્યક્તુમારેભે આત્માકારા મહાબલાઃ ॥ ૧૭॥

બ્રહ્માકારા ચ યા પૃથ્વી વિશ્વં ત્યક્ત્વા સ્થિતાઽભવત્ ।

તથેદમખિલં વિશ્વં ન વિનષ્ટં તુ ભાવતઃ ॥ ૧૮॥

તતો જલેન તત્ત્યક્તં તથા વૈ તાદૃશં સ્થિતમ્ ।
તતસ્તુ તેજસા ત્યક્તં ન વિનષ્ટં તથાપિ ચ ॥ ૧૯॥

તતો વાયુશ્ચ તત્ત્યક્ત્વા સ્થિતો દૂરં મહામુને ।
તથાપિ સકલં વિશ્વં પૂર્વવત્ સંસ્થિતં બભૌ ॥ ૨૦॥

આકાશેન ચ સન્ત્યક્તં તથા વૈ તાદૃશં બભૌ ।
તન્માત્રાભિસ્તતસ્ત્યક્તં તથા વૈ પૂર્વવદ્બભૌ ॥ ૨૧॥

તન્માત્રાભિઃ સહૈતાનિ ભૂતાનિ ચ મહામુને ।
પઞ્ચાપિ દૂરતઃ સ્થિત્વા શુશુચુર્વિપ્રભાણિ ચ ॥ ૨૨॥

તતો જ્ઞાનેન્દ્રિયૈસ્ત્યક્તં પઞ્ચભિસ્તત્તથા બભૌ ।
તતઃ કર્મમયૈસ્ત્યક્તં તથાપિ તાદૃશં બભૌ ॥ ૨૩॥

તત ઇન્દ્રાત્મકં બ્રહ્મ ત્યક્ત્વા દૂરે સ્થિતં મુને ।
તથાપિ વિશ્વમેવેદં પૂર્વવત્સંસ્થિતં કિલ ॥ ૨૪॥

એવં દેવગણાઃ સર્વે ઇન્દ્રિયાણાં પ્રકાશકાઃ ।
આત્માકારાઃ સ્થિતાઃ દૂરં ત્યક્ત્વા વિશ્વં મહામુને ॥ ૨૫॥

તથાપિ સકલં વિશ્વં બભૌ તેઽપિ સુવિહ્વલાઃ ।
નિસ્તેજસોઽભવંસ્તત્ર સ્થિતાસ્તત્ત્વસમન્વિતાઃ ॥ ૨૬॥

તતોઽન્નબ્રહ્મણા ત્યક્તં વિશ્વં તદપિ સમ્બભૌ ।
પ્રાણાત્મકેન સન્ત્યક્તં તથા વૈ તાદૃશં બભૌ ॥ ૨૭॥

તતો મનોમયેનૈવ બ્રહ્મણા ત્યક્તમાદરાત્ ।
તથાપિ સમ્બભૌ વિશ્વં પૂરિતં કેનચિન્મુને ॥ ૨૮॥

તતો વિજ્ઞાનરૂપેણ ત્યક્તં તદપિ તદ્બભૌ ।
તત આનન્દરૂપેણ ત્યક્તં વિશ્વં બભૌ તદા ॥ ૨૯॥

તતો નાદાત્મકેનૈવ બ્રહ્મણા ત્યક્તમાદરાત્ ।
તતો બિન્દુમયેનૈવ ત્યક્તં વિશ્વં બભૌ મુને ॥ ૩૦॥

સોઽહમ્બ્રહ્માત્મકેનાપિ ત્યક્તં વિશ્વં બભૌ મુને ।
તતો બોધાત્મના ત્યક્તં તથા વિશ્વં ચ સમ્બભૌ ॥ ૩૧॥

તતો વિદેહરૂપેણ ત્યક્તં તદપિ સમ્બભૌ ।
તતોઽપ્યસત્સ્વરૂપેણ ત્યક્તં તદપિ સમ્બભૌ ॥ ૩૨॥

તતોઽપિ સત્સ્વરૂપેણ ત્યક્તં વિશ્વં બભૌ મુને ।
તતઃ સમસ્વવેદ્યેન ત્યક્તં વિશ્વં સમાવભૌ ॥ ૩૩॥

તતો નેતિસ્વવેદ્યેન ત્યક્તં વૈ વિશ્વમાબભૌ ।
તતઃ સ્વાનન્દરૂપેણ ત્યક્તં વિશ્વં લયં યયૌ ॥ ૩૪॥

તતસ્તે વિસ્મિતાઃ સર્વે સ્વાનન્દં તુષ્ટુવુર્મુને ।
પ્રહૃષ્ટમનસો ભૂત્વા પ્રાર્થયામાસુરાદરાત્ ॥ ૩૫॥

સકલં યત્ત્વદાધારમસ્માકં ત્વં વિશેષતઃ ।
નાયકઃ સર્વતત્ત્વાનામતો ભવ વિનાયકઃ ॥ ૩૬॥

વિનાયક નમસ્તુભ્યં પુનર્વિશ્વં સૃજ પ્રભો ।
યથા પૂર્વં સ્થિતં સ્વામિંસ્તથા કુરુ જગત્પતે ॥ ૩૭॥

એવં તૈઃ પ્રાર્થિતો દેવો વિશેષેણ વિનાયકઃ ।
નિર્મમે સકલં વિશ્વં યથાપૂર્વં મુનીશ્વર ॥ ૩૮॥

તતસ્તે બ્રહ્મરૂપત્વાત્તદ્વિશ્વં વિવિશુઃ પુનઃ ।
યથા સ્વસ્થાનમાત્માનમાશ્રિત્ય મુમુદુસ્તતઃ ॥ ૩૯॥

(Page ખં. ૧ અ. ૫૩ પાન ૧૨૧)
જગદીશ્વરનામાનઃ સર્વેશાસ્તે પ્રકીર્તિતાઃ ।
અનેન વિધિના બ્રહ્મન્ જ્ઞાતવ્યં તદ્વિશેષતઃ ॥ ૪૦॥

સ વિનાયક ઇત્યુક્તો દ્વિવિધો યાજ્ઞવલ્ક્યક ।
સંયોગેન નિજાનન્દો નિરાનન્દો હ્યયોગતઃ ॥ ૪૧॥

દ્વિવિધે નાશભૂતે ચ યોગરૂપોઽયમુચ્યતે ।
વિનાયકો મહાતેજા બ્રહ્મણાં નાયકઃ સ્મૃતઃ ॥ ૪૨॥

તં વિદિત્વા તતઃ શાન્તિં વયં પ્રાપ્તા મહામુને ।
અતઃ શાન્ત્યર્થમત્યન્તં તમારાધય ભો દ્વિજ ॥ ૪૩॥

માયા ભ્રાન્તિકરી જન્તોર્વક્રા સઙ્કુથિતા મુને ।
તુણ્ડેન હન્તિ તાં ભક્ત્યા તેનાઽયં વક્રતુણ્ડકઃ ॥ ૪૪॥

વક્રતુણ્ડં ચ સર્વેશં શરણં યાહિ ભો મુને ।

તદા યોગીન્દ્રસેવ્યસ્ત્વં ભવિષ્યસિ ન સંશયઃ ॥ ૪૫॥

મનોવાણીમયં સર્વં ગકારાક્ષરમેવ ચ ।
મનોવાણીવિહીનં ચ ણકારં વિદ્ધિ માનદ ॥ ૪૬॥

તયોઃ સ્વામી ગણેશોઽયં યોગરૂપઃ પ્રકીર્તિતઃ ।
તં પ્રાપ્ય બ્રહ્મભૂતાશ્ચ ભવન્તિ ખલુ જન્તવઃ ॥ ૪૭॥

ઇદં વેદાન્તસમ્ભૂતં રહસ્યં કથિતં મુને ।
ગોપનીયં પ્રયત્નેન તેન સિદ્ધિમવાપ્સ્યસિ ॥ ૪૮॥

ઇત્યુક્ત્વા વિરરામાથ તદા નારાયણઃ સ્વયમ્ ।
ગણેશાય નમસ્તુભ્યમિત્યુવાચ પુનઃ પુનઃ ॥ ૪૯॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે નારાયણ-યાજ્ઞવલ્ક્યસંવાદો નામ ત્રિપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૧.૫૩

## ૧.૫૪ વક્રતુણ્ડચરિત્રસમાપ્તિર્નામ ચતુઃપઞ્ચાશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

યાજ્ઞવલ્ક્ય ઉવાચ ।
તતોઽહં પરમપ્રીતસ્તં પ્રણમ્ય જનાર્દનમ્ ।
ગતસ્તપોવનં તાત યોગાભ્યાસં સમારભૈ ॥ ૧॥

ક્રમેણ પઞ્ચધા વૃત્તિં જિત્વા ચિત્તસ્ય સાધનૈઃ ।
ગણપં શાન્તિયોગેન પ્રાપ્તોઽહં તદનુગ્રહાત્ ॥ ૨॥

અતસ્ત્વં શરણં યાહિ વક્રતુણ્ડં વિશેષતઃ ।
તેન બ્રાહ્મણસંવન્દ્યો ભવિષ્યસિ ન સંશયઃ ॥ ૩॥

ગાયત્રીજપસમ્ભૂતં શ્રેયો દેહિ મહામુને ।
ગજાનનાય તેન ત્વં વિઘ્નહીનો ભવિષ્યસિ ॥ ૪॥

વિશ્વસ્મિન્ મિત્રભાવં ત્વં પ્રકુરુષ્વ સદાતનમ્ ।
વિશ્વામિત્રશ્ચ તે નામ તદા સાર્થત્વમેષ્યતિ ॥ ૫॥

મુદ્ગલ ઉવાચ ।
ઇત્યુક્ત્વા યાજ્ઞવલ્ક્યઃ સ યયૌ તેન પ્રપૂજિતઃ ।
ગણેશાય નમશ્ચેતિ નામમન્ત્રં સદા જપન્ ॥ ૬॥

તદા પ્રભૃતિ ગાયત્રીં વિશ્વામિત્રઃ સ ધર્મવિત્ ।
ત્યક્ત્વાઽહઙ્કારમત્યન્ત મત્સરં ચ તથાઽજપત્ ॥ ૭॥

ગણેશાર્પણભાવેન ગાયત્રીં ચ જજાપ હ ।
તપસ્તતાપ વિપ્રોઽસૌ ધ્યાત્વા હૃદિ ગજાનનમ્ ॥ ૮॥

ગાયત્રી વેદમાતેયં પિતા પ્રણવ ઉચ્યતે ।
સ એવ ગણનાથોઽયમોઙ્કારાકૃતિમસ્તકઃ ॥ ૯॥

સગુણો ગણરાજોઽયમોઙ્કાર ઇતિ કથ્યતે ।
(Page ખં. ૧ અ. ૫૪ પાન ૧૨૨)
તસ્મૈ સમર્પ્ય યોગી સ ગાયત્રીં યોગમાપ્નુવાન્ ॥ ૧૦॥

તતઃ સ્વલ્પેન કાલેન બ્રહ્મા લોકપિતામહઃ ।
વિશ્વામિત્રં યયૌ દક્ષ બ્રાહ્મણત્વં દદૌ પરમ્ ॥ ૧૧॥

વસિષ્ઠમુનિના તત્ર બ્રાહ્મણૈઃ સહ પૂજિતઃ ।
વિશ્વામિત્રો મહાતેજા બ્રાહ્મણોઽયં પ્રકીર્તિતઃ ॥ ૧૨॥

સપ્તર્ષીણાં મહાતેજા મધ્યે પ્રોક્તો મહર્ષિભિઃ ।
તથા ગણેશભક્તેષુ મુખ્યોઽભૂત્સ પ્રતાપવાન્ ॥ ૧૩॥

નિત્યં પૂજાપ્રકારેણ પૂજયામાસ તં મુનિઃ ।
તુષ્ટાવ સુસ્થિરો ભૂત્વા યથામતિ ગજાનનમ્ ॥ ૧૪॥

વિશ્વામિત્ર ઉવાચ ।
નમસ્તે ગણનાથાય વિઘ્નેશાય નમો નમઃ ।
નિર્ગુણાય ગુણાનાં ચ પતે વૈ તે નમો નમઃ ॥ ૧૫॥

નમઃ સર્વવિદાં શ્રેષ્ઠ નમઃ સર્વપ્રિયઙ્કર ।
ગજાકારાય દેવાય ગણેશાય નમો નમઃ ॥ ૧૬॥

ગજવક્ત્ર નમસ્તુભ્યં બ્રહ્મણાં ચ પતે નમઃ ।
અનાદયે ચ સતતમાદિપૂજ્યાય તે નમઃ ॥ ૧૭॥

સર્વસિદ્ધિપ્રદાત્રે તે નાનામાયાધરાય ચ ।
માયિભ્યો મોહદાત્રે વૈ તદ્ધીનાય નમો નમઃ ॥ ૧૮॥

બુદ્ધેઃ પતે નમસ્તુભ્યં બુદ્ધિપઞ્ચકધારિણે ।
મનોવાણીમયાયૈવ તદ્ધીનાય નમો નમઃ ॥ ૧૯॥

સિંહારૂઢાય દેવાય દેવાનાં ચ પતે નમઃ ।
દેવદેવેશસેવ્યાયાનાદિસિદ્ધાય તે નમઃ ॥ ૨૦॥

નમશ્ચતુર્ભુજાયૈવ મૂષકધ્વજધારિણે ।
નમો મૂષકવાહાય હેરમ્બાય નમો નમઃ ॥ ૨૧॥

લમ્બોદર નમસ્તુભ્યં શૂર્પકર્ણાય તે નમઃ ।
યોગિનાં કુલદેવાય યોગિનાં ચ પતે નમઃ ॥ ૨૨॥

એવં તસ્મિન્ સંસ્તુવતિ પ્રાદુર્ભૂતો ગજાનનઃ ।
અનન્તાદિત્યસઙ્કાશઃ સિંહારૂઢો મહોદરઃ ॥ ૨૩॥

તં દૃષ્ટ્વા નિપપાતોર્વ્યાં સાશ્રુનેત્રો મહામુનિઃ ।
પુલકાઙ્કિતસર્વાઙ્ગો ભક્તિભાવેન સમ્પ્લુતઃ ॥ ૨૪॥

તં દૃષ્ટ્વા ગણરાજસ્તુ જગાદ મુનિસત્તમમ્ ।
ત્વયા કૃતમિદં સ્તોત્રં મમ પ્રીતિકરં ભવેત્ ॥ ૨૫॥

યઃ પઠેચ્છ્રુણુયાદ્યોઽપિ સ મે માન્યો ભવિષ્યતિ ।
ભુક્તિં મુક્તિં ચ દાસ્યામીપ્સિતં તસ્મૈ ન સંશયઃ ॥ ૨૬॥

ત્વં તુ મત્તો વરાન્ બ્રૂહિ સર્વાન્ દાસ્યામિ દુર્લભાન્ ।
ભક્તિભાવેન સન્તુષ્ટસ્તવ યોગીશ્વરાધુના ॥ ૨૭॥

મુદ્ગલ ઉવાચ ।
ગણેશવચનં શ્રુત્વા સાવધાનોઽભવન્મુનિઃ ।
તં પ્રણમ્ય મહાભક્ત્યા જગૌ વૈ હર્ષસંયુતઃ ॥ ૨૮॥

વિશ્વામિત્ર ઉવાચ ।
ધન્યો વંશો મદીયોઽદ્ય ધન્યં જન્મ તપો યશઃ ।
ધન્યૌ મે જનકૌ દેવ ત્વદઙ્ઘ્રિયુગદર્શનાત્ ॥ ૨૯॥

કિં વાઞ્છામિ ગણાધીશ સર્વં માયાત્મકં પ્રભો ।
અતો ભક્તિં ત્વદીયાં મે દેહિ નાથ નમોઽસ્તુ તે ॥ ૩૦॥

ગાણપત્યેષુ મે દેહિ સંવાસં ચ ગજાનન ।
અમુમેવ વરં બ્રહ્મન્માયામોહવિનાશનમ્ ॥ ૩૧॥

એવમસ્ત્વિતિ તં પ્રોચ્ય સોઽન્તર્ધાનં યયૌ પ્રભુઃ ।
વિશ્વામિત્રસ્તદારભ્ય ગાણપત્યો બભૂવ હ ॥ ૩૨॥

એવં નાનાવતારાશ્ચ વક્રતુણ્ડસ્ય ધીમતઃ ।
ભક્તાનાં સિદ્ધિદાતારો દાનવાનાં વિનાશકાઃ ॥ ૩૩॥

ચરિત્રમખિલં તેષાં વક્તું નૈવ પ્રશક્યતે ।
અતઃ સઙ્ક્ષેપતો વિદ્ધિ કથિતં સુકથાનકમ્ ॥ ૩૪॥

એતદ્વૈ વક્રતુણ્ડસ્ય ચરિતં પાપનાશનમ્ ।
ભુક્તિમુક્તિપ્રદં પૂર્ણં કથિતં તે પ્રજાપતે ॥ ૩૫॥

(Page  ખં. ૧ અ. ૫૪ પાન ૧૨૩)
યઃ શ઼ૃણોતિ નરો ભક્ત્યા સંશ્રાવયતિ યઃ પુમાન્ ।
પઠેદ્યઃ કૃતકૃત્યઃ સ ભવિતા નાત્ર સંશયઃ ॥ ૩૬॥

પુત્રપૌત્રપ્રદં ચૈવ ધનધાન્યકરં પરમ્ ।
વિદ્યાયુષ્યપ્રદં દક્ષ ચરિતં કથિતં પરમ્ ॥ ૩૭॥

સહસ્રમાઘમાસાન્ યઃ પ્રયાગે સ્નાતિ માનવઃ ।
વક્રતુણ્ડચરિત્રસ્ય શ્રવણેન ચ તત્ફલમ્ ॥ ૩૮॥

આજન્મમરણાન્તં યઃ કાશીવાસં કરોતિ ચ ।
યથાવિધિ યથાશાસ્ત્રં શ્રવણાદસ્ય તત્ફલમ્ ॥ ૩૯॥

ઇષ્ટાપૂર્તાદિકં યસ્તુ લક્ષવારં કરોતિ ચ ।
સમ્પૂર્ણભાવયુક્તાચ શ્રવણાદસ્ય તત્ફલમ્ ॥ ૪૦॥

યજ્ઞાનાં ચૈવ સાઙ્ગાનાં ફલં પ્રાપ્નોતિ માનવઃ ।
અસ્ય શ્રવણમાત્રેણ સમ્પૂર્ણં તત્પ્રજાપતે ॥ ૪૧॥

બહુનાઽત્ર કિમુક્તેન બ્રહ્મભૂયપદપ્રદમ્ ।
શ્રવણેન ન સન્દેહો જાનીહિ ત્વં મહામતે ॥ ૪૨॥

સૂત ઉવાચ ।
એવમુક્ત્વા મહાયોગી મુદ્ગલો વિરરામ હ ।
તદેતદખિલં તેઽદ્ય મયાઽપિ કથિતં મુને ॥ ૪૩॥

વક્રતુણ્ડસ્ય માહાત્મ્યં સઙ્ક્ષેપેણ ચ શૌનક ।
કથિતં તે મયા વિપ્ર ભાવં જ્ઞાત્વા વિશેષતઃ ॥ ૪૪॥

શ્રોતુમિચ્છા પુનઃ કિં તે વર્તતે મુનિસત્તમ ।
તવાઽહં સુપ્રસાદેન સન્તુષ્ટાઽસ્મિ ન સંશયઃ ॥ ૪૫॥

વક્રતુણ્ડસ્ય માહાત્મ્યં ગુહ્યં વેદરહસ્યકમ્ ।
ગોપનીયં વિશેષેણ તેન સિદ્ધિં લભેન્નરઃ ॥ ૪૬॥

ન શ્રાવયેત્ દુર્જનેભ્યો ગણેશદ્વિષતે તથા ।
પાપકર્મભ્ય એવેદં વિષયિભ્યઃ કદાચન ॥ ૪૭॥

યદિ તેષાં પુરશ્ચેદં શ્રાવિતં ચ મહામુને ।
તદા કોપઃ પ્રભવિતા વક્રતુણ્ડસ્ય નિશ્ચિતમ્ ॥ ૪૮॥

સ ચાનાદરમાત્રેણ દશપૂર્વાન્ દશાપરાન્ ।
નરકં ચ શ્રાવયતઃ પ્રાપયત્યેષ પૂરુષાન્ ॥ ૪૯॥

અતઃ સાધુજનેભ્યશ્ચ ગાણપત્યેભ્ય એવ ચ ।
પ્રયત્નેન શ્રાવયેદ્યઃ સ્વાનાં કોટિં સમુદ્ધરેત્ ॥ ૫૦॥

અતો યઃ પૃચ્છકો વક્તા સ્વસ્વકોટિકુલોદ્ભવમ્ ।
પુરુષાણાં સમૂહં સ ઉદ્ધરેન્નાત્ર સંશયઃ ॥ ૫૧॥

કલિકલ્મષદાહઘ્નં વક્રતુણ્ડચરિત્રકમ્ ।
કૃતાદિષુ કિમાશ્ચર્યં દહેત્પાપગણાનિતિ ॥ ૫૨॥

અહો કલૌ વિકુણ્ઠં ચ સર્વદેવચરિત્રકમ્ ।
ગાણપત્યં વિશેષેણ ગતિદં ચ સદા ભવેત્ ॥ ૫૩॥

ઇદં મુને ચરિત્રં તે વક્રતુણ્ડસ્ય ભાવતઃ ।
કથિતં તેન વિપ્રર્ષે કૃતકૃત્યોઽસ્મિ સામ્પ્રતમ્ ॥ ૫૪॥

ધન્યોઽહં ભવતાં સઙ્ગાદ્યેન સંસ્મરણં કૃતમ્ ।
ગણેશસ્ય પરેશસ્ય સફલો મે ભવોઽભવત્ ॥ ૫૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
પ્રથમે ખણ્ડે વક્રતુણ્ડચરિતે વક્રતુણ્ડચરિત્રસમાપ્તિર્નામ ચતુઃપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૧.૫૪
॥ શ્રીગજાનનાર્પણમસ્તુ ।

॥ ઇતિ શ્રીમુદ્ગલપુરાણે પ્રથમઃ ખણ્ડઃ સમાપ્તઃ ॥

Proofread by Yash Khasbage

*MudgalapurAna Khanda 1 Vakratundacharitam*

pdf was typeset on September 18, 2023

Please send corrections to *sanskrit@cheerful.com*